महोपाध्याययशोविजयजीविरचितम्



# कूपदृष्टान्तविशदीकरणम्

(चन्द्रशेखरीया वृत्तिसमेतम्)

યુગપ્રધાન આચાર્યસમ પૂ.પં.ચંદ્રશેખરવિજયજી મ.સા.

महोपाध्याययशोविजयविरचितम्

# कूपदृष्टान्तविशदीकरणम्

मुनिगुणहंसविजयविरचितचन्द्रशेखरीयावृत्तिसमन्वितम्


યુગપ્રધાનાચાર્યસમ
પંન્યાસ ચન્દ્રશેખર વિજયજી મ.સાહેબ



003003
04.08



પ્રકાશક
કમલ પ્રકાશન ટ્રસ્ટ

**દિવ્યાશિષ**

**સિદ્ધાન્તમહોદધિ, સચ્ચારિત્રચૂડામણિ,**
**સ્વ. પૂજ્યપાદ આ. ભગવંત શ્રીમદ્ વિજય પ્રેમસૂરીશ્વરજી મહારાજાના**
**વિનેય પૂજ્યપાદ પં. પ્રવર શ્રી ચંદ્રશેખરવિજયજી મ. સાહેબ**

**શુભાશિષ**

**પૂ. ગચ્છાધિપતિ શ્રી જયઘોષસૂરીશ્વરજી મ. સાહેબ**
**યુગપ્રધાન આચાર્યસમ પં. શ્રી ચન્દ્રશેખર મ.સા.ના પટ્ટાલંકાર**
**પૂ. આ. દેવશ્રી હંસકીર્તિસૂરીશ્વરજી મ.સાહેબ**

**ચન્દ્રશેખરીયા - વૃત્તિકાર**

**મુ. શ્રી ગુણહંસ વિ.**

**સંશોધક**

**મુ. યોગરુચિવિજય, મુ. શીલગુણવિજય**

**સંશોધન-સહાયક**

**મુ. તત્ત્વરુચિવિજય**


**પ્રકાશક**

**કમલ પ્રકાશન ટ્રસ્ટ**

૧૦૨-એ, ચંદનબાળા કોમ્પ્લેક્સ, આનંદ નગર પોસ્ટ ઓફિસ સામે,
ભઠ્ઠા, પાલડી, અમદાવાદ-૭. ટેલિ. : ૨૬૬૦ ૫૩૫૫

**નકલ : ૭૦૦**

મૂલ્ય : અધ્યયન - અધ્યાપન - ચિંતન - મનન

**મુદ્રક**

**યથાર્થ પબ્લિકેશન 'સાઈન શો'**

૧-રિદ્ધિ પેલેસ, ૯૦ ફૂટ રોડ, ભાયંદર (વે),
મો. : ૯૮૩૩૬ ૧૬૦૦૪, ટેલિ. : ૨૮૧૮ ૪૫૯૯

।। नमोऽस्तु तस्मै जिनशासनाय ।।

# પ્રસ્તાવના

સામાન્યથી ઘણા બધાની માન્યતા એવી છે કે

(૧) જિનપૂજા કરવામાં કાચાપાણી + પુષ્પ + ફળ + અગ્નિ + વાયુ વગેરેની વિરાધના થાય છે માટે એમાં પાપકર્મ બંધાય.

(૨) પણ જિનપૂજાથી જે શુભભાવ રૂપી પાણી ઉત્પન્ન થાય, એ પેલા પાપકર્મ રૂપી મેલને ધોઈ નાંખે.

ટૂંકમાં જિનપૂજામાં અલ્પનુકસાન + બહુ લાભ છે... માટે જિનપૂજા કરવી...

શાસ્ત્રોમાં 'જિનપૂજા કર્તવ્ય છે' એ સાબિત કરવા માટે કૂવાનું દૃષ્ટાન્ત આપેલું છે.

કૂવો જ્યારે ખોદો, ત્યારે શરૂઆતમાં થાક લાગે, કાદવથી શરીર ખરડાય અને તરસ પણ વધે... પણ જેવું કૂવામાંથી પાણી નીકળે કે તરત પાણીથી સ્નાન કરી લેવાના કારણે થાક દૂર થાય, કાદવ દૂર થાય અને પાણી પીવાથી તરસ પણ દૂર થાય. માટે કૂવો ખોદવો યોગ્ય છે. (અને એ પાણીથી પછી બીજા બધા લાભો તો ખરા જ.)

એમ જિનપૂજા કરો એટલે એમાં પહેલા હિંસાના કારણે દોષ, પણ શુભભાવના કારણે એ પાપ તો ધોવાઈ જ જાય. એ ઉપરાંત ચિક્કાર પુણ્યબંધ અને ચિક્કાર પાપક્ષય થાય.

આ માન્યતા ઘણી પ્રસિદ્ધ છે.

મહોપાધ્યાયજી એકદમ સ્પષ્ટ શબ્દોમાં ફરમાવે છે કે

→ જો જિનપૂજા સંપૂર્ણ વિધિ + ભક્તિપૂર્વક કરવામાં આવે, તો એમાં ગમે એટલી સ્વરૂપ હિંસા થાય, તો પણ એના દ્વારા લેશ પણ પાપ ન જ બંધાય. ←

અતિ અદ્ભુત છે આ ગ્રન્થ !

અઢળક રહસ્યો ભરેલા છે આમાં !

વધુ લખતો નથી,

ગ્રન્થ સ્વયં બધુ બોલશે.

મેં આમાં યુગપ્રધાનાચાર્યસમ પૂ. ગુરુદેવ શ્રી ચન્દ્રશેખરવિજયજી મ.સાહેબના ઉપકારની સ્મૃતિ માટે એમના નામથી **ચન્દ્રશેખરીયા** વૃત્તિ લખી છે. ભાષાંતર કર્યું નથી, જેમને ગુજરાતી ભાષાંતરની જરૂર હોય, તેઓ પૂ.આ.ભ. અભયશેખરસૂરિજી મ.નું સામાચારી પ્રકરણ મેળવી લે, એમાં પાછળ **કૂપદૃષ્ટાન્તવિશદીકરણ** ગ્રન્થનું ભાષાંતર છે જ.

આ ઉપરાંત પં. શ્રી પ્રવીણભાઈ મોતાનું પણ ભાષાંતર છે. પણ સરળ સંસ્કૃત ભાષામાં જ જો આ ગ્રન્થના પદાર્થો જાણવા હોય, તો આ ચન્દ્રશેખરીયા વૃત્તિ ઉપયોગી બનશે. અંતે આ વૃત્તિમાં જિનાજ્ઞાવિપરીત કંઈપણ લખાયું હોય, તો મન-વચન-કાયાથી ત્રિવિધે-ત્રિવિધે મિચ્છા મિ દુક્કડં.

ભૂલો દેખાય, તો અમને જણાવવા ખાસ ભલામણ...

**– ગુણહંસ વિજય**

**ઈશિતા પાર્ક, સુરત, ફાગણ વદ-૧૪, વિ.સં. ૨૦૭૧**

# अनुक्रमणिका


(१) श्रीवर्धमानजिननमस्काररूपं मङ्गलम् ............ ८
(२) प्रथमा मूलगाथा ............ १२
(३) द्रव्यस्तवे कूपदृष्टान्तस्य विशदीकरणं विषयः ............ १२
(४) भगवतश्चत्वारो मूलातिशयाः ............ १४
(५) द्वितीया गाथा ............ १६
(६) असंपूर्णसंयमवतां गृहिणां स्नानपूजादिको द्रव्यस्तवः करणानुमोदनद्वारेण स्वपरयोः पुण्यकारणं .... १६
(७) पूर्वपक्षः - पञ्चाशकपाठो द्रव्यस्तवे सदोषत्वप्रतिपादकः सर्वथा निर्दोषत्वनिषेधकश्च ............ १७
(८) पञ्चाशकस्य वृत्तिसमन्वितः पाठः ............ १७
(९) पञ्चाशकवृत्तौ द्रव्यस्तवस्य सर्वथा निर्दोषत्वाभावप्रतिपादनस्य खण्डनम् ............ २०
(१०) पञ्चाशकवृत्तौ 'धमार्थप्रवृत्तावपि अल्पस्य पापस्यावश्यं बन्धः' इति कथनम् ............ २१
(११) सुसाधोः अनेषणीयदानेऽल्पपापबहुनिर्जराप्रतिपादकस्य भगवतीपाठस्य पञ्चाशकवृत्तौ कथनम्....... २१
(१२) पञ्चाशकवृत्तौ ग्लानसेवानन्तरं पञ्चकल्याणकप्रायश्चित्तस्य वर्णनम् ............ २२
(१३) पञ्चाशकपाठसमाप्तिः पूर्वपक्षस्य महोपाध्यायोपरि पञ्चाशकपाठनिह्नवकरणारोपश्च ............ २३
(१४) तृतीया गाथा ............ २४
(१५) **उत्तरपक्षः** - विधिविरहवति भक्तिसहितेऽनुष्ठानेऽल्पपापकथनपरं पञ्चाशकवचनम् ............ २५
(१६) चतुर्थी गाथा ............ २५
(१७) पञ्चाशकपाठगतस्य 'कहं चि' पदस्य गूढोऽर्थः ............ २६
(१८) विधिविरहभक्तिकालीनमेव जिनपूजादिकं अल्पपापयुक्तम् ............ २६
(१९) 'यतनाविशेषेण प्रवर्तमानस्य सर्वथाऽपि कायवधो न भवति' इति पञ्चाशकस्यैव स्पष्टपाठः ....... २७
(२०) प्रमादरूपः कायवध एव प्रतिषेध्यः ............ २८
(२१) जलपुष्पोपनयनादिरूपः पूजाविधिस्वरूपः कायवधस्तु ज्ञात्वाऽपि कर्त्तव्यः प्रतिपादितः ............ २८
(२२) अप्रवृत्तेः निन्दारूपोऽर्थवादो विध्याक्षेपकः ............ २९
(२३) हिंसासामान्यनिषेधः पदार्थवाक्यार्थादिविचारणायां अविधिनिषेधपर एव ............ ३०
(२४) 'अल्पायुर्बन्धकारणानि त्रीणि' इति प्रतिपादकः स्थानाङ्ग, तद्रहस्योद्घाटनं च ............ ३१
(२५) अशुद्धदानादिदृष्टान्तैः सह अशुद्धजिनपूजाया एव उपमा उचिता। ............ ३७
(२६) जिनपूजा दानादिचतुष्कतुल्यफलवतीति महानिशीथपाठस्तद्रहस्यं च ............ ३७
(२७) बृहत्कल्पभाष्यगाथायाः 'संविग्गभावियाणं...' इत्यादिरूपाायाः रहस्यम् ............ ३८
(२८) 'संथरणंमि अशुद्धं' इति निशीथभाष्यगाथामाश्रित्य निरूपणम् ............ ४०
(२९) गीतार्थताद्यभावे एवापवादसेवनेऽल्पपापसम्भवः, नान्यथा ............ ४१
(३०) व्यवहारतो बाधकमबाधकम् ............ ४२

(३१) जिनपूजायामपि अविधिसद्भावे एव दोष:, नान्यथा, ........ ४३
(३२) अन्येषां मतम् ........ ४३
(३३) अन्येषां मतस्याविधियुतजिनपूजायामतिदेश: ........ ४४
(३४) पञ्चमी गाथा ........ ४४
(३५) **प्रश्न**:-परिणामप्रामाण्ये विधिविकलतायामपि को दोष: ? ........ ४७
(३६) उत्तररूपा षष्ठीगाथा ........ ४७
(३७) अयतनाजनिता हिंसाऽज्ञानतो भवति ........ ४७
(३८) अज्ञानजन्ययतनाजनितो दोष उत्तरकालभाविना शुभभावेनैव निवारयितुं शक्य: ........ ४८
(३९) भक्त्यनुष्ठानमपि अविधिदोषं निरनुबन्धीकृत्य परम्परया मुक्तिजनकमिति ........ ४८
(४०) प्रीतिभक्ती स्वर्गप्रापिके वचनासङ्गौ मोक्षसाधकौ इति हरिभद्रसूरि: ........ ४९
(४१) दुर्गतनारीदृष्टान्त: ........ ४९
(४२) पूजासम्बन्धियतनावर्णनम् ........ ५२
(४३) अविधिभक्तिरूपाभ्यां शुद्धाशुद्धयोगाभ्यां शुद्धाशुद्धरूपमिश्रकर्मबन्धापत्ति: ........ ५२
(४४) योगाध्यवसाययोर्मिश्रत्वं व्यवहारेणैव, न तु निश्चये नेति प्रतिपादिका सप्तमी गाथा ........ ५३
(४५) व्यवहारस्य फलं वाग्व्यवहारमात्रमेव ........ ५३
(४६) महाभाष्ये अशुभरूपाणां शुभरूपाणामेव च योगाध्यवसायस्थानानां प्रतिपादनम् ........ ५४
(४४) समूहालम्बनसम्भवेन मिश्रयोगाध्यवसायस्थानानामापत्ति:, तन्निराकरणं च ........ ५४
(४५) अविध्यंशे उत्कटत्वेऽशुद्ध एव, विध्यंशे उत्कटत्वे 'शुद्ध एव योग इति निश्चयमतम् ........ ५६
(४६) योगस्य मिश्रत्वं बन्धकालस्य प्रदीघतया परिणामपरावृत्त्या च ........ ५७
(४७) एकधारारूढे भक्तिभावेऽविधिदोषोऽपि निरनुबन्ध: सन् भग्न इवावतिष्ठते ........ ५७
(४८) अष्टमी गाथा ........ ६१
(४९) विधियुतपूजायां द्रव्यमात्रहिंसया दुष्टत्वे मन्यमाने साधूनामाहारविहारप्रमुखमपि दुष्टं स्यात् इति उत्तरम् ........ ६१
(५०) जिनपूजायां द्रव्यहिंसा असदारम्भप्रवृत्तिनिवृत्तिफलत्वेनाहिंसारूपा इति पदार्थ:, तत्साक्षिपाठश्च ........ ६२
(५१) प्रकृतपदार्थप्रतिपादक एव षोडशकपाठ: ........ ६३
(५२) भूमिकापेक्षया अप्रासुकदानादिकमपि गृहस्थानां कर्तव्यमेवेति प्रतिपादको भगवतीसूत्रवृत्तिपाठ: ........ ६४
(५३) जिनपूजाधिकारिणो द्वे विशेषणे - यतिधर्माशक्तत्वं असदारम्भप्रवृत्तत्वं च ........ ६४
(५४) जिनपूजादौ परिमितसंसारफलकत्वार्थवादेन जिनाज्ञायोग: कल्पनीय एव ........ ६५
(५५) नवमी गाथा ........ ६६
(५६) ऋजुसूत्रनयमते प्रतिजीवं विभिन्ना हिंसा ........ ६७
(५७) शब्दादिनयमते आत्मस्वरूपमाश्रित्य हिंसा ........ ६७
(५८) आध्यात्मिकस्य अल्पस्याप्यारम्भस्य पुण्यानुबन्धिपुण्यप्रतिबन्धकत्वम् ........ ६७
(५९) दशमी गाथा ........ ६८
(६०) प्राणातिपातत: कर्कशवेदनीयकर्मबन्धनिरूपको भगवतीसूत्रपाठ: ........ ६८

(६१) एकादशी गाथा ........ ६९
(६२) जिनपूजासम्बन्धी आरम्भोऽनारम्भ एव मन्तव्यः, असदारम्भनिवृत्त्यंशप्राधान्यात् ........ ६९
(६३) कर्कशवेदनीयादिसम्बन्धिनो भगवतीसूत्रालापकाः ........ ७०
(६४) अनिवर्तनीयाशुभानुबन्धं कर्कशवेदनीयम्, इतरत्तु अकर्कशवेदनीयम् ........ ७२
(६५) वैमानिकादिषु अकर्कशवेदनीयनिषेधः, विशिष्टविरतिपरिणामजनितऽशुभानुबन्धापनयनापेक्षया ........ ७३
(६६) 'ज्ञेया सकामा यमिनाम्' इत्यादिप्रौढिवादा उत्कृष्टनिषेधपराः ........ ७५
(६७) द्वादशी गाथा ........ ७६
(६८) ध्रुवबन्धिपापबन्धो न द्रव्यस्तवीयहिंसाजन्योऽपि तु स्वहेतुजन्यः ........ ७७
(६९) द्रव्यस्तवे हिंसासकाशात्पापप्रकृतिषु अल्पभागः, भक्तिसकाशाच्च पुण्यप्रकृतिषु बहुभाग इति पूर्वपक्षः ७८
(७०) द्रव्यहिंसा आकेवलिनमवर्जनीया ........ ७९
(७१) ध्रुवबन्धादिप्रक्रिया ........ ८०
(७२) ध्रुवबन्धिनीषु भङ्गत्रयम् सादिसान्तः, अनादिसान्तः, अनाद्यनन्तश्च ........ ८१
(७३) साद्यनन्तभङ्गकस्य असम्भवः ........ ८२
(७४) 'पूजासमाप्तौ प्रणिधानं कर्त्तव्यं' इति पञ्चाशकपाठानुसारेण पूजा प्रणिधानादिरहिता सिद्ध्येत् ........ ८३
(७५) त्रयोदशी गाथा ........ ८४
(७६) पुष्पादिना द्रव्येण स्तवो द्रव्यस्तवः, न तु अप्रधानः स्तवो द्रव्यस्तवः ........ ८४
(७७) 'स्तव'पदविचारणा ........ ८४
(७८) आलङ्कारिकमतनिरूपणम् ........ ८६
(७९) प्रणिधानाद्यभावेन द्रव्यस्तवत्वं न, तुच्छत्वेनाप्राधान्यरूपद्रव्यत्वापत्तेः ........ ८६
(८०) प्रणिधानाद्याशयपञ्चकप्रतिपादकः षोडशकपाठः ........ ८७
(८१) अपूर्वत्वप्रतिसन्धानविस्मयादिभिः जिनपूजा प्रधानद्रव्यस्तवरूपा, अन्यथा तु विपरीता ........ ८९
(८२) चैत्यवन्दनान्ते प्रोक्तं प्रणिधानं विशिष्टतरं, पूजाकाले तु सामान्धं प्रणिधानमस्त्येव ........ ८९
(८३) 'अन्ते प्रणिधानं विशिष्टतरं' इति प्रतिपादकः पञ्चाशकपाठः ........ ९०
(८४) जय वीयराय' सूत्रात्मकं प्रणिधानं बोधिप्रार्थनावत् न निदानं ........ ९०
(८५) उचितावस्थायां प्रकृतं प्रणिधानमुचितमेव ........ ९१
(८६) तीर्थंकरत्वप्रार्थना औदयिकभावांशे निदानम्, न तु क्षायिकभावांशे ........ ९२
(८७) 'जयवीयराय' इत्यादि प्रार्थनासूत्रं प्रमत्तसंयतान्तस्य जीवस्योचितम्, निरभिष्वङ्गताहेतुत्वात् ........ ९३
(८८) दशाश्रुतस्कन्धादिषु तीर्थकरत्वप्रार्थनाप्रतिषेध औदयिकभावांशमपेक्ष्यैव ........ ९४
(८९) तीर्थकरत्वविभूतिरपि अकाम्या ........ ९५
(९०) निरभिष्वङ्गं तीर्थकरत्वप्रार्थनं अदुष्टम् ........ ९६
(९१) व्यधिकरणहेतुनाऽपि साध्यसिद्धिः ........ ९७
(१०१) **प्रश्नः**-औदयिकक्षायिकभावद्वयनिरपेक्षा तीर्थकरत्वप्रार्थना किंस्वरूपा? ........ ९८
(१०२) **उत्तरं**:-औदयिकभावप्रार्थनाविशिष्टा प्रार्थना निदानं, क्षायिकभावप्रार्थनाविशिष्टा तु अनिदानम् ........ ९८
(१०३) जातिरव्याप्यवृतिरपि अनेकान्तवादे सम्भवति ........ १०३

## સૌજન્ય

# શ્રી ઉમરા શ્વેતાંબર મૂર્તિપૂજક જૈન સંઘના જ્ઞાનનિધિમાંથી



# આ પુસ્તક પ્રકાશિત થયેલ છે



**શ્રુતભક્તિનો લાભ લીધો એ બદલ ખૂબ ખૂબ ધન્યવાદ....**

## પ્રાપ્તિસ્થાન

**હિતેશભાઈ ગાલા**
બી-૧૭, તૃપ્તિ સોસાયટી, હનુમાન રોડ, વિલે પાર્લે (પૂર્વ), મુંબઈ- ૪૦૦ ૦૫૭.
**મોબાઈલ : ૯૮૨૦૯૨૮૪૫૭**

* * *

**આશિષભાઈ મહેતા**
૭, સુનીષ એપાર્ટમેન્ટ, રત્નસાગર સ્કૂલની સામે, કાજીનું મેદાન, ગોપીપુરા, સુરત
**મોબાઈલ : ૯૩૭૪૫૧૨૨૫૯**

* * *

**દીપેશભાઈ દીક્ષિત**
બી-૨, અમર એપાર્ટમેન્ટ, ડીવાઈન લાઈફ સ્કૂલની સામે,
બેરેજ રોડ, વાસણા, અમદાવાદ.
**મોબાઈલ : ૦૯૪૨૮૬ ૦૮૨૭૯**

* * *

# समर्पणम्

→ અપવાદ માર્ગ સેવવો જ પડે, તો પુષ્ટાલબંન + યતનાપૂર્વક જ સેવનારા સંયમીઓને ...

→ અપવાદ માર્ગ સેવ્યા પછી પણ એનો પશ્ચાત્તાપ આલોચનાદિ કરનારા સંયમીઓને...

→ વિધિ + ભક્તિના પ્રભાવથી જિનપૂજાદિમાં થનારી સ્વરૂપહિંસાને નિષ્ફળ બનાવનારા શ્રાવક-શ્રાવિકાઓને...

→ સ્વરૂપહિંસાવાળા એવા પણ જિનપૂજાદિમાં વિધિ + ભક્તિના પ્રભાવથી એકાંતે નિર્જરા અને પુણ્યબંધ મેળવનારા શ્રાવક-શ્રાવિકાઓને...

→ અવિધિના કારણે થોડુંક પાપ બંધાઈ જાય, તો પણ ભક્તિના પ્રભાવથી એ બધું પાપ ધોઈ નાંખી ઘણો મોટો લાભ મેળવનારા શ્રાવક-શ્રાવિકાઓને..

→ જિનશાસનના બેનમૂન અનેકાન્તવાદને સ્પષ્ટ દેખાડી આપીને જૈનસંઘ પર અદ્વિતીય ઉપકાર કરનારા મહોપાધ્યાય યશોવિજયજી મહારાજાને...

**યુગપ્રધાનાચાર્યસમ**
**પૂજ્ય પંન્યાસ ચન્દ્રશેખરવિજયનો શિષ્ય**
**મુનિ ગુણહંસવિજય**

नमोऽस्तु तस्मै जिनशासनाय

महोपाध्याययशोविजयविरचितं

# कूपदृष्टान्तविशदीकरणं

तदुपरि च चन्द्रशेखरीया वृत्तिः ।

**યશોવિજયજી** : ऐन्द्रश्रीर्यत्पदाब्जे विलुठति सततं राजहंसीव यस्य,
ध्यानं मुक्तेर्निदानं प्रभवति च यतः सर्वविद्याविनोदः ।
श्रीमन्तं वर्धमानं त्रिभुवनभवनाभोगसौभाग्यलीला-
विस्फूर्जत्केवलश्रीपरिचयरसिकं तं जिनेन्द्रं भजामः ॥१॥

**ચન્દ્રશેખરીયા** : श्रीमते वीरनाथाय, सनाथायाद्भुतश्रिया ।
महानन्दसरोराजमरालायार्हते नमः ॥

वीतरागसर्वज्ञो भगवान् द्विविधं धर्ममुपदिशति–साधुधर्मं श्रावकधर्मञ्च। तत्र श्रावकाः संसारे पृथ्व्यादिहिंसापरायणाः, ततश्च 'कण्टकः कण्टकं निष्काशयति' इति न्यायात् तेषां पृथ्व्यादिहिंसादोषनिवारणार्थं स्वरूपतः सावद्यमपि साधुधर्मप्रापकम्, अत एव परम्परया निरवद्यं जिनपूजादिकं श्रावकधर्मं अनुजानाति भगवान्।

तत्र च भवतीय**माशङ्का** यदुत 'यथा गृहनिर्माणाद्यर्थं पृथ्व्यादिहिंसां कुर्वतां गृहस्थानां पापकर्मबन्धो भवति, तथा जिनपूजार्थं सचित्तजलपुष्पादिविराधनां कुर्वतां गृहस्थानां पापकर्मबन्धो भवति न वा ?' इति।

एतदाशङ्कानिवारणार्थं चतुर्दशपूर्वधरा भद्रबाहुस्वामिन आवश्यकनिर्युक्तौ कूपदृष्टान्तं प्रतिपादितवन्तः, तत्प्रतिपादिका च गाथेयम्।

अकसिणपवत्तगाणं, विरयाविरयाण एस खलु जुत्तो ।
संसारपयणुकरणे, दव्वत्थए कुवदिट्ठंतो ॥

अस्याः सङ्क्षेपार्थस्त्वयम् '–अकृत्स्नप्रवर्तकानां विरताविरतानां संसारप्रतनुताकरणे जिनपूजादिके

द्रव्यस्तवे खलु एष कूपदृष्टान्तो युक्त' इति।

अस्या विस्तरार्थस्तु अग्रे प्रतिपादयिष्यते ।

अत्रापि **प्रश्नो भवति** → कूपोऽत्र दृष्टान्तः, जिनपूजादिकं च शोभनं स्वरूपतः सावद्यानुष्ठानं दार्ष्टान्तिकं, ततश्चानयोर्मध्ये कीदृशेन प्रकारेणोपमौपमेयभाव ← इति ।

अत्र केचि**दुत्तरं** प्रतिपादयन्ति → यथा कूपखनने प्रथमं श्रमः कर्दमः तृष्णावृद्धि इत्येवमादयोऽपाया भवन्ति, किन्तु कूपखनानन्तरं यदा जलं निर्गच्छति, तदा तेन जलेनैव स्नानपानादिक्रियाबलेन श्रमकर्दमतृष्णानिवारणं भवति, कृष्यादिना प्रभूततरो लाभश्च भवति।

एवमेव जिनपूजादिकेऽनुष्ठाने जलादिहिंसासद्भावात् प्रथमं पापकर्मबन्धो भवति, किन्तु तदनन्तरं शुभभावबलात् बद्धपापकर्मणां क्षयो भवति, पुण्यानुबन्धिपुण्योपार्जनं च भवति ← इति।

महोपाध्यायास्तु 'इदमुत्तरं असम्यक्' इति प्रतिपादयन्ति, यतः केवलं बाह्यहिंसा न कर्मबन्धकारिणी' इति हि तेषां शास्त्रानुसारी स्पष्टोऽभिप्रायः। तथा च ते कूपदृष्टान्तं इत्थं घटयन्ति यदुत → यथा कूपखनने जललाभात् महान् लाभः, तथैव जिनपूजादिकेऽनुष्ठाने पापनिर्जरापुण्यानुबन्धिपुण्यबन्धलाभात् महान् लाभ एव। अपायस्तु न कश्चित्।

यद्यपि कूपखनने दोषाः श्रमादिकाः सन्ति, किन्तु अत्र ते न गणनीयाः, न हि उपमौपमेयभावे अयं नियमो यदुत 'यद् उपमायां भवति, तत्सर्वं उपमेयेऽपि अवश्यं गणनीयमेव' इति। अन्यथा शक्रस्तवे जिनेश्वरस्य सिंहपुण्डरीकहस्तिप्रभृतय उपमाः प्रदर्शिताः, ततश्च सिंहादिसत्कास्ति-र्यक्त्वमांसभक्षकत्वचतुष्पादत्वादयो धर्मा अपि जिनेश्वरे गणनीया भवेयुः।

तस्मात् उपमागता यथोचिता धर्मा एव उपमेये गणनीया इतिकृत्वा कूपखनने प्रभूतलाभात्मको यो धर्मः, स एव जिनपूजादिके उपमेये गणनीयः, न तु श्रमादिका इति।

यदा तु जिनपूजादिकेऽनुष्ठाने अयतना भवति, तदा कूपदृष्टान्तघटना इत्थं करणीया यदुत → कूपखनने प्रथमं अपायाः, पश्चाच्च प्रभूता लाभा इति तत्कर्त्तव्यम्, एवं जिनपूजादिकेऽनुष्ठाने अयतना समन्विते प्रथमं कर्मबन्धादयोऽपायाः, पश्चात्तु शुभभावादिबलात् प्रभूता लाभा इति तत्कर्त्तव्यम् ← इति।

एवं तावन्महोपाध्यायानामभिप्रायः सङ्क्षेपतः प्रतिपादितः। अस्मिन्नभिप्राये प्रभूतं रहस्यमस्ति, तत्तु अग्रे ग्रन्थानुसारेणैव प्रतिपादयिष्यते, केवलं 'अध्येतृणां व्यामोहो मा भूत्' इत्येतदर्थं प्रथमं प्रस्तावनारूपे अतिसङ्क्षेपतोऽयं पूर्वपक्षोत्तरपक्षरूपः पदार्थः प्रतिपादित इति।

अधुना कूपदृष्टान्तविशदीकरणग्रन्थस्यावसरः।

अस्मिन्ग्रन्थे त्रयोदश मूलगाथाः सन्ति।

मूलग्रन्थस्य तद्वृत्तेश्च रचयितारो महोपाध्याया यशोविजयिनः ।

मया तु तद्द्वयोरुपरि अनन्तोपकारियुगप्रधानाचार्यसमपंन्यासप्रवरश्रीचन्द्रशेखरविजय-गुरुदेवाभिधानानुसारेण चन्द्रशेखरीया वृत्तिः क्रियते।

तत्र प्रथमं तावत् टीकामङ्गलश्लोक :- **ऐन्द्रश्री** इत्यादि।

अन्वयार्थस्त्वयम् -

→ ऐन्द्रश्रीः यत्पदाब्जे राजहंसीव सततं विलुठति,

यस्य ध्यानं मुक्तेर्निदानं,

यतः सर्वविद्याविनोदः प्रभवति,

त्रिभुवनभवनाभोगसौभाग्यलीलाविस्फुर्जत्केवलश्रीपरिचयरसिकं श्रीमन्तं तं वर्धमानं जिनेन्द्रं भजामः ।।

भावार्थस्त्वयम् -

अत्र सर्वत्र **यत्**सर्वनामपदेन वर्धमानजिनेन्द्रो ग्राह्यः, ततश्चायमर्थः -इन्द्रसम्बन्धिनी लक्ष्मीः यस्य वर्धमानस्य पदकमले राजहंसी इव विलुठति। यस्य वर्धमानजिनेन्द्रस्य ध्यानं मोक्षस्य कारणम्। यस्मात् वर्धमानजिनेन्द्रात् सर्वासां विद्यानां विनोदः प्रादुर्भवति, त्रिभुवनरूपे भवने आभोगरूपा या सौभाग्यलीला, तया विस्फुर्जन्ती या केवलश्रीः, तस्याः परिचये रसिकं अष्टप्रातिहार्यादिशोभायुतं तं वर्धमानं जिनेन्द्रं भजाम इति।

अत्र विशेषार्थः -

यदा मुकुटसहिता इन्द्राः प्रभोः पदकमले नमन्ति, तदा मुकुटाग्राणि प्रभोः पदयुगले लगन्ति। इन्द्रमुकुटाग्राणि एव इन्द्रसम्बन्धिनी श्रीः, ततश्च यथा राजहंसी कमले विलुठति, तथैव एन्द्रश्रीः सततं प्रभोः पदकमले विलुठतीति।

तथा यथा भवने सर्वे पदार्था भवन्ति, तथैव त्रिभुवनेऽपि सर्वे पदार्था भवन्ति, ततश्च त्रिभुवनं भवनरूपमेव। यथा च मनुष्यः स्वभवने आभोगं कर्तुं समर्थः, तथैव भगवान् केवलज्ञानेन त्रिभुवनरूपे भवने आभोगं कर्तुं समर्थः। इत्थं भगवतः समीपे या केवलज्ञानरूपा श्रीरस्ति, तस्या इयमेव सौभाग्यलीला यदुत सा त्रिभुवनभवनाभोगवती। यथा संसारिणी स्त्री सौभाग्यवत्येव श्रेष्ठा, न तु विधवा। तथैव केवलश्रीः त्रिभुवनभवनाभोगात्मिकया सौभाग्यलीलयैव श्रेष्ठा, न तु अन्यथा।

इत्थं च सा केवलश्रीः तादृशसौभाग्यलीलया विस्फुर्जन्ती = देदिप्यमानाऽस्ति, तादृश्या श्रेष्ठायाः केवलश्रियः परिचये रसिकः प्रभुः। एतादृशं वर्धमानं जिनेन्द्रं भजामः।

**यशो.: सिद्धान्तसुधास्वादी परिचितचिन्तामणिर्नयोल्लासी ।**
**तत्त्वविवेकं कुरुते न्यायाचार्यो यशोविजयः ॥२॥**

**चन्द्र.:** अधुना द्वितीया टीकागाथा- **सिद्धान्त** इत्यादि। स्पष्टा । नवरं **परिचितः चिन्तामणिः**

गंगेशोपाध्यायविरचित: तत्त्वचिन्तामणिनामको नव्यन्यायग्रन्थो येन स इति।

अत्र 'सिद्धान्तसुधास्वादी, परिचितचिन्तामणि:, नयोल्लासी' इति पदत्रयेण स्वस्य तत्त्वविवेककरणसामर्थ्यं आविर्भावितम्। यत: सिद्धान्तबोधं विना, नव्यन्यायस्य सूक्ष्मबोधं विना, नयविवेचनां विना वा कूपदृष्टान्तात्मकस्य गहनतत्त्वस्य विवेक: प्रायो दु:शक एवेति। एतच्च ग्रन्थाभ्यासेनैव भविष्यत्यनुभव: सर्वेषामध्येतृणामिति।

**ननु** टीकाकृत् मूलकृच्च एक एव, कथं तर्हि टीकाकृत् यशोविजय: 'कुरुते न्यायाचार्यो यशोविजय:' इत्येवं निगदति ? कथं 'करोमि न्यायाचार्यो यशोविजय:' इत्येवं न कथयति ? इति चेत्,

'यद्यपि टीकाकृत् मूलकृच्च एक एव, तथापि टीकाकृत्त्वमूलकृत्त्वधर्मयो: भेद: स्पष्ट:, तमाश्रित्य धर्मीभेदोऽपि आश्रयितुं शक्यते, यथा 'टीकाकृत्त्वधर्मवान् मूलकृत्त्वधर्मवत्सकाशाद् भिन्न:' इति। एवं भेदमाश्रित्यैतन्निरूपणं न दुष्टमिति।

**यशो.: तत्रेमामिष्टदेवतानमस्कारपूर्वकं प्रतिज्ञागर्भां प्रथमगाथामाह -**

**चन्द्र.: तत्र** = तत्त्वविवेके कर्त्तव्ये सति

**इमां** = अनन्तरमेव प्रतिपादयिष्यमाणत्वेनासन्नां

**इष्टदेवतानमस्कारपूर्वकं** क्रियाविशेषणमिदम्। तथा च यथा इष्टदेवतानमस्कार: पूर्वं भवति, तथा **प्रतिज्ञागर्भां प्रथमगाथां आह** इति।

**यशो.: नमिऊण महावीरं, तियसिंदणमंसियं महाभागं ।**
**विसईकरेमि सम्मं, दव्वथए कुवदिट्ठंतं ।।१।।**

**चन्द्र.:** प्रथमगाथाया: संस्कृतछाया अन्वयश्च इत्थम् -

**→ त्रिदशेन्द्रनमस्यितं महाभागं महावीरं नत्वा ।**
**द्रव्यस्तवे कूपदृष्टान्तं सम्यक् विशदीकरोमि।। ←**

**यशो.: नत्वा महावीरं त्रिदशेन्द्रैर्नमस्कृतं, महाभागं** = महानुभावं, महती आभा = केवलज्ञानशोभा, तां गच्छति य:, स तथा तमिति वा। **विशदीकरोमि** = निश्चितप्रामाण्यकज्ञानविषयतया प्रदर्शयामि। **सम्यक्** = असम्भावनाविपरीतभावनानिरासेन, **द्रव्यस्तवे** स्वपरोपकारजनकत्वान्निर्दोषतया साध्ये इति शेष:। **कूपदृष्टान्तं** = अवटदृष्टान्तं, धूमवत्त्वाद्वह्निमत्तया साध्ये पर्वते महानसं दृष्टान्त इतिवदयं प्रयोग: ।

**चन्द्र.:** अधुना प्रथमगाथाया या टीका, तद्गतान् पदार्थान् स्पष्टीकरोमि।

**विशदीकरोमि** = निश्चितप्रामाण्यकज्ञानविषयतया प्रदर्शयामि ।

अयं भाव:-द्वौ जनौ गच्छत:, तत्र पुर:स्थितं वृक्षं दृष्ट्वा एकस्य भ्रमो भवति 'अयं पुरुष:',

अपरस्य सम्यग्ज्ञानं भवति 'अयं वृक्षः' इति। इत्थं तावद् द्वयोः ज्ञानं भवति। तदनन्तरं परस्परं कथयतः तौ। एकः कथयति 'पश्य, अग्रे पुरुषः' इति, द्वितीयः कथयति 'न स पुरुषः, किन्तु वृक्षः' इति।

अत्र द्वयोः शङ्का जाता 'किं मदीयं ज्ञानं सत्यं, उत अपरस्य'। अत्र हि ज्ञानं द्वयोरस्ति, किन्तु एकमपि ज्ञानं प्रमाणतया ( = सत्यतया) निश्चितं नास्ति।

तदैव पुरःस्थिते वस्तुनि पक्षिण उपविष्टाः, द्वाभ्यां ते दृष्टाः, ततश्च वृक्षज्ञानी वदति "वृक्षे एव पक्षिण उपविशन्ति, न तु पुरुषे, तस्मात् पुरःस्थितं वस्तु वृक्ष एव, न तु पुरुष इति मदीयं ज्ञानमेव प्रमाणं इति निश्चितं" इति।

इत्थं च निश्चितं प्रामाण्यं यस्य, तत् निश्चितप्रामाण्यकं, प्रकृते वृक्षज्ञानं, तस्य विषयस्तु वृक्षः, न तु पुरुष इति।

अधुना प्रकृतं उच्यते।

(१) 'द्रव्यस्तवः स्वपरोपकारजनकत्वात् निर्दोषः कूपदृष्टान्तात्' इत्यस्माकं ज्ञानं

(२) 'द्रव्यस्तवः स्वरूपहिंसायुक्तत्वात्किंचित्सदोषमपि गुणकरं कूपदृष्टान्तात्' इत्यपरेषां ज्ञानम्।

तत्र कस्मिन्ज्ञाने प्रामाण्यं इति निश्चितं कर्त्तव्यम्। एतदेवाह महोपाध्यायाः → "यस्मिन्ज्ञाने प्रामाण्यं निश्चितं, तादृशज्ञानस्य विषयतया कूपदृष्टान्तं प्रदर्शयामि" ← इति।

तत्र प्रथममेव ज्ञानं निश्चितप्रामाण्यकं, न तु द्वितीयं, तस्यैव च विषयतया कूपदृष्टान्तः प्रदर्शयिष्यते महोपाध्यायैः इति।

**सम्यक्** = असम्भावनाविपरीतभावनानिरासेन इति।

येन कूपदृष्टान्तविशदीकरणेन श्रोतुः कूपदृष्टान्तस्य ज्ञानमेव न भवेत्,

तद् विशदीकरणं असम्भावनात्मकं असम्यक्।

येन कूपदृष्टान्तविशदीकरणेन श्रोतुः कूपदृष्टान्तस्य विपरीतं ज्ञानं भवेत्,

तद् विशदीकरणं विपरीतभावनात्मकं असम्यक्।

येन कूपदृष्टान्तविशदीकरणेन श्रोतुः कूपदृष्टान्तस्य अज्ञानविपरीतज्ञानयोः निरासेन ज्ञानं भवेत्, तद् विशदीकरणं सम्यक् इति।

अत्रासम्भावनास्वरूपं चेत्थं → यथा कश्चिद् गोलक्षणं वदति 'पञ्चपादवत्त्वं गोत्वं' इति। अनेन प्रतिपादनेन श्रोतुः एकस्या अपि गोः ज्ञानं न सम्भवति, पञ्चपादवत्त्वस्य एकस्यामपि गवि अभावात्। तथा चेदं प्रतिपादनं असम्भावनादोषदुष्टम्।

विपरीतभावनास्वरूपं चेत्थं → यथा कश्चिद् गोलक्षणं वदति "शृंगवत्त्वं गोत्वं" इति। अनेन प्रतिपादनेन श्रोतुः यद्यपि गवि गोत्वज्ञानं सम्भवति, सर्वासां गवां शृंगवत्त्वात्, ततश्च अत्र असम्भावना नास्ति, किन्तु महिषादिष्वपि गोत्वज्ञानं सम्भवति, तेषामपि शृंगवत्त्वात्, तथा चात्र अतिव्याप्तिरूपविपरीतज्ञानं भवति।

एवं 'श्यामरूपवत्त्वं गोत्वं' इति प्रतिपादनेन श्यामरूपवत्यां गवि गोत्वज्ञानं सम्भवति, किन्तु

रक्तादिरूपवत्यां गवि न सम्भवति, तथा च रक्तादिगवि अपि 'इयं न गौः, श्यामरूपाभावात्' इत्यादि विपरीतज्ञानं भवति।

प्रस्तुते कूपदृष्टान्तस्य अज्ञानं विपरीतज्ञानं वा यथा न स्यात्, तथैव तस्य विशदीकरणं प्रदर्शयिष्यते महोपाध्यायैः इति भावः।

**ननु** यत्र पक्षः साध्यो हेतुश्च भवन्ति, तत्र हेतोः सकाशात्साध्यं पक्षे साधयितुं व्याप्तिस्थानभूतो दृष्टान्तः प्रतिपाद्यते। प्रकृते तु 'द्रव्यस्तवे' इति पदेन केवलं पक्ष एव प्रतिपादितः, ततश्च को हेतुः कश्च साध्यः? इति न ज्ञायत इत्यत आह –

**स्वपरोपकारजनकत्वान्निर्दोषतया साध्ये इति शेषः** इति।

तथा चानुमानमिदम् –

द्रव्यस्तवः निर्दोषः स्वपरोपकारजनकत्वात्, कूपखननवत् ।

अत्र द्रव्यस्तवः पक्षः,

निर्दोषत्वं साध्यं,

स्वपरोपकारजनकत्वं हेतुः,

कूपखननं दृष्टान्त इति।

**ननु** एतादृशः प्रयोगः कुत्र प्रसिद्धः, यदनुसारेण प्रकृतः प्रयोगः सम्यगवगम्यते? इति जिज्ञासायां प्रकृतप्रयोगबोधार्थं प्रसिद्धं प्रयोगान्तरमाह – **धूमवत्त्वाद् वह्निमत्तया साध्ये** इत्यादि।

तथा च –

यथा पर्वतो वह्निमान् धूमवत्त्वात् महानसवत् इति प्रयोगः क्रियते, तथैवायं प्रयोगो दृष्टव्य इति।

**ननु** गाथायां **सम्यग्** पदं यदि न गृह्यते, तर्हि को दोषः, विशदीकरणमेव ग्राह्यम्, तत् सम्यग् मिथ्या वा केनापि प्रकारेण भवतु इति चेत् तर्हि सिद्धसेनब्राह्मणवन्मूर्खशेखरो भविष्यसि। तेन हि गोपालानां पुरतः पदार्थानां विशदीकरणं कृतं, किन्तु अज्ञानिनां गोपालानां तु तत्र संस्कृतभाषाया एवाज्ञानात् सर्वं निरर्थकमेव सञ्जातम्। एवं दिगम्बरमतप्रस्थापकेन श्रोतॄणां समक्षं तथा स्वपदार्थानां विशदीकरणं कृतं, यथा तेषां विपरीतेऽपि ज्ञाने प्रामाण्यं निश्चितमभवत्। न च तेषां तादृशं ज्ञानं हितकारि, ततश्च ते विपरीते ज्ञाने प्रामाण्यं निश्चित्याधिकतरं दोषभागिनोऽभवन्।

तस्मात् असम्भावनाविपरीतभावनानिरासेनैव सत्यज्ञाने एव प्रामाण्यनिश्चयो युक्तः, ततश्च सम्यक्पदग्रहणं युक्तमेव।

**यशो.:** अत्र च भगवतश्चत्वारो मूलातिशयाः प्रतिपादिताः । तथाहि – महावीरमित्यनेन –

विदारयति यत्कर्म, तपसा च विराजते ।
तपोवीर्येण युक्तश्च, तस्माद्वीर इति स्मृतः ।।१।। इति

इति निरुक्तात्सकलापायमूलभूतकर्मविदारणक्षमतपोवीर्यविराजमानत्वाभिधानादपायापगमातिशयः १, त्रिदशेन्द्रनमस्कृतमित्यनेन पूजातिशयः २, महाभागमित्यनेन ज्ञानातिशयः प्रतिपादितः ३, वचनातिशयश्च सामर्थ्यगम्य इति ४ ॥१॥

**चन्द्र.: ननु** ग्रन्थारम्भे भगवतोऽतिशयाः प्रतिपाद्यन्त इति ग्रन्थेषु दृश्यते। प्रकृतग्रन्थे तु ते किमर्थं न प्रतिपादिताः इति चेत् प्रतिपादिता एव। एतदेवाह **अत्र च**.... इत्यादि।

**ननु** अस्माभिर्न दृश्यत इति चेत् दर्शयामि।

**तथाहि** इत्यादि।

अत्र → महावीरमित्यनेन.. अपायापगमातिशयः प्रतिपादितः ← इत्येवं अन्वयः कार्यः।

**ननु** 'महावीरम्' इति पदेन अपायापगमातिशयप्रतिपादनं कथं भवति ? इति चेत् इत्थं,

यस्मात्कारणात् स कर्म विदारयति, यस्माच्च कारणात् तपसा विराजते। यस्माच्च कारणात् तपोवीर्येण युक्तः, तस्मात् स 'वीरः' इति स्मृतः।

इदं च वीरपदस्य निरुक्तं अस्ति, अस्माच्च निरुक्तात् सकलापायमूलभूतानां कर्मणां विदारणे क्षमं यत् तपोवीर्यं, तेन विराजमानत्वस्याभिधानं भवति, कर्मविदारणं च अपायापगम एवेति अपायापगमातिशयो महावीरपदेन प्रतिपादित इति।

**ननु** किं नाम निरुक्तं, किं च व्युत्पत्तिरिति चेत्,

अक्षरप्राधान्यमङ्गीकृत्य व्याकरणं गौणीकृत्य योऽर्थः तन्निरुक्तम्।

व्याकरणानुसारेण योऽर्थः, सा व्युत्पत्तिरिति सङ्क्षेपार्थः।

यथा 'श्रावकः' इति पदस्य श्रद्धावान् इति श्रा, विवेकवान् इति व, क्रियावान् इति कः, ततश्च श्रद्धाविवेकक्रियावान् श्रावक उच्यते। अत्र अक्षरप्राधान्यमेवाङ्गीकृत्यार्थो गृह्यते, ततश्चेदं निरुक्तम्।

'श्रुणोतीति श्रावक' इति तु पदं व्याकरणानुसारेणेति सा व्युत्पत्तिः।

प्रकृते तु वीरपदे यौ वी र इति द्वौ अक्षरौ, तौ विदारयति इति पदे वर्तेते, विराजते इति पदे च वर्तेते, ततश्च तौ प्रधानीकृत्य कर्मविदारणाद् वीरः, तपोवीर्येण विराजनाद् वीर इति निरुक्तं गृहीतम्।

**त्रिदशेन्द्र**.... इत्यादि।

**महाभागम् इत्यनेन ज्ञानातिशयः**.... इत्यादि। 'महती आभा = केवलज्ञानशोभा, तां गच्छतीति महाभागः, तं' इत्येवं यः समासः कृतः, तत्र केवलज्ञानग्रहणात् ज्ञानातिशयप्रतिपादनं भवत्येवेति।

**ननु** वचनातिशयो न प्रतिपादित इति चेत् **वचनातिशयश्च सामर्थ्यगम्य इति।** अर्थापत्त्या गम्य इति। यस्य हि त्रयोऽतिशया भवन्ति, तस्य चतुर्थो भवत्येवेति एवमर्थापत्त्या स अवगम्यते।

एवं तावत्प्रथमगाथावृत्तिर्व्याख्याता ।

**यशो.:** प्रतिज्ञातमेवाह –

सपरोवयारजणगं जणाण, जह कूवखणणमाइट्ठं ।
अकसिणपवत्तगाणं तह, दव्वथओ वि विण्णेओ ॥२॥

**चन्द्र.: प्रतिज्ञातमेव** = कूपदृष्टान्तस्य सम्यग्विशदीकरणमेव प्रथमगाथायां प्रतिज्ञातं, ततश्च तदेव, न त्वन्यत्।

द्वितीयगाथायाः संस्कृतछाया अन्वयार्थश्चायम् –

**→ यथा जनानां कूपखननं स्वपरोपकारजनकं आदिष्टम्।**

**तथा द्रव्यस्तवोऽपि अकृत्स्नप्रवर्तकानां (स्वपरोपकारजनकः) विज्ञेयः ।।२।।**

**यशो.: यथा जनानां कूपखननं निर्मलजलोत्पादनद्वारा स्वपरोपकारजनकमादिष्टम्, एवं अकृत्स्नप्रवर्त्तकानां = कृत्स्नसंयमेऽप्रवृत्तिमतां गृहिणां द्रव्यस्तवोऽपि = स्नानपूजादिकः करणानुमोदनद्वारेण स्वपरयोः पुण्यकारणं विज्ञेयः।**

**चन्द्र.:** अधुना टीका विव्रीयते ।

**अकृत्स्नप्रवर्तकानां = कृत्स्नसंयमेऽप्रवृत्तिमतां** कृत्स्नसंयमो नाम सर्वविरतिः, तत्र प्रवृत्तिरहितानामित्यर्थः।

**द्रव्यस्तवोऽपि** = आस्तां तावत्सामायिकादिरूपं निरवद्यानुष्ठानं पुण्यकारणं, किन्तु जलपुष्पादिविराधनामयोऽपि द्रव्यस्तवः पुण्यकारणमित्यपिशब्दार्थः।

द्रव्यस्तवः किंस्वरूपः ? इत्याह **स्नानपूजादिक** इति।

स कथं पुण्यकारणं ? इत्याह करणानुमोदनद्वारेण इति। **स्वपरयोः** इति। स स्वयं द्रव्यस्तवं करोति इति द्रव्यस्तवः स्वस्य करणद्वारेण पुण्यकारणम्। स्वं कुर्वन्तं दृष्ट्वा परोऽनुमोदयति यथा 'अहो !शोभना पूजा क्रियतेऽनेन' इत्यादि। ततश्च स्वकृतो द्रव्यस्तवः परस्यानुमोदनद्वारेण पुण्यकारणमित्यर्थः।

स्पष्टान्वयस्त्वेवम् –

गृहिणां स्नानपूजादिको द्रव्यस्तवः करणद्वारेण स्वस्य पुण्यकारणम्,

गृहिणां स्नानपूजादिको द्रव्यस्तवः अनुमोदनद्वारेण परस्य पुण्यकारणम् इति।

**यशो.: दृष्टान्ते उपकारो द्रव्यात्मा, दार्ष्टान्तिके च भावात्मेति भावः।**

**चन्द्र.:** ननु 'गृहिणां द्रव्यस्तवः स्वपरोपकारजनकः कूपखननवद्' इत्यत्र कूपखनने जलप्राप्तिप्रभृतिरूप उपकारः, द्रव्यस्तवात्मके पक्षे तु पुण्यबन्धादिरूप उपकार इति उपकाररूपं साध्यं विभिन्नमस्ति, न चैतद्युक्तम्, किन्तु दृष्टान्ते पक्षे च साध्यमेकमेव भवितुमर्हति। यथा 'पर्वतो वह्निमान् धूमात् महानसवत्' इत्यत्र दृष्टान्ते महानसे पक्षे च पर्वते वह्निरेव साध्यः, न तु पृथग् द्वे वस्तुनि इति शङ्कायामाह **दृष्टान्त...** इत्यादि।

तथा च यथा महानसे महानसीयो वह्निरस्ति, पर्वते तु पर्वतीयः, इति उभयत्र भिन्न एव वह्निः, तथाऽपि वह्नित्वेन धर्मेण स समानः। एवमत्रापि कूपखनने जलप्राप्त्यादिरूपो द्रव्योपकारः, द्रव्यस्तवे तु पुण्यबन्धादिरूपो भावोपकार इत्येवं उभयत्र भिन्न एव उपकारः, तथापि उपकारत्वेन धर्मेण स समान एवेति प्रकृतानुमाने न कोऽपि दोष इति।

इदमत्रावधेयम् –

'द्रव्यस्तवो निर्दोषः स्वपरोपकारजनकत्वात् कूपखननवत्' इत्येतादृशमेव अनुमानं निगदितमस्ति, न तु 'द्रव्यस्तवो हिंसादियुक्तत्वात्किञ्चिद्दोषयुक्तोऽपि गुणकरः स्वपरोपकारजनकत्वात् कूपखननवत्' इत्यादिरूपम्। एष एव च महान् भेदः प्रकृतग्रन्थ इति।

❁ ❁ ❁

**यशो.: नन्वियं योजनाऽभयदेवसूरिणैव (चतुर्थ)पञ्चाशकवृत्तौ दूषिताऽन्यथायोजना च कृता। तथाहि -**

''ण्हाणाइवि जयणाए, आरंभवओ गुणाय णियमेणं ।
सुहभावहेउओ खलु विण्णेयं कूवणाएणं'' ।।१०।।

**स्नानाद्यपि** = देहशौचप्रभृतिकमपि आस्तां पूजार्चादि, आदिशब्दाद्विलेपनादिग्रहः, गुणायेति योगः, **यतनया** = रक्षयितुं शक्यजीवरक्षणरूपया। तत्किं साधोरपीत्याशङ्क्याह **आरम्भवतः** = स्वजनधनगेहादिनिमित्तं कृष्यादिकर्मभिः पृथिव्यादिजीवोपमर्दयुक्तस्य गृहिण इत्यर्थः, न पुनः साधोः, तस्य सर्वसावद्ययोगविरतत्वाद् भावस्तवारूढत्वाच्च। भावस्तवारूढस्य हि स्नानादिपूर्वकद्रव्यस्तवोऽनादेय एव, भावस्तवार्थमेव तस्याश्रयणीयत्वात्, तस्य च स्वत एव सिद्धत्वात्। इमं चार्थं प्रकरणान्तरे स्वयमेव वक्ष्यतीति। **गुणाय** = पुण्यबन्धलक्षणोपकाराय, **नियमेन**=अवश्यम्भावेन।

**चन्द्र.:** एवं तावत्स्वमतं प्रदर्श्याधुना पूर्वपक्षं प्रदर्शयति – **ननु** इत्यादिना।

**इयं योजना** = 'द्रव्यस्तवो निर्दोषः स्वपरोपकारजनकत्वात् कूपखननवत्' इत्येवंरूपा कूपदृष्टान्तयोजना **अभयदेवसूरिणैव** = भवतामपि बहुमान्येनैव, न तु येन केनचित् इत्येवकारार्थः, **पञ्चाशकवृत्तौ दूषिता** = दोषयुक्ता प्रतिपादिता, **अन्यथायोजना च** = भवदुक्तप्रकारादन्येन प्रकारेण कूपदृष्टान्तघटना च **कृता**।

हे महोपाध्याय ! भवान् यथा कूपदृष्टान्तं प्रतिपादयति तथा प्रतिपाद्यमानं तु भवत्पूज्येनैवाभयदेवसूरिणा खण्डितम्, अन्येन च प्रकारेण तत्प्रतिपादनं कृतमिति।

पूर्वपक्षः स्वमतसमर्थनार्थं पञ्चाशकवृत्तिपाठं दर्शयति–**तथा हि ण्हाणाइ वि** इत्यादि।

गाथाया अन्वयस्त्वेवम् → आरम्भवतः स्नानाद्यपि शुभभावहेतुत्वात् कूपज्ञातेन नियमेन गुणाय विज्ञेयं खलु ← इति।

तदर्थस्तु तट्टीकातः स्पष्टो ज्ञायत एव, तथापि किञ्चिदुच्यते इति। जिनबिम्बपूजा तावत् गुणाय

भवत्येव, किन्तु तदर्थं गृहस्था यत् स्वदेहशौचप्रभृतिकं कुर्वन्ति, तदपि गुणायैव इति '**स्नानाद्यपि**' इति अत्र विद्यमानस्य '**अपि**' शब्दस्यार्थः।

**आदिशब्दात्** इत्यादि। स्नानाद्यपि इत्यत्र यत् आदिपदं, तस्मात् विलेपनादि ग्राह्यम्। अर्थात् श्रावकाः स्वदेहे यत् विलेपनादि कुर्वन्ति, तदपि गुणायैवेति।

केन प्रकारेण क्रियमाणं स्नानादि गुणाय? इत्याह **यतनया = रक्षयितुं शक्यजीवरक्षणरूपया** इति। अयं भावः – स्नाने तावत् जघन्यतो यावज्जलं आवश्यकं, तावज्जलातिरिक्तजलत्यागो यतना। किन्तु तावज्जलस्यापि त्यागो न कर्त्तव्यः, स्नानासम्भवेन पूजादेरपि असम्भवप्रसङ्गात्। तथा च स्नानार्थं आवश्यकं जलं रक्षयितुं अशक्यं, तदधिकं तु जलं रक्षयितुं शक्यं, ततश्च यदि तस्य त्यागः क्रियते, तर्हि यतना कृता भवति। तया क्रियमाणं स्नानादि गुणाय।

**तस्य सर्वसावद्ययोगविरतत्वात्।** साधुः सर्वेभ्यः सावद्ययोगेभ्यो विरतोऽस्ति, स्नानादि च सावद्ययोगः, ततश्च साधोः तत्कर्तुं न कल्पत इति भावः।

**ननु** नद्युत्तरणादिकं अपि सावद्ययोगः, तथाऽपि साधुः विशेषलाभार्थं तदाचरत्येव, एवं स्नानाद्यपि किमर्थं नाचरेत्? तत्रापि विशेषलाभो भविष्यत्येवेत्यतः अभयदेवसूरयो युक्त्यन्तरमाह – **भावस्तवारूढत्वाच्च** = भावस्तवो नाम सर्वविरतिः, भावप्रधानः स्तवो भावस्तव इति, साधुश्च तमारूढ इति स द्रव्यस्तवरूपं स्नानादि नाचरतीति।

**ननु** भवतु नाम साधुर्भावस्तवारूढः, तथाऽपि तस्य द्रव्यस्तवकरणे को दोषः, द्वौ अपि स्तवौ शोभनौ, तर्हि द्वावपि कुर्यात्साधुरित्याशङ्कायां स्पष्टीकुर्वन्नाह – **भावस्तवारूढस्य हि** इत्यादि।

**ननु** किमर्थं साधोः स्नानादिपूर्वकद्रव्यस्तवोऽनादेय एव? इत्याऽऽशङ्कायां आह–**भावस्तवार्थमेव तस्याश्रयणीयत्वात्** इति।

**ननु** सत्यं, भावस्तवार्थमेव द्रव्यस्तव आदरणीयः, कोऽत्र निषिध्यति? साधुरपि भावस्तवार्थमेव द्रव्यस्तवं किमर्थं नाचरेत्? इति प्रश्ने सत्याह **तस्य च स्वत एव सिद्धत्वात्।** भावस्तवो हि सुसाधोः न साधनीयः, येन तत्साधनार्थं द्रव्यस्तवाचरणं कर्त्तव्यं भवेत्, किन्तु तस्य भावस्तवः स्वत एव = द्रव्यस्तवं विनैव सिद्ध एव, ततश्च निरर्थकमेव तस्य द्रव्यस्तवाचरणमिति।

औषधकल्पो हि द्रव्यस्तवः, कुटुम्बाद्यर्थं सावद्ययोगा हि रोगकल्पाः, सर्वविरतिस्तु नीरोगावस्थासदृशी। ततश्च रोगिणो औषधग्रहणं नीरोगावस्थार्थं युक्तमेव। किन्तु साधुस्तु स्वयं नीरोग एवास्ति, ततश्च स किमर्थं औषधग्रहणं कुर्यात्?

शिखरारोहणार्थं सोपानपङ्क्तिरावश्यिकी, शिखरारूढस्य तु सा निष्प्रयोजनैव। एवमेव भावस्तवारोहणार्थं द्रव्यस्तवो युक्तः, भावस्तवारूढस्य तु स निरर्थक एव। एवं अन्येऽपि दृष्टान्ताः स्वयमभ्युह्याः।

**यशो.: अथ कथं स्वरूपेण सदोषमप्यारम्भिणो गुणायेत्याह- 'सुहभावहेउओ'त्ति लुप्तभावप्रत्ययत्वेन निर्देशस्य, शुभभावहेतुत्वात् = प्रशस्तभावनिबन्धनत्वाज्जिनपूजार्थस्नानादेः,**

**चन्द्र.: लुप्तभावप्रत्ययत्वेन निर्देशस्य** इति। पञ्चाशकगाथायां **सुहभावहेउओ** इति निर्देशोऽस्ति। ततश्च 'शुभभावहेतुतः' इति हेतुर्भवति। स च न युक्तः, अतो वृत्तिकारेणोक्तं प्रकृतनिर्देशे 'त्व' रूपो भावप्रत्ययो लुप्तो दृष्टव्यः, ततश्च 'शुभभावहेतुत्वतः' इत्येवं हेतुर्भवति। तथा च → आरम्भवतो यतनया स्नानादि गुणकरं शुभभावहेतुत्वात् ← इत्यनुमानमापन्नम्।

ननु निर्देशो लुप्तभावप्रत्ययो किमर्थं गृह्यते, इति चेत् अनुमानप्रयोगे हेतुः पक्षे विद्यत इति नियमः। यदि च 'शुभभावहेतुतः' इति हेतुः गृह्यते, तर्हि स्नानादिरूपः पक्ष एव शुभभावहेतुरस्ति। न तु स्नानादिरूपे पक्षे शुभभावहेतुः विद्यत इति पक्षे हेत्वभावरूपः स्वरूपासिद्धिर्दोष आपद्यते। तस्मात् अत्र निर्देशो लुप्तभावप्रत्ययो गृहीतः। शुभभावहेतुत्वं तु स्नानादिरूपे पक्षे विद्यत एवेति स्वरूपासिद्धिर्न भवति।

पूजार्थस्नानादि शुभभावहेतुरस्ति,
ततः पूजार्थस्नानादौ शुभभावहेतुत्वमस्ति,
किन्तु पूजार्थस्नानादौ शुभभावहेतुर्नास्ति,
तस्मात् निर्देशो लुप्तभावप्रत्ययो गृहीत इति सारः।

**यशो.: अनुभवन्ति च केचित्स्नानपूर्वकं जिनार्चनं विदधानाः शुभभावमिति। खलुर्वाक्यालङ्कारे, विज्ञेयं = ज्ञातव्यम्। अथ गुणकरत्वमस्य शुभभावहेतुत्वात्कथमिव ज्ञेयमित्याह-कूपज्ञातेन = अवटोदाहरणेन।**

**चन्द्र.:** ननु स्नानादिकं शुभभावहेतुर्भवति इत्येतदसङ्गतमिति शङ्कायामाह-**अनुभवन्ति च केचित्....** स्नानं विना जिनार्चने यादृशो भावः, तदधिकं भावं स्नानपूर्वकं जिनार्चनं विदधानाः केचिदनुभवन्तीति स्नानादिकस्य शुभभावहेतुत्वं सिद्धम्।

**यशो.:** इह चैवं साधनप्रयोगः 'गुणकरमधिकारिणः किञ्चित्सदोषमपि स्नानादि, विशिष्टशुभभावहेतुत्वाद्, यद् विशिष्टशुभभावहेतुभूतं तद् गुणकरं दृष्टं यथा कूपखननं, विशिष्टशुभभावहेतुश्च यतनया स्नानादि, ततो गुणकरमि'ति। कूपखननपक्षे शुभभावः तृष्णादिव्युदासेनाऽऽनन्दाद्यवाप्तिरिति।

**चन्द्र.: साधनप्रयोगः** = अनुमानप्रयोगः,

**गुणकरमित्यादि।**

अधिकारिणः किञ्चित्सदोषमपि स्नानादि इति पक्षः।

गुणकरम् = पुण्यबन्धकारणम् इति साध्यनिर्देशः, साध्यं तु गुणकरत्वम्

शुभभावहेतुत्वात् इति हेतुनिर्देशः, हेतुस्तु शुभभावहेतुत्वम्।

कूपखननवत् इति दृष्टान्तनिर्देशः, दृष्टान्तस्तु कूपखननम्।

**ननु** कूपखननं शुभभावहेतुः कथं भवति? न हि तत्र कोऽपि शुभो भावोऽनुभूयत इति चेत् न, **कूपखननपक्षे** इत्यादि। तथा च तृष्णापगमेन तृप्तिप्राप्तिरेव तत्र शुभभाव इति।

**यशो.: इदमुक्तं भवति-यथा कूपखननं श्रमतृष्णाकर्दमोपलेपादिदोषदुष्टमपि जलोत्पत्तावनन्तरोक्तदोषानपोह्य स्वोपकाराय परोपकाराय च भवत्येवं स्नानादिकमप्यारम्भदोषमपोह्य शुभाध्यवसायोत्पादनेन विशिष्टाशुभकर्मनिर्जरणपुण्यबन्धकारणं भवतीति।**

**चन्द्र.:** निष्कर्षमाह – **इदमुक्तं भवति** इत्यादि।

इत्थं च कूपखननं सर्वथा निर्दोषं नास्त्येव, किन्तु किञ्चिद्दोषदुष्टमपि तत् अधिकलाभकारि इति कृत्वोपादेयम्। एवमेव जिनपूजादिकमपि सर्वथा निर्दोषं नास्त्येव, किन्तु किञ्चिदारम्भादिदोषदुष्टमपि तत् अधिकलाभकारि इति कृत्वा उपादेयमिति भावः।

**यशो.: इह केचिन्मन्यन्ते पूजार्थस्नानादिकरणकालेऽपि निर्मलजलकल्पशुभाध्यवसायस्य विद्यमानत्वेन कर्दमलेपादिकल्पपापाभावाद्विषममिदमुदाहरणम्, ततः किलेदमित्थं योजनीयं, यथा कूपखननं स्वपरोपकाराय भवत्येवं स्नानपूजादिकं करणानुमोदनद्वारेण स्वपरयोः पुण्यकारणं स्यादिति।**

**चन्द्र.:** एवं तावदभयदेवसूरिणा पञ्चाशकवृत्तौ स्वाभिप्रायः प्रदर्शितः। अधुना केषाञ्चिन्मतं दूषयितुं प्रथमं तन्मतं प्रदर्शयति – **इह केचिन्मन्यन्ते** इत्यादि।

अयं अभिप्रायः, कूपखननकाले श्रमस्तृष्णाकर्दमोपलेपश्चेत्येवमादयो दोषा भवन्ति, एवमेव जिनपूजार्थस्नानादिकाले जलपुष्पादिविराधनादयो दोषा भवन्ति। किन्तु कूपखननानन्तरं यदा जलोत्पत्तिर्भवति, तदा श्रमादयो दोषास्तेन जलेनैवापनीयते। एवं जिनपूजार्थस्नानाद्यनन्तरं चैत्यवन्दनकाले शुभभावोत्पत्तिर्भवति यदा, तदा जलपुष्पादिविराधनाजन्यपापकर्मणः क्षयः पुण्यबन्धश्च भवतीत्येवं जिनपूजार्थस्नानादिकं कूपखननं इव उपादेयमिति अभयदेवसूरिभिः कूपदृष्टान्तो योज्यते। परन्तु स न घटते।

किमर्थं न घटते? इति चेत्, इत्थं न घटते,

कूपखननकाले जलं नास्ति, तदनन्तरं जलमस्ति। ततश्च तत्र कूपखननकाले श्रमादयो दोषा अवश्यंभाविनः। परन्तु जिनपूजार्थस्नानादिकाले तु जलसदृशः शुभभावो विद्यत एव। न हि एतद् वक्तुं शक्यते यदुत → श्रावकः स्नानकाले जलपुष्पादिपूजाकाले च शुभभावरहितः, तदनन्तरमेव च शुभभावसहितः ← इति। किन्तु जिनपूजार्थस्नानकाले जलपुष्पादिपूजाकाले तदनन्तरं चैत्यवन्दनकाले च सर्वत्र श्रावकस्य शुभभावो विद्यते, ततः कथं पापकर्मबन्धादयो दोषा भवेयुः?

तस्मात् यथाऽभयदेवसूरिणा कूपदृष्टान्तो योजितः, तथा न योज्यः।

**ननु** तर्हि स दृष्टान्तः कथं योजनीयः, शास्त्रोक्त इति कृत्वा तद्योजनं तु आवश्यकमेवेति चेत् सत्यम्। **ततः किलेदमित्थं योजनीयम्** इत्यादि स्पष्टम्।

अत्र केषाञ्चिन्मतं समाप्तम्। नवरं सुखावबोधाय वृत्तिगतवाक्यानां भावार्थः प्रतिपाद्यते।

आस्तां चैत्यवन्दनकाले, पूजार्थस्नानादिकालेऽपि निर्मलजलकल्पः शुभाध्यवसायो विद्यमान एव, ततश्च तत्र कर्दमलेपादिकल्पस्य पापस्याभावो भवति, ततश्च **इदं** = कूपखननं **उदाहरणं विषमम्** = सम्यगुपमौपमेयभावरहितम्।

कूपखननकाले जलाभावात् कर्दमलेपादि सम्भवि, परन्तु कूपखननसदृशस्नानादिकाले जलकल्पस्य शुभभावस्याभावो नास्ति, ततश्च तत्र कर्दमलेपादिसदृशपापकर्मबन्धो नास्त्येवेति। तत इदमुदाहरणं विषममिति।

ततश्च प्रथमं दोषाः, पश्चात् दोषनिवारणमधिकलाभश्चेत्येवं न, किन्तु केवलं एतावदेव यदुत यथा कूपखननं स्वपरोपकाराय भवति, एवं स्नानपूजादिकं करणद्वारेण स्वस्य अनुमोदनद्वारेण च परस्योपकाराय भवतीति।

**यशो.: न चैतदागमानुपाति, यतो धर्मार्थप्रवृत्तावप्यारम्भजनितस्याल्पस्य पापस्येष्टवात्,**

**चन्द्र.:** अधुनाऽभयदेवसूरयः केषाञ्चिन्मतं पञ्चाशकवृत्तौ दूषयन्ति – **न चैतदागमानुपाति। एतद्** = केषाञ्चिन्मतं **आगमानुपाति** = आगमानुसारि, अपि तु आगमविरोधि इति भावः।

**ननु** किमर्थं एतद् आगमविरोधि ? इत्यत आह – **यतः** = यस्मात् कारणात् **धर्मार्थप्रवृत्तावपि** = आस्तां तावत्कुटुम्बाद्यर्थं हिंसादिप्रवृत्तौ, किन्तु धर्मार्थं या हिंसादिप्रवृत्तिः, तत्रापि **आरम्भजनितस्य** = हिंसादिजनितस्य **अल्पस्य** = निर्जरापुण्यबन्धाऽपेक्षया हीनस्य **पापस्य** = पापकर्मबन्धस्य **इष्टत्वात्** = शास्त्रोक्तत्वात्।

शास्त्रे निगदितं यदुत "धर्मार्थं या प्रवृत्तिः क्रियते, तत्रापि हिंसादिजन्योऽल्पः पापबन्धस्तु भवत्येव, न तु सर्वथा पापकर्मबन्धाभावः" इति। केषाञ्चिन्मतं तु धर्मार्थं हिंसादिप्रवृत्तौ शुभभावसत्त्वे स्वल्पमपि पापकर्मबन्धं न मन्यत इति तेषां मतं शास्त्रविरोधि।

**यशो.: कथमन्यथा भगवत्यामुक्तं 'तहारूवं समणं वा माहणं वा पडिहयपच्चक्खायपावकम्मं अफासुएणं अणेसणिज्जेणं असणपाणखाइमसाइमेणं पडिलाभेमाणे भंते! किं कज्जइ? गोयमा! अप्पे पावे कम्मे बहुतरया से णिज्जरा कज्जइ'।**

**चन्द्र.: ननु** अभयदेवसूरयः ! शास्त्रे 'धर्मार्थप्रवृत्तावपि स्वल्पः पापबन्ध इष्टः' इति भवता यदुच्यते, तत्केन शास्त्रेणोच्यते ? न कस्मिन्नपि शास्त्रे एतदुक्तं अस्ति। ततश्च केषाञ्चिन्मत युक्तमेवेत्यत आह– **कथमन्यथा** इत्यादि।

**अन्यथा** = यदि हि धर्मार्थप्रवृत्तावपि आरम्भजनितोऽल्पः पापबन्ध इष्टो न स्यात्, किन्तु केषाञ्चिन्मतानुसारेण सर्वथा पापबन्धाभाव एवेष्टः स्यात्, तर्हि -

**तहारूवं समणं वा माहणं वा पडिहयपच्चक्खायपावकम्मं = तथास्वरूपं श्रमणं** = तपस्विनं **माहनं** = 'मा हन कमपि जीवं' इतिवदनस्वभावं **प्रतिहतप्रत्याख्यातपापकर्माणं** = निन्दागर्हादिद्वारेण प्राग्बद्धानि **प्रतिहतानि**, अकरणनियमद्वारेण च अनागतानि **प्रत्याख्यातानि** पापकर्माणि येन स, तम्, सुसाधुमित्यर्थः।

**अफासुएणं** = सचित्तेन।

**अणेसणिज्जेणं** = आधाकर्मादिदोषयुक्तेन।

**असणेत्यादि** स्पष्टम्।

**पडिलाभेमाणे** = प्रतिलम्भयतः।

**किं कज्जइ** = किं भवति?

अयं प्रश्नार्थः → सुसाधुं सचित्तं आधाकर्मादिदोषयुक्तं वा ददानो गृहस्थः किं फलं प्राप्नोति ← इति

**गोयमेत्यादि** गौतम! अल्पः पापकर्मबन्धो भवति, अधिकतरा च तस्य निर्जरा भवति इति।

अत्र सुसाधवे अप्रासुकमनेषणीयं वा ददानस्य शुभभावस्तु विद्यत एव, तथाऽपि अप्रासुकादिदाने आरम्भदोषो भवत्येवेति शुभभावसत्त्वेऽपि आरम्भजन्यः स्वल्पः पापबन्धो भगवत्यां प्रतिपादित इति स्पष्टं दृश्यते।

एवमेव पूजार्थस्नानादिकं कर्तुः शुभभावस्तु विद्यत एव, तथाऽपि जलादिजीवारम्भदोषो भवत्येवेति शुभभावसत्त्वेऽपि आरम्भजन्यः स्वल्पः पापबन्धो भगवतीशास्त्राभिमत एवेति स्पष्टम्। केषाञ्चिन्मतं तु तत्र आरम्भसत्त्वेऽपि शुभभावसत्तामात्रेण तत्र सर्वथा पापबन्धाभावप्ररूपकमिति तत् शास्त्रविरोधि।

**यशो.:** तथा ग्लानप्रतिचरणानन्तरं पञ्चकल्याणकप्रायश्चित्तप्रतिपत्तिरपि कथं स्यात्? इत्यलं प्रसङ्गेनेति गाथार्थ इति'।

**चन्द्र.:** अभयदेवसूरय एव केषाञ्चिन्मतं दूषयितुं युक्त्यन्तरमाह - **तथा ग्लानप्रतिचरणेत्यादि। ग्लानप्रतिचरणानन्तरं** = ग्लानसेवां संपूर्णां कृत्वा **पञ्चकल्याणकप्रायश्चित्तप्रतिपत्तिरपि** = गीतार्थगम्यस्य पञ्चकल्याणकाभिधानकस्य प्रायश्चित्तस्य स्वीकारोऽपि **कथं स्यात्** = घटेत?

**अन्यथा** पदस्यार्थोऽत्रापि योज्यः।

ततश्च यदि शुभभावसत्त्वे आरम्भसत्त्वेऽपि सर्वथा पापकर्मबन्धाभाव एव स्यात्, तर्हि ग्लानसेवाऽनन्तरं ग्लानसेवको यां प्रायश्चित्तप्रतिपत्तिं करोति, सा कथं घटेत? नैव घटेतेति भावः।

ग्लानसेवको हि शुभभावपूर्वकमेव ग्लानसेवां करोति, तत्र च अनेषणीयादिदोषानपि सेवते, ततश्च शुभभावसत्त्वेऽपि आरम्भदोषजन्यः पापबन्धोऽस्तीति तत्क्षयार्थं तस्य प्रायश्चित्तं दीयते।

यदि तु केषाञ्चिन्मतानुसारेण शुभभावसत्त्वे आरम्भसत्त्वेऽपि पापबन्धो न भवेदेव, तर्हि ग्लानसेवकस्य पापबन्धो न स्यादेव, ग्लानसेवाकरणलक्षणस्य शुभभावस्य सततं सद्भावात्। ततश्च पापबन्धाभावादेव तस्य पापनाशाय प्रायश्चित्तप्रदानं निरर्थकं स्यात्। एवं च तस्य प्रायश्चित्तदानं विघटेत। किन्तु शास्त्रे व्यवहारे च तस्य प्रायश्चितं प्रदीयमानं दृश्यत एवेति केषाञ्चिन्मतं आगमविरोधि इति स्पष्टम्।

इत्थं च यदि केषाञ्चिन्मत्तं सत्यम्,तर्हि भगवतीसूत्रं ग्लानसेवकस्य प्रायश्चित्तदानं च असत्यम्। यदि च तद्द्वयं सत्यम्, तर्हि

केषाञ्चिन्मतं मिथ्या इति सारः इत्यलं प्रसङ्गेन । अत्र पञ्चाशकवृत्तिपाठः समाप्तः।

अयं च पाठो महोपाध्यायं प्रति पूर्वपक्षेण प्रदर्शितः। यतो महोपाध्यायप्रतिपादनं केषाञ्चिन्मतानुसारि अस्ति, अभयदेवसूरिवचनं तु केषाञ्चिन्मतविरोधि अस्ति। ततश्च 'किं महोपाध्याया अभयदेवसूरिवचनं न मन्यन्ते?' इति आशङ्का भवेदेव। सैवाशङ्का पूर्वपक्षेण 'नन्वियं योजनाऽभयदेवसूरिणैव' इत्यादिना प्रकटीकृता।

**यशो. : तदेतन्निह्नुवतां कूपदृष्टान्तविशदीकरणं काकपक्षविशदीकरणवदुपहासपात्रतामभिव्यनक्ति, स्वसम्मताभियुक्तवचनविरुद्धत्वादित्याशङ्कायां नाभियुक्तवचनविरोधो बोधोन्मुखानामवभासते, तस्य भिन्नतात्पर्यकत्वादित्याशयवानाह -**

**चन्द्र. :** एवं पञ्चाशकपाठं प्रदर्श्य पूर्वपक्षो महोपाध्याययशोविजयिनं दूषयति – **तदेतद् इत्यादि।**

**तत्** = पञ्चाशके प्रसिद्धं **एतत्** = अनन्तरमेव निगदितं तत्त्वं **निह्नुवतां** = अप्रकटीकुर्वतां भवतां **कूपदृष्टान्तविशदीकरणं** प्रतिज्ञातं **काकपक्षविशदीकरणवद् उपहासपात्रतां** = हास्यास्पदतां **अभिव्यनक्ति** = प्रकटीकरोति।

काकपक्षौ काकेनैव विशदीकृते, न तत्रास्माभिः किञ्चित्कर्त्तव्यमस्ति, तथाऽपि यदि कश्चित्करोति, तर्हि स हास्यास्पदमेव भवति।

एवं कूपोदाहरणं अभयदेवसूरिणा विशदीकृतमेव, भवद्विशदीकरणं तु तद्विरोधि, तथाऽपि यदि करोति भवान्, तर्हि भवतां इदं विशदीकरणं भवतामेव हास्यास्पदतां सूचयति।

**ननु** कूपदृष्टान्तविशदीकरणं कस्मादस्माकं उपहासपात्रतां प्रकटयति? इति जिज्ञासायां आह - **स्वसम्मतेत्यादि।** महोपाध्यायस्य सम्मता ये अभियुक्ताः = पूज्याः अभयदेवसूरयः, तस्य यद् वचनं = अनन्तरमेव प्रतिपादितं, तद्विरोधित्वात्।

महोपाध्याया आशङ्कां निवारयितुमारभन्ते – **नाभियुक्तवचनविरोधो** = नाभयदेवसूरिप्रतिपादितपदार्थेन सह विरोधोऽस्मत्कथितपदार्थस्य **बोधोन्मुखानां** = सम्यग्बोधं प्रति अभिमुखानां **अवभासते।**

**ननु** कथं नावभासते? अस्माभिर्दर्शित एव विरोध इति चेन्न **तस्य** = अभियुक्तवचनस्य **भिन्नतात्पर्यकत्वात्** = भवदभिमततात्पर्यात्सकाशाद् भिन्नं यत्तात्पर्यं, तद्वत्त्वात्।

द्विविधो हि द्रव्यस्तवः, विधिभक्तियुक्तः, अविधिभक्तियुक्तश्च। उभयत्र पुष्पाद्यारम्भोऽस्त्येव, परन्तु विधिभक्तियुक्ते स्वल्पोऽपि पापबन्धो न भवति, अविधिभक्तियुक्ते तु अविधिबलात् स्वल्पः पापबन्धः, भक्तिमाहात्म्याच्च अधिकतरा निर्जरा पुण्यकर्मबन्धश्चेति। अभयदेवसूरिभिः कूपदृष्टान्तोऽविधिभक्तियुक्ते द्रव्यस्तवे योजितः, न तु विधिभक्तियुक्ते द्रव्यस्तवे।

तथा च तेषां त्विदमेवाभिमतं यदुत –

(१) 'स्नानपूजादिकं गुणकरं स्वपरोपकारहेतुत्वात्, कूपखननवत्' इत्येवंरूपमनुमानं विधिभक्तियुक्ते स्नानपूजादिके द्रव्यस्तवे योजनीयम्।

(२) 'अधिकारिणः किञ्चित्सदोषमपि स्नानपूजादिकं गुणकरं शुभाध्यवसायजननेन स्वपरोपकारहेतुत्वात् कूपखननवत्' इत्येवंरूपमनुमानं अविधिभक्तियुक्ते स्नानपूजादिके द्रव्यस्तवे योजनीयम्। यस्मात् तत्रैवाविधिबलात् किञ्चित्सदोषत्वमिति।

(३) इत्थं च प्रथमानुमाने 'यथा कूपखननं स्वपरोपकारहेतुत्वात् गुणकरं, तथैव विधिभक्तियुक्तं स्नानपूजादिकं स्वपरोपकारहेतुत्वात् गुणकरं' इत्येवं योजनीयम्।

(४) द्वितीयानुमाने तु 'यथा कूपखननं श्रमतृष्णाकर्दमोपलेपादिदोषदुष्टमपि जलोत्पत्तौ अनन्तरोक्तदोषान् अपोह्य स्वपरोपकारहेतुः, अत एव च गुणकरं, तथैव अविधिभक्तियुक्तं स्नानपूजादिकं अविधिजन्यं पापकर्मबन्धं शुभाध्यवसायेन अपोह्य शुभाध्यवसायेनैव विशिष्टाशुभकर्मनिर्जरापुण्यबन्धद्वारा गुणकरमिति।

एतदेव अभयदेवसूरेः तात्पर्यम्।

पूर्वपक्षेण तु → विधिभक्तियुक्तेऽविधिभक्तियुक्ते च उभयस्मिन्नपि द्रव्यस्तवे प्रथमं आरम्भजन्यः पापबन्धः पश्चाच्च शुभाध्यवसायेन पापक्षयपुण्यबन्धश्च भवति ← इत्येवं अभयदेवसूरेः तात्पर्यं गृहीतम्। अत एव पूर्वपक्षस्य महोपाध्यायानां च विरोधः, ततश्च अभयदेवसूरेः य उभयस्मिन्स्थाने तात्पर्यभेदः, तं महोपाध्याया आविष्कुर्वन्ति।

एतत्सर्वमधुना मनसि स्पष्टं दृढीकर्तव्यम्।

**यशो.: ईसिं दुट्ठत्ते जं, एयस्स नवंगिवित्तिकारेणं ।**
**संजोयणं कयं तं, विहिविरहे भत्तिमहिकिच्च ॥३॥**

**चन्द्र.:** तृतीयगाथायाः संस्कृतछाया अन्वयश्च एवं

**नवाङ्गीवृत्तिकारेण एतस्य** = कूपदृष्टान्तस्य **इषद्दुष्टत्वे यत्संयोजनं कृतं,**

**तत् विधिविरहे भक्तिमधिकृत्य (कृतं) ॥३॥**

**यशो.: ईषद्दुष्टत्वे** = अल्पपापबहुनिर्जराकारणत्वे, **यद् एतस्य** कूपदृष्टान्तस्य, **नवाङ्गीवृत्तिकारेण** श्रीअभयदेवसूरिणा पञ्चाशकाष्टकवृत्त्यादौ **(संयोजनं कृतं)**, **तद्विधिविरहे** = यतनादिवैकल्ये भक्तिमात्रमधिकृत्य। विधिभक्त्यादिसाकल्ये तु स्वल्पमपि पापं वक्तुमशक्यमेवेति भावः ॥३॥

**चन्द्र.:** अधुना तृतीयगाथाया वृत्तिः, सा च प्रायः स्पष्टा। नवरमयमभिप्रायः – यथा श्रावको निष्कारणं मुग्धतामाश्रित्य भक्तिभावेन प्रेरितः सन् सुसाधवेऽनेषणीयादिकं अशनादि ददाति, तत्र च अनेषणीयस्यापि निष्कारणं दानमविधिः, ततश्च तत्र स्वल्पः पापबन्धः, सुसाधुतां प्रति भक्तिभावश्च विशिष्टनिर्जराकारणं विशिष्टपुण्यबन्धकारणं चेति तद् दानं अल्पपापबहुनिर्जराकारणं **भगवत्यादौ** उक्तम्।

एवं श्रावकः प्रमादादिदोषवशतो जलगालनाल्पजलोपयोगादिरूपां यतनां न करोति, अल्पां वा करोति, जिनेश्वरं प्रति भक्तिभावश्च तस्यास्त्येव, तत्र अयतनैव अविधिः, तेन चाल्पपापबन्धः।, भक्त्या तु विशिष्टपापनिर्जरादिकमिति अविधिभक्तियुक्तं स्नानपूजादिकं अल्पपापबहुनिर्जराकारणं अवसेयमिति।

महोपाध्यायाः स्वाभिप्रायं दृढीकुर्वन्ति – **विधिभक्त्यादिसाकल्ये तु** = यदि स्नानादौ संपूर्णो विधिः पाल्यते, भक्तिश्चास्ति, आदिपदात् प्रतिसमयं विशिष्टोपयोगश्चास्ति, तर्हि जलपुष्पादिजीवविराधनायां सत्यामपि **स्वल्पमपि पापं वक्तुं अशक्यमेव।**

❁ ❁ ❁

**यशो.: कथमयमाशयः सूरेर्ज्ञात इति चेत्?, तत्राह -**

**इहरा कहंचि वयणं, कायवहे कह णु होज्ज पूयाए ।**
**न य तारिसो तवस्सी, जंपइ पुव्वावरविरुद्धं ॥४॥**

**चन्द्र.:** पूर्वपक्षः प्राह – **कथमयं** = अनन्तरोदितः **आशयः सूरेर्ज्ञातः** भवता ? यस्मात् पञ्चाशकवृत्त्यादौ सूरेः तथाविधाशयः प्रतिपादितो न दृश्यते। तत्र तु अल्पपापबहुनिर्जराकारणत्वमेव द्रव्यस्तवस्य प्रतिपादितं दृश्यते। न तु विधिभक्तियुक्तस्य सर्वथा निर्जराकारणत्वं, अविधिभक्तियुक्तस्य तु अल्पपापबहुनिर्जराकारणत्वमिति।

**तत्र** = एतादृशशङ्कायां सत्यां **आह**।

चतुर्थगाथायाः संस्कृतछाया अन्वयश्च इत्थं –

**गाथा ४ : इतरथा पूजायां कायवधे कथंचित् वचनं कथं नु भवेत्,**
**न च तादृशस्तपस्वी पूर्वापरविरुद्धं जल्पति इति। ॥४॥**

**यशो. : इतरथा = सूरेरुक्ताशयाभावे, पूजायां कायवधे कथञ्चिद् वचनं कथं नु भवेत्? न कथञ्चिदित्यर्थः ।**

**चन्द्र. :** अधुना चतुर्थगाथाया वृत्तिः विव्रीयते।

**इतरथा = सूरेरुक्ताशयाभावे** 'विधिभक्तियुक्ते द्रव्यस्तवे स्वल्पोऽपि पापबन्धो नास्ति, अविधिभक्तियुक्ते एव चास्ति' इत्येवंरूप आशयो यदि अभयदेवसूरेर्न स्यात्, किन्तु सर्वत्रस्नानपूजादिके आरम्भजन्यः स्वल्पः पापबन्धोऽस्त्येव' इत्येष अभिप्रायः सूरेः स्यात्, तर्हि

**पूजायां** = क्रियमाणायां **कायवधे कथञ्चिद् वचनं** = 'पूजायां यद्यपि कथञ्चिद् कायवधो भवति' इत्येतादृशं पूजापञ्चाशके प्रतिपादितं यद् **कथञ्चित्** वचनं, तत् **कथं भवेत्? न कथञ्चिदित्यर्थः।** तद्वचनं उक्ताशयाभावे न केनापि प्रकारेण संगतं स्यादिति भावः।

'कस्मिन्नपि द्रव्यस्तवे आरम्भजन्यः पापबन्धो भवत्येव'इति सूरेरभिप्रायः पूर्वपक्षेण चतुर्थपञ्चाशकवृत्त्यनुसारेण प्रतिपादितः। आरम्भश्च कायवधरूपः, ततश्च यदि सर्वस्मिन्नपि द्रव्यस्तवेऽवश्यं अल्पः पापबन्धः, ततः सर्वस्मिन्नपि द्रव्यस्तवेऽवश्यं पापबन्धकारणीभूतः कायवधोऽवश्यंभावी इति सूरेरभिप्रायो मन्तव्यः स्यात्।

इतश्च पञ्चमपञ्चाशकवृत्तौ सूरिणा प्रतिपादितं यदुत 'विशिष्टयतनासत्त्वे तु द्रव्यस्तवे सर्वथा कायवधो नैव भवति' इति।

एवं च विशिष्टयतनाशालिनि द्रव्यस्तवे कायवधाभावात् अल्पपापबन्धोऽपि नैव स्यात्, ततश्च चतुर्थपञ्चाशकवृत्तिस्वरूपस्य पूर्वग्रन्थस्य पञ्चमपञ्चाशकवृत्तिस्वरूपस्य अपरग्रन्थस्य च परस्परं विरोधः स्यात्। यत एकत्र सर्वस्मिन्नपि द्रव्यस्तवे कायवधः, तज्जन्य अल्पपापबन्धश्च प्रतिपादितः, अन्यत्र तु विशिष्टयतनाशालिनि द्रव्यस्तवे तदभावः प्रतिपादित इति स्पष्टमेव पूर्वापरविरोध इति।

**यशो. : न च तादृशस्तपस्वी पूर्वापरविरुद्धं वचनं जल्पति। तस्मादीषद्दोषदुष्टं जिनपूजादिकं विधिविरहभक्तिकालीनमेव ग्राह्यमित्याशय एव युक्तः ।**

**चन्द्र. : ननु** भवतु नाम पूर्वापरविरुद्धं वचनं, को दोषः? अरे मुग्ध! **न च तादृशः** = नवाङ्गीवृत्तिकरणादिविशिष्टश्रुतप्रतिभादिसम्पन्नः **तपस्वी** = उत्सूत्रप्ररूपणादिपापविपाकभयग्रस्तः पूर्वापरविरुद्धं वचनं जल्पति। **तस्मात्** सूरेः पूर्वापरविरुद्धवचनासम्भवात् **इषद्दोषदुष्टं जिनपूजादिकं** चतुर्थपञ्चाशके सूरिणा कूपदृष्टान्तेन सह योजितं यद्, तत् **विधिविरहभक्तिकालीनमेव** न तु विधिसमन्वितभक्तिकालीनमपि, तत्रेषद्दोषस्याप्यभावादिति 'एव'कारार्थः।

**आशय एव युक्तः।**

चतुर्थपञ्चाशकवृत्तौ सूरिणा विधिविरहभक्तिसहितं जिनपूजादिकमाश्रित्य प्रतिपादनं कृतं, न तु सर्वमपि जिनपूजादिकमिति भावः।

**यशो.: अयं भावः-पूजापञ्चाशके जिनार्चने कायवधेन प्रतिक्रुष्टेन दुष्टत्वात्कथं परिशुद्धत्वमित्याशङ्कायाम् -** "भण्णइ जिणपूयाए, कायवहो जइवि होइ उ कहंचि। तहवि तई परिसुद्धा, गिहीण कूवाहरणजोगा" ।।४२।। **इति श्रीहरिभद्रसूरिभिस्समाहितम्।**

**चन्द्र.:** एतदेव सर्वं स्पष्टयितुमाहुर्महोपाध्यायाः – **अयं भावः** इत्यादि। सर्वं स्पष्टं, नवरं अन्वयार्थो भावार्थश्च प्रतिपाद्यते।

कायवधो भगवता प्रतिक्रुष्टः, जिनार्चने स भवति, ततश्च जिनार्चनं प्रतिक्रुष्टेन कायवधेन दुष्टं, ततश्च जिनार्चने परिशुद्धत्वं कथं ? इति पूर्वपक्षस्याशङ्का भवति, तस्यां सत्यां श्रीहरिभद्रसूरिभिः पूजापञ्चाशके द्विचत्वारिंशत्तमगाथायां समाधानं कृतम्।

सा च गाथेयम् – **भण्णइ** इत्यादि।

तद्भावार्थश्चायं – **भण्यते** = शङ्कायाः समाधानं दीयते। यद्यपि जिनपूजायां कथञ्चित् कायवधो भवति, तथाऽपि गृहस्थानां कूपदृष्टान्तयोगात्सा जिनपूजा परिशुद्धा" इति।

वृत्तिगतपदानामन्वयस्त्वेवम्

'प्रतिक्रुष्टेन कायवधेन (जिनार्चने) दुष्टत्वात्, जिनार्चने परिशुद्धत्वं कथं ?' इति (पूजापञ्चाशके) आशङ्कायां (सत्यां) **भण्णइ... इति श्रीहरिभद्रसूरिभिः पूजापञ्चाशके समाहितम्।**

**यशो.: तत्र च 'यतनाविशेषेण प्रवर्त्तमानस्य सर्वथापि न भवतीति दर्शनार्थं कथञ्चिद्ग्रहणम्' इत्यभयदेवसूरिभिर्व्याख्यातम्,**

**चन्द्र.: तत्र च** = द्विचत्वारिशत्तमगाथायां यत् 'कथञ्चित्' पदं, तद्विवेचने **अभयदेवसूरिभिः व्याख्यातं** यदुत **'यतनाविशेषेण प्रवर्तमानस्य सर्वथाऽपि न भवति इति दर्शनार्थं कथञ्चिद् ग्रहणम्'** इति।

अभयदेवसूरेरनेन वचनेन ज्ञायते यदुत 'यदि यतना स्यात्, तर्हि कायवधो नैव स्यात्' इति। यतना च विधिः, ततश्च विधिसत्त्वे कायवधाभाव एवेति सिद्धम्। ततश्च विधिविरह एव कायवध इत्येतदपि सिद्धम्।

**यशो.: तेन विधिविरह एव कायवधः पर्यवस्यति,**

**चन्द्र.:** एतदेवाहुर्महोपाध्यायाः – **तेन** = अभयदेवसूरिवचनेन **विधिविरह** = विधि–अभाव **एव,** न तु जलपुष्पादिजीवविराधनामात्रं **कायवधः पर्यवस्यति।**

**यशो.:** "प्रमादयोगेन प्राणव्यपरोपणं हिंसे" ति (७.८) **तत्त्वार्थोक्तहिंसालक्षणसद्भावात् हिंसारूपस्यैव कायवधस्यात्र प्रतिषेध्यत्वात्।**

**चन्द्र.: ननु** विधिविरह एव कायवध इति यद् उच्यते, तन्निश्चयनयाभिप्रायेण युक्तम्। किन्तु व्यवहारनयाभिप्रायेण तु जीवस्य स्वप्राणैः सह वियोजनं एव कायवधः। एवं च द्विविधः कायवधोऽस्ति। ततश्च अभयदेवसूरिणा "यतनाविशेषेण प्रवर्तमानस्य सर्वथाऽपि कायवधो न भवति" इत्येवं यः कायवधस्य प्रतिषेधः कृतः, स किं निश्चयनयाभिमतस्य कायवधस्य? व्यवहाराभिमतस्य वा? वयन्तु वदामः, यदुत सूरिभिः व्यवहारनयाभिमतस्यैव कायवधस्य निषेधः कृतः। ततश्च अयं तेषामभिप्रायः यदुत यदि यतनाविशेषो न क्रियते, तर्हि जीववधो भवति, ततश्च तज्जन्य अल्पपापबन्धो भवति, एतदेव च चतुर्थपञ्चाशकवृत्तौ उक्तम्।

यदि च यतनाविशेषः क्रियते, तर्हि व्यवहाराभिमतोऽपि कायवधो न भवति, ततश्च अल्पोऽपि पापबन्धो न भवति इति।

इत्थं च यत्र व्यवहारतोऽपि जीववधः, तत्र स्वल्पोऽपि पापबन्धोऽवश्यंभावी इति स्पष्ट एव तेषामभिप्रायः इति चेत् न, **प्रमादयोगेन** इत्यादि। **हिंसारुपस्यैव** = न तु जीवस्य स्वप्राणैः सह वियोगमात्रस्येति एवकारार्थः, किन्तु प्रमादवशतो यदा जीवस्य स्वप्राणैः सह वियोगः, तदा प्रमादिनस्तात्त्विकी हिंसा गण्यते। तादृशहिंसारूपस्यैव **कायवधस्य अत्र** = यतनाविशेषेण क्रियमाणे जिनपूजादिके **प्रतिषेध्यत्वात्** 'सर्वथाऽपि न भवति' इतिवचनेन निषेध्यत्वात्।

अयं भावः – द्विविधः कायवधोऽस्तीति सत्यम्, परन्तु यतनाविशेषेण क्रियमाणे जिनपूजादिके सूरिणा द्विविधस्यापि कायवधस्य निषेधो न कृतः, किन्तु तत्त्वार्थोक्ततात्त्विकहिंसारूपस्यैव कायवधस्य निषेध उक्तः, यतनासद्भावेन तात्त्विकहिंसात्मककायवधस्याभावात्।

**यशो.: जलपुष्पोपनयनादिरूपस्य च पूजाभ्यन्तरीभूतस्य** "देहादिनिमित्तं पि हु जे कायवहंमि तह पयट्टन्ति। जिणपूआकायवहंमि तेसिमपवत्तणं मोहो" **(पू. पञ्चा. ४५)। इत्यादिना उपेत्यकरणस्याप्यनुज्ञानात्,**

**चन्द्र.: ननु** भवतु नाम तात्त्विकहिंसात्मकस्य कायवधस्य निषेधः, कस्तत्र विवदति। किन्तु तेनैव सह प्राणवियोगात्मकस्य कायवधस्यापि तत्र निषेधोऽस्त्येव, इति चेत्, न **जलपुष्पोपनयनादिरूपस्य च** = प्राणवियोगात्मकस्य **पूजाभ्यन्तरीभूतस्य** = पूजायामवश्यंभाविनः। **इत्यादिना** = पञ्चचत्वारिंशत्तमगाथाग्रन्थेन **उपेत्यकरणस्यापि** = 'अत्र प्राणवियोगो भवति' इत्येवं ज्ञात्वाऽपि तत्करणस्यापि, आस्तां तावत् एतादृशोपयोगाभाव इत्यपि शब्दार्थः। **अनुज्ञानात्** = अनुमतिदानात्।

पञ्चचत्वारिंशत्तमगाथाभावार्थस्त्वयम् – ये देहादिनिमित्तमपि कायवधे तथा प्रवर्तन्ते, तेषां जिनपूजाकायवधेऽप्रवर्तनं मोहः = अज्ञानं = मूर्खत्वं = मुग्धतेतियावत्।

अनेन ग्रन्थेन प्रस्तुतकायवधस्यानुमतिरेव प्रदत्ता, ततश्च "सर्वथाऽपि न भवति" इत्यादिना तन्निषेधो नैव मन्तव्यः, न हि यदनुमतं तन्निषेधो युक्त इति।

**यशो.: अप्रवृत्तिनिन्दार्थवादस्य विध्याक्षेपकत्वात्।**

**चन्द्र.: ननु** 'पञ्चचत्वारिंशत्तमगाथाग्रन्थेन पूजाभ्यन्तरीभूतस्य प्राणवियोगात्मकजीववधस्य उपेत्य करणस्याप्यनुमतिः प्रदत्ता' इति कथं सिद्धम्? अस्मिन्ग्रन्थे केवलं देहाद्यर्थं कायवधकारकस्य जिनपूजाद्यर्थं कायवधं पापमिति मत्वा जिनपूजां त्यजतो मोह एव प्रतिपादितः, न तु एवमुक्तं यदुत "जिनपूजाद्यर्थं कायवधे प्रवृत्तिः कार्या" इति शङ्कायामाह –

**अप्रवृत्तिनिन्दार्थवादस्य** = अप्रवृत्तेर्या निन्दा, सैव अर्थवादः = प्रवृत्तेः प्रशंसारूपः, तस्य **विध्याक्षेपकत्वात्** = 'प्रवृत्तिः करणीया' इत्येवंविधं यत् विधानं, तदाकर्षकत्वात्।

अयं भावः –

यद्यपि प्रस्तुतगाथायां 'जलपुष्पाद्युपनयनरूपे जिनपूजाकायवधे प्रवृत्तिः करणीया' इति अनुमतिः साक्षात् प्रदत्ता न दृश्यते। परन्तु 'तादृशकायवधेऽप्रवृत्तिः मोहः' इति वचनेन अप्रवृत्तेः निन्दा कृता दृश्यते, अप्रवृत्तेः निन्दा चार्थापत्त्या प्रवृत्तेः प्रशंसैव, प्रशंसा नामार्थवादः, स च अदृश्यमानमपि विधिं 'जलपुष्पाद्युपनयने प्रवृत्तिः कार्या' इत्येवंरूपं आक्षिपति।

यथाहि 'मातापितृसेवाऽकारको पापी' इति वचनेन सेवाऽकारकस्य निन्दा कृता दृश्यते, तेन च सेवाकारकस्य प्रशंसाऽनुमीयते, तेन च 'अवश्यं मातापितृसेवा करणीया' इत्येवंरूपो विधिः श्रोतृणाऽनुमीयते अनुभूयते वा। एवमेवात्रापि द्रष्टव्यम्।

**यशो.: विधिस्पष्टे च निषेधानवकाशात् ।**

**चन्द्र.: ननु** भवतु नाम पुष्पोपनयनादौ विधानं, तथाऽपि तत्र निषेधोऽपि भवतु इति चेत् न, **विधिस्पष्टे च** = विधानेन स्पष्टं यत् पुष्पोपनयनादिकं, तस्मिन् **निषेधानवकाशात्** = 'पुष्पानयनादि न कर्त्तव्यम्' इत्यादिरूपस्य निषेधस्यासम्भवात्।

एवं तावत् सुरेरयमाशयः साधितः, यदुत → विधिरहितं भक्तियुक्तं च पूजादिकं इषद्दोषदुष्टं। विधिभक्तिसहितं तु पूजादिकं सर्वथा निर्दोषमेव, यतः यतनाविशेषेण प्रवर्तमानस्य सर्वथाऽपि कायवधो नास्ति, तदभावे च लेशतोऽपि दोषो नास्ति, तदभावे च सर्वथा निर्दोषमेव, तत्र जायमाना जलपुष्पादिविराधना तु न दोषरूपा, प्रमादाभावेन तस्या हिंसारूपत्वाभावात् ←इति।

**यशो.: यदि च विधिसामग्र्येऽपि पुष्पजलोपहारादिरूपहिंसादोषोऽत्र परिगण्येत, तदा तस्य पूजानान्तरीयकत्वेन 'कायवहो जइवि होइ उ कहंचि' त्ति नावक्ष्यदाचार्यः, किन्तु 'कायवहो होइ जइवि नियमेण' मित्येवाऽवक्ष्यत्।**

**चन्द्र.:** ननु सूरेरयमाशयो यदि न स्वीक्रियते, तर्हि को दोषः ? इति चेत् **यदि च इत्यादि। विधिसामग्र्येऽपि** = विधेरभावे तावत् यतनाऽभावात् पुष्पजलोपहारादिरूपहिंसादोषः तात्त्विकहिंसादोषरूपत्वेन दोषो गण्यत एव, किन्तु यत्र सम्पूर्णयतना भवति, तत्रापि इत्यपि शब्दार्थः। **पुष्पजलोपहारादिरूपहिंसादोषो** = प्रमादाभावे केवलं द्रव्यहिंसारूपो **अत्र** = जिनपूजायां **परिगण्येत, तदा** = एवं सति **तस्य** = तादृशदोषस्य **पूजानान्तरीयकत्वेन** = पूजायामवश्यंभावित्वेन **कायवहो जइवि होई उ कहंचि त्ति नावक्ष्यत्** = नावदत् **आचार्यः** = श्रीहरिभद्रसूरिः। तर्हि किं अवदत् ? इत्याह – **किन्तु 'कायवहो होइ जइवि नियमेण'** मित्येवाऽवक्ष्यत्।

अयं भावः – 'प्रमादयोगेन प्राणव्यपरोपणं, प्रमादाऽभावेऽपि च प्राणव्यवपरोपणं' इत्येवं द्वाभ्यां प्रकाराभ्यां कायवधो भवति। तत्र प्रथमस्तात्त्विकी हिंसा, सैव च दोषः, द्वितीयस्तु न तात्त्विकी हिंसेति स न दोषः। अत एव **कहंचि** पदमुपात्तमाचार्येण। यस्मात् यतनाविशेषेण प्रवर्तमानस्य प्रथमः कायवधो न भवति, स एव च दोषः, ततश्च यतनासत्त्वे तस्याभावेन तत्र तस्य निषेधो वक्तुं शक्यते।

किन्तु यदि प्रमादाभावेऽपि प्राणव्यपरोपणं कायवधो दोषत्वे परिगणनीयः स्यात्, तर्हि स तु यतनासत्त्वेऽपि भवत्येव, यस्मात् पूजा पुष्पाद्युपनयनादिरूपैव, ततश्च तस्यां स भवेदेव। ततश्च यतना भवतु मा वा, कायवधस्तु नियमेन भवेदेव। एवं च **कायवहो जइवि होई उ नियमेणं** इत्येव वक्तव्यं स्यात्, न तु **कहंचि** इति।

एवं तावत् **'कहंचि'** पदसामर्थ्येनाचार्याणामाशयः प्रसाधितः।

**यशो.: अपि च पदार्थवाक्यार्थमहावाक्यार्थऐदंपर्यार्थविचारणायां हिंसासामान्यस्य निषेधस्य अविधिनिषेधपरताया एव व्यवस्थितत्वात् विधिसामग्र्ये न हिंसादोषः, अन्यथा चैत्यगृहलोचकरणादौ तत्सम्भवो दुर्निवार इत्यादिसूक्ष्ममीक्षितमुपदेशपदादौ।**

**चन्द्र.:** अधुना युक्त्यन्तरेण तमेव साधयन्नाहुः महोपाध्यायाः – **अपि च** इत्यादि।

अयं भावः –

(१) 'सर्वे जीवा न हन्तव्याः' इति आगमवाक्यं, तदर्थस्तु 'एकोऽपि जीवो न हन्तव्य' इति। अयमेव पदार्थः।

(२) "ननु एकोऽपि जीवो न हन्तव्यः, तर्हि जिनपूजा कथं करणीया ? साधर्मिकवात्सल्यं, गुरुवन्दनं, प्रवचनश्रवणाय गमनं, दीक्षानन्तरं च लोचकरणं, नद्युत्तरणमित्यादिकं कथं करणीयम् ? सर्वत्रैव जीवहिंसाया अवश्यम्भावात्" इति प्रश्न एव वाक्यार्थः।

(३) → 'प्रमादत एकोऽपि जीवो न हन्तव्यः, अप्रमादभावेन धर्मार्थं गृहस्थानां जीववधो नैव दोषाय'इति अप्रमादभावेन जिनपूजादिकं सर्वं निर्दोषमेव।

इत्थं च 'हिंसा न कर्त्तव्या' इत्यस्यायमेव भावार्थः यदुत 'प्रमादो न कर्त्तव्यः' इति। प्रमादाभावे हिंसासत्त्वेऽपि परमार्थतोऽहिंसैव।

प्रमादो नामाविधिः। तथा च हिंसानिषेधः अविधिनिषेधरूप एव, न तु जीवव्यपरोपणमात्रनिषेधपर ← इति।

इदं च समाधानं महावाक्यार्थः।

(४) सर्वत्रापि जिनाज्ञैव प्रमाणम्'इति वचनं ऐदम्पर्यार्थः।

तथा च पदार्थादिविचारणा यदा क्रियते, तदा कुत्रापि हिंसानिषेध अविधिनिषेधरूप एव गृह्यते। इत्थं च 'जिनपूजायां यतनाविशेषेण हिंसा सर्वथाऽपि न भवति' इति हिंसानिषेधः अविधिनिषेधरूप एव, अर्थात् तात्त्विकहिंसानिषेधरूप एव, न तु प्राणव्यपरोपणरूपाया हिंसाया निषेध इति।

यदि हि द्रव्यहिंसाया निषेधोऽत्राभिप्रेतः स्यात्, तर्हि सा तु चैत्यगृहलोचकरणादौ अवश्यंभाविनीति कृत्वा जिनपूजादिकं सर्वमकर्त्तव्यं स्यादिति नैतद्युक्तमिति।

एतच्च सर्वं सूक्ष्ममीक्षितं **उपदेशपदादौ** आचार्यश्रीहरिभद्रेणेति।

एष भावार्थः।

अधुनाऽक्षरार्थः ।

**अपि च** = युक्त्यन्तरप्रतिपादनाय प्रस्तावनाकरणेऽयमपिशब्दः । **पदार्थेत्यादि** । **हिंसासामान्यस्य निषेधस्य** = 'प्रमादेन प्राणव्यपरोपणं हिंसा, प्राणव्यपरोपणमात्रं वा हिंसा' इत्येवं विभागमकृत्वैव यदा हिंसाया निषेधो क्रियते, तदा स हिंसासामान्यस्य निषेधो गण्यते। **अविधिनिषेधपरताया एवेत्यादि।**

यदा पदार्थादिविचारणा क्रियते, तदा हिंसासामान्यस्य निषेधोऽविधिनिषेधपर एव व्यवस्थितः, ततश्च विधिसम्पूर्णतायां सत्यां अविधि-अभावान्न हिंसादोष इति।

**अन्यथा** = यदि विधिसामग्र्येऽपि सति बाह्यवधमात्रतो हिंसा दोषरूपा गण्येत, तर्हि **चैत्यगृहलोचकरणादौ** = चैत्यगृहे गृहस्थानां, लोचकरणे साधूनां। आदिपदात् गृहस्थानां जिनपूजादौ, साधूनां नद्युत्तरणादौ।

**तत्सम्भवो** = भवदभिमतदोषसम्भवो **दुर्निवार** इति। तथा च चैत्यगृहलोचकरणादावपि अल्पपापबन्धोऽभिमन्तव्यः स्यात्।

अत्र हि पूर्वपक्षश्चैत्यगृहे तु अल्पपापबन्धं मन्यत एव, ततश्च तत्र तस्य नापत्तिः, किन्तु लोचकरणेऽल्पपापबन्धस्तेन न मन्यते, ततश्च तत्र तस्यापत्तिरिति कृत्वा लोचकरणं चैत्यगृहेण सहैव समकक्षयाऽत्र गृहीतं महोपाध्यायैरिति बोध्यम्।

**यशो.: एतेन** "कहन्नं भन्ते जीवा अप्पाउयत्ताए कम्मं पगरेंति ? पाणे अइवइत्ता, मुसं वइत्ता, तहारूवं समणं वा माहणं वा अफासुएणं अणेसणिज्जेणं असण-पाण-खाइम-साइमेणं पडिलाभित्ता एवं खलु जीवा अप्पाउयत्ताए कम्मं पगरेन्ति" **इत्यत्र** "अध्यवसायविशेषादेतत्त्रयं जघन्यायुःफल**मिति**" **व्याख्याय**। 'अन्ये तु यो जीवो जिनसाधुगुणपक्षपातितया तत्पूजार्थं पृथिव्याद्यारम्भेण

स्वभाण्डासत्योत्कर्षणादिना आधाकर्म्मादिकरणेन च प्राणातिपातादिषु वर्त्तते, तस्य वधादिविरतिनिरवद्यदाननिमित्तायुष्का-पेक्षयेयमल्पायुष्कताऽवसेया, अविशेषणत्वेऽपि सूत्रस्य प्राणातिपातादिविशेषस्य अवश्यं वाच्यत्वात्, अन्यथेतस्तृतीयसूत्रे प्राणातिपातादितः अशुभदीर्घायुष्कतावचनानुपपत्तेः। न हि सामान्यहेतोः कार्यवैषम्यं युज्यते। अपि च अल्पतरपापबहुतरनिर्जराहेतुताया अशुद्धदाने अभिधास्यमानत्वाद् नैवेयं क्षुल्लकभवग्रहणरूपा अल्पायुष्कता, न हि स्वल्पपापबहुनिर्जरानिबन्धनस्यानुष्ठानस्य क्षुल्लकभवग्रहणनिमित्तता सम्भाव्यते, जिनपूजाद्यनुष्ठानस्याऽपि तथात्वप्रसङ्गात्' **इति व्याख्यानेऽपि विधिवैकल्यवत्येव जिनपूजा ग्राह्येति द्रष्टव्यम्,**

**चन्द्र.: एतेन** = 'अविधिरेव हिंसा, विधिरेव चाहिंसा। अविधिरेव च दोषः, तत्सत्त्व एव च स्वल्पादिपापकर्मबन्धः, तदभावे तु बाह्यहिंसासत्त्वेऽपि कुत्रापि कोऽपि दोषो नास्त्येव' इति यत्प्रतिपादितं, तेन।

**कहन्नं भंते** इत्यादि।

प्रथमं तावद्भावार्थः प्रतिपाद्यते, तत्पश्चादक्षरार्थः प्रतिपादयिष्यते।

स्थानाङ्गसूत्रे तृतीयाध्ययने वक्ष्यमाणरूपाणि चत्वारि सूत्राणि सन्ति। तानि च भावार्थेनात्र दर्शयामि

(१) त्रिभिः **स्थानैः** = कारणैः जीवा अल्पायुष्कं बध्नन्ति - (१) प्राणानतिपात्य (२) मृषा कथयित्वा (३) सुसाधुं अप्रासुकमनेषणीयं वा अशनादिकं प्रदायेति।

(२) त्रिभिः **स्थानैः** = कारणैः जीवा दीर्घायुष्कं बध्नन्ति - (१) प्राणाननतिपात्य (२) मृषाऽनुक्त्वा (३) सुसाधुं प्रासुकमेषणीयं च अशनादिकं प्रदायेति।

(३) त्रिभिः **स्थानैः** = कारणैः जीवा अशुभदीर्घायुष्कं बध्नन्ति -(१) प्राणानतिपात्य (२) मृषा कथयित्वा (३) सुसाधुं हीलनाखिंसनादिप्रकारेण अमनोज्ञादिरूपं अशनादिकं प्रदायेति।

(४) त्रिभिः **स्थानैः** = कारणैः जीवाः शुभदीर्घायुष्कं बध्नन्ति - (१) प्राणाननतिपात्य (२) मृषाऽनुक्त्वा (३) सुसाधुं सत्कारसन्मानादिप्रकारेण मनोज्ञादिरूपमशनादिकं प्रदायेति।

→ तत्र प्रथमसूत्रस्याभयदेवसूरिभिर्यद् व्याख्यानं कृतं, तदनुसारेणायं भावार्थः।

अल्पायुष्कं द्विविधं, एकं २५६ आवलिकाप्रमाणं, द्वितीयं सापेक्षं, तथाहि - चतुर्थसूत्रे यत् शुभदीर्घायुष्कमुक्तं, तदपेक्षया शुभमेवाल्पायुष्कमिति। यथा चतुर्थसूत्रानुसारेण कश्चिद् गृहस्थः २२ सागरोपमप्रमाणमायुः बध्नाति, तर्हि तदपेक्षया प्रथमसूत्रानुसारेण २१सागरोपमादिप्रमाणमायुः बध्नातीति।

तत्र यत् २५६ आवलिकाप्रमाणमायुः, तत् स कथं बध्नाति? इति जिज्ञासायां समाधानमिदं यदुत अध्यवसायविशेषात् स तादृशमायुर्बध्नातीति। कर्मबन्ध अध्यवसाय एव प्रधानं कारणम्, ततश्च यादृशोऽध्यवसायः २५६ आवलिकाप्रमाणायुषः कारणम्, तादृश एवाध्यवसायो यस्मिन्प्राणातिपाते यस्मिन्मृषावादे यस्मिन्वा गोचरीदाने भवेत्, तस्मिन्प्राणातिपातादौ तादृशायुर्बन्धः स्यादिति।

परन्त्वस्मिन्समाधाने भवति प्रश्नः, तथाहि-यानि प्राणातिपात-मृषावाद - दोषान्वितगोचरीदानादीनि

कारणानि अल्पायुष्ककारणतया प्रोक्तानि, तान्येव तृतीयसूत्रे अशुभदीर्घायुष्ककारणतया प्रोक्तानि। न चैतत्सम्भवति। न हि एकमेव कारणं अल्पायुष्कं अशुभदीर्घायुष्कमित्येवं विरोधिस्वरूपं कार्यद्वयं जनयितुमलं, न हि एक एवाग्निः उष्णतां शीततां चोभयं प्रददाति।

ततश्च प्रथमसूत्रे यानि प्राणातिपातादीनि, तृतीये च यानि, तेषां मध्ये कश्चिद् विशेषोऽवश्यं वाच्यः, येन विभिन्नानि तानि विभिन्नकार्याणां कारणानि वक्तुं शक्यन्त इति।

तत्र प्रथमसूत्रे प्राणातिपातादित्रयाणां तृतीयसूत्रस्थेभ्यः प्राणातिपातादिभ्यो विशेषोऽयम्।

*एको गृहस्थो जिनेश्वरगुणभक्तिमान् पृथ्वीजलपुष्पाद्यारम्भं कृत्वा जिनेश्वरं पूजयति, द्वितीयो गृहस्थः* कुटुम्बाद्यर्थं पृथ्व्यादिजीवान् हिनस्ति। अत्र प्रथमगृहस्थः सामायिकादिनिरवद्यानुष्ठानकर्तृगृहस्थसकाशादल्पं शुभायुर्बध्नाति। द्वितीयगृहस्थस्तु तृतीयसूत्रानुसारेणाशुभं नरकादिसम्बन्धि दीर्घायुर्बध्नाति।

इत्थं च प्रथमतृतीयसूत्रयोः प्राणातिपातौ स्पष्टमेव विभिन्नौ सन्तौ विभिन्नफलदायकौ प्रसिद्धौ।

एवं मृषावादेऽपि प्राणातिपातवदेव भेदोऽवगन्तव्यः।

अधुना अशनादिदानरूपं तृतीयं कारणम्।

तत्र एको गृहस्थः साधुभक्तिमान् आधाकर्मादिकरणेन सुसाधवे अशनादिकं ददाति, द्वितीयस्तु साधुं हीलनखिंसनादिभिः अमनोज्ञादिरूपं अशनादिकं ददाति। अत्र प्रथमगृहस्थो निर्दोषदानदातृसकाशादल्पं शुभायुष्कं बध्नाति, द्वितीयस्तु साधुं प्रति तिरस्कारादिदुष्टभावसद्भावादशुभं नरकसम्बन्धि दीर्घायुष्कं बध्नातीति।

एवं प्रथमतृतीयसूत्रगतयोः अशनादिदानयोर्मध्येऽपि भेदः प्रतिपादितः।

**ननु** अल्पायुष्कं सापेक्षं किमर्थं ग्राह्यम् ? २५६ आवलिकारूपमेव किमर्थं न गृह्यते ? अध्यवसायभेदात् फलभेदो भविष्यतीति चेत्, न । एवं सति पूर्वापरविरोधः स्यात्। तथाहि–भगवतीसूत्रे अशुद्धदानं अल्पतरपापस्य बहुतरनिर्जरायाश्च हेतुरुक्तः। यदि च तदेव अशुद्धदानं २५६ आवलिकाप्रमाणायुष्कस्य कारणं स्यात्, तर्हि स्पष्टमेव परस्परं विरोधः। यस्मात् २५६ आवलिकाप्रमाणमायुष्कं निगोद एव भवति। एवं च स्थानाङ्गानुसारेण अशुद्धदानं निगोदकारणं सिद्ध्येत्, भगवत्यनुसारेण तु तत् अल्पस्यैव पापस्य बहुतरायाश्च निर्जरायाः कारणमिति तत् सद्गतिकारणमेव सिद्ध्येत्।

इत्थं च स्थानाङ्गानुसारेण अशुद्धदानं निगोदकारणं, भगवत्यनुसारेण च सद्गतिकारणमिति विरोधः स्पष्टः। तत्परिहाराय स्थानाङ्गोक्तं अल्पायुष्कं न २५६ आवलिकाप्रमाणं ग्राह्यम्, अपि तु शुद्धदानजन्यायुष्कापेक्षयाऽल्पं ग्राह्यम्। तच्च सद्गतावपि भवत्येवेति स्थानाङ्गभगवत्योः उभययोरनुसारेण अशुद्धदानं सद्गतिकारणमेव भवेदिति।

यदि चाशुद्धदानं २५६ आवलिकाप्रमाणायुष्ककारणमेव मन्येत, तर्हि तेन सहैवोक्तं जिनपूजादिकमपि तथैव मन्तव्यं स्यात्। न चैतदिष्टं, तस्माद् यथोक्तमेव मन्तव्यमिति।

एवं तावत्स्थानाङ्गसूत्रव्याख्यानभावार्थो निगदितः, अधुना वृत्त्यनुसारेणार्थो निगद्यते।

**एतेन** इति पदस्य **इति दृष्टव्यम्** इत्यनेन सहान्वयः कर्त्तव्यः।

**कहन्नं** इत्येतस्मादारभ्य **जघन्यायुःफलम्** इत्येतदन्तं स्थानाङ्गसूत्रवृत्तिगतं निरूपणम्। **इति व्याख्याय इति** तु महोपाध्यायानां वचनम्। तथा **अन्ये तु** इत्यस्मात् आरभ्य **तथात्वप्रसङगात्** इत्येतदन्तं निरूपणं स्थानाङ्गवृत्तिसम्बन्धि।

स्थानाङ्गवृत्तौ अभयदेवसूरिणा द्वाभ्यां प्रकाराभ्यां व्याख्यानं कृतम्। ततश्च महोपाध्याया एतदेव स्पष्टयति यदुत अभयदेवसूरिकृतवृत्तौ.... '**जघन्यायुःफलमिति** व्याख्याय **अन्ये तु .... तथात्वप्रसङ्गात्** इति **व्याख्यानेऽपि**'.... इत्यादि।

अक्षरार्थलेशस्त्वयम् -

**अत्र** = स्थानाङ्गसूत्रे **एतत्त्रयं** = प्राणातिपातो मृषावादोऽशुद्धगोचरीदानं चेति। **अन्ये तु** इत्थं व्याख्यानं कुर्वन्ति इति शेषः।

यो जीवो जिनसाधुगुणपक्षपातितया तत्पूजार्थं पृथिव्याद्यारम्भेण प्राणातिपाते स्वभाण्डासत्योत्कर्षणादिना च मृषावादे वर्तते, साधुगुणपक्षपातितया च तत्पूजार्थं आधाकर्मादिकरणेन प्राणातिपाते मृषावादे सावद्यदाने च वर्तत इति भावः।

अत्र जिनपूजार्थं जिनगृहं जिनप्रतिमा च कारापणीया, तत्र च पृथिव्यादीनामारम्भोऽवश्यंभावी। तथा जिनपूजार्थं प्रभूतं धनमावश्यकमिति मत्त्वा स स्वभाण्डस्य सुवर्णस्थालादिरूपस्य असत्येन प्रकारेण उत्कर्षणं करोति, अर्थात् तस्य मूल्यं वर्धयति। यदि वा 'मया दश सुवर्णमयानि स्थालानि ग्राह्याणि' इति प्रतिज्ञायां प्राग्गृहीतायां सत्यां जिनपूजार्थं धनवृद्धिकरणार्थं स सुवर्णस्थालानि गालयित्वा पुनः दशस्थालेभ्यः पञ्चैव स्थालानि कारयति, पञ्च च नूतनानि कारयतीत्येवमपि धनवृद्धिं करोति, तद्धनं च जिनपूजायां व्यापारयति, परन्तु तदर्थमुपर्युक्तप्रकारेण मृषावादमाचरतीति। एवं साधुगुणपक्षपातितया तल्लाभार्थं आधाकर्मादिकरणे प्राणातिपाते वर्तते, साधुना पृष्टे सति 'नैतद्भवदर्थं कृतं, किन्तु मदर्थमेव' इत्यादिना मृषावादे वर्तते, ततश्च अनाभोगवते तस्मै सुसाधवेऽशुद्धदानं ददातीत्येवं अल्पायुष्कस्य त्रिषु कारणेषु वर्तत इति।

इत्थं च यो वर्तते, **तस्य वधादिविरतिनिरवद्यदाननिमित्तायुष्कापेक्षया** = प्राणातिपातविरतिर्मृषावादविरतिर्निरवद्यदानं वा निमित्तं यस्य, तादृशं यत् आयुष्कं, तदपेक्षया **इयं** = प्रथमसूत्रे प्रतिपादिता **अल्पायुष्कता अवसेया,** न तु २५६ आवलिकाप्रमाणरूपेति भावार्थः।

**ननु** सूत्रे तु भवदुक्तविशेषणसमन्वितं प्राणातिपातादि नैवोक्तं, ततश्च तादृशं प्राणातिपातादि कथं ग्राह्यमित्याशङ्कायामाह- **अविशेषणत्वेऽपि** = 'जिनसाधुगुणपक्षपातिना जिनपूजाद्यर्थं कृतं प्राणातिपातादिकम्' इत्येवं विशेषणरहितत्वेऽपि **सूत्रस्य** = 'कहन्नं भंते' इत्यादिसूत्रस्य **प्राणातिपातादिविशेषस्य** =

अनन्तरोक्तस्वरूपस्य, न तु यस्य कस्यापि प्राणातिपातादेः **अवश्यं वाच्यत्वात्** इयं अनन्तरोक्ता विशेषणसहितप्राणातिपातादेः सापेक्षाऽल्पायुष्कताऽवसेया इत्यन्वयः।

एवं **सूत्रस्य अविशेषणत्वेऽपि** इत्येवं अन्वयो बोध्यः।

**ननु** विशेषणरहितस्य सामान्यप्राणातिपातादेः ग्रहणे को दोषः? इति शङ्कायामाह- **अन्यथा** = सामान्यप्राणातिपातादेः सकाशात् निरपेक्षाऽल्पायुष्कता यदि गृह्यते, तर्हि **इतः** = प्रथमात्सूत्रात् **तृतीयसूत्रे प्राणातिपातादितः** = प्रतिपादितात्त्रिकात् **अशुभदीर्घायुष्कतावचनानुपपत्तेः** = नरकायुष्कतावचनाघटमानतापत्तेः।

यदि हि प्राणातिपातादिकं सविशेषणं न गृह्यते, तर्हि तृतीयसूत्रोक्ताशुभदीर्घायुष्कतावचनानुपपत्तिः स्यात्। तस्मात् प्राणातिपातादिकं सविशेषणं अवश्यं वाच्यम्, ततश्च प्रथमसूत्रेऽनन्तरोक्ता सापेक्षैवाऽल्पायुष्कताऽवसेयेति अन्वयभावार्थः।

**ननु** अशुभदीर्घायुष्कतावचनं किमर्थं न घटते? इति शङ्कायामाह - **न हि सामान्यहेतोः** = प्रथमसूत्रेऽपि प्राणातिपातादि निर्विशेषणं, तृतीयेऽपि तथैव, ततश्च उभयत्र सामान्यं प्राणातिपातादि, तादृशात्कारणात् **कार्यवैषम्यं** = 'प्रथमसूत्रोक्तात् प्राणातिपातात् २५६ आवलिकाप्रमाणमल्पायुष्कं, तृतीयसूत्रोक्तात्प्राणातिपातात् अशुभदीर्घायुष्कं (नरकायुरिति भावः)' इत्येवं कार्यवैपरीत्यं न युज्यते।

यदि च प्रथमसूत्रे जिनपूजाद्यर्थं प्राणातिपातादि गृह्यते, अल्पायुष्कं च सापेक्षमेव शुभं गृह्यते, तृतीयसूत्रे तु निष्ठुरतादिना क्रियमाणं प्राणातिपातादि गृह्यते, दीर्घायुष्कं च फलं गृह्यते, तर्हि कारणयोर्भेदात् कार्यभेद इति कृत्वा न कोऽपि दोषः स्यादिति।

**ननु** एकस्मिन्नपि वस्तुनि विषमकार्यजननशक्तिर्दृश्यते। तथाहि -यो हि दण्डो घटमुत्पादयति, स एव दण्डो घटनाशकोऽपि भवति। एवं च एक एव दण्डो घटोत्पादविनाशरूपे विषमे कार्ये कर्तुं समर्थः, एवमेव समानमपि प्राणातिपाताद्यल्पायुष्कं दीर्घायुष्कं चेत्येवं विषमे द्वे कार्ये करोतु नाम, को दोषः? इति शङ्कायां युक्त्यन्तरमाह - **अपि च** इत्यादि। 'अशुद्धदानं अल्पतरपापबहुतरनिर्जरायाः कारणम्'इत्येवं अग्रे भगवत्यां सुधर्मस्वामी अभिधास्यति, ततश्च **नैव इयं** = प्रथमसूत्रोक्ता **क्षुल्लकभवग्रहणरूपा** = २५६ आवलिकाप्रमाणरूपा **अल्पायुष्कता।**

**ननु** अशुद्धदानं अल्पतरपापबहुतरनिर्जरायाः कारणं भवतु, क्षुल्लकभवग्रहणस्यापि कारणं भवतु को नाम दोष इति शङ्कायामाह - **न हि स्वल्पपापेत्यादि** । 'ननु किमर्थ न सम्भाव्यते?' इत्यत आह **जिनपूजाद्यनुष्ठानस्यापि** = आस्तामशुद्धदानस्य **तथात्वप्रसङगात्** = क्षुल्लकभवग्रहणनिमित्तत्वप्रसङ्गात्।

अयं भावः - यदि हि अल्पपापबहुनिर्जराकारणमपि अशुद्धदानं क्षुल्लकभवग्रहणकारणं भवेत्, तर्हि अल्पपापबहुनिर्जराकारणं जिनपूजादिकमपि क्षुल्लकभवग्रहणकारणं भवेत्, न्यायस्य समानत्वात्। न चैतदिष्टं, तस्मात् यथा जिनपूजादिकं अल्पपापबहुनिर्जराकारणं सत् सापेक्षस्यैव शुभाल्पायुष्कस्य कारणं, तथैवाशुद्धदानमपीत्येवमवश्यं मन्तव्यमिति।

यत्तु 'एक एव दण्डो विरुद्धमपि कार्यद्वयं करोति' इत्यादि उक्तम्, तत्र प्रथमं तु पूर्वपक्षस्येयमेवापत्तिः, यदुत एवं सति एकमेव जिनपूजादिकं एकत्र मोक्षं अन्यत्र च नरकं साधयतीति वक्तव्यं स्यात्, न चैतत्पूर्वपक्षस्यापीष्टम्। तस्मात्

'सामान्यकारणात् कार्यवैषम्यं नैव' इत्येवमेव मन्तव्यम्।

भवता यत् एकेनैव दण्डेन विरोधि कार्यद्वयं उच्यते तदपि तुच्छम्। यस्मात् न केवलं दण्ड एव कारणम्, अपि तु चक्रभ्रमणादिकमपि । ततश्च यत्र चक्रभ्रमणादिकं तत्र दण्डो घटमुत्पादयति, यत्र च हस्तेन घटे प्रतिघातक्रिया तत्र दण्डो घटं ध्वंसयति। एवं च चक्रभ्रमणप्रतिघाताभ्यां परस्परं विभिन्नाभ्यां एव कारणाभ्यां विषमं कार्यद्वयं दृश्यते।

प्रस्तुतेऽपि प्रथमसूत्रे तृतीयसूत्रे च प्राणातिपातादिकं भवतु नाम सदृशं, परन्तु प्रथमसूत्रे जिनगुणसाधुगुणपक्षपातादिविशेषणयुक्तं प्राणातिपातादिकं, तृतीये तु न तथा इति कारणभेदात् प्रथमसूत्रे सापेक्षमल्पायुष्कं, तृतीये तु अशुभदीर्घायुष्कं इति कार्यवैषम्यमिति न कोऽपि दोष इत्यलमतिविस्तरेण।

अत्र स्थानाङ्गवृत्तिगतं व्याख्यानं दृष्ट्वा भवतीयमाशङ्का - ननु अत्र वृत्तौ **'न हि स्वल्पपाप... तथात्वप्रसङ्गात्'** इति यत्प्रतिपादितम्, तेन तु ज्ञायते यदुतात्रापि 'जिनपूजादिकं स्वल्पपापबहुनिर्जराकारणं' इति। तत्र च स्वल्पपापं तु जलादिविराधनाजन्यमेवेति अभयदेवसूरिणा बाह्यविराधनातोऽपि स्वल्पपापबन्धः प्रतिपादित एव ←इति।

महोपाध्याया एनामाशङ्कां मनसिकृत्वैव समादधति - **एतेन** = 'विधिसामग्र्ये तु स्वल्पमपि पापं वक्तुमशक्यमेव' इति यत् प्राक्प्रसाधितं, तेन **इति व्याख्यानेऽपि** अभयदेवसूरिकृते स्थानाङ्गव्याख्यानेऽपि, न केवलं चतुर्थपञ्चाशकवृत्तावेवेत्यपिशब्दार्थः, **विधिवैकल्यवत्येव** न तु विधिसम्पूर्णाऽपीति एवकारार्थः। **जिनपूजा ग्राह्या इति द्रष्टव्यम्।**

अयं भावः महोपाध्यायानाम्।

विधिसम्पूर्णायां जिनपूजायां स्वल्पोऽपि पापबन्धो नास्त्येव,

विधिविकलायां तु भक्तियुतायां जिनपूजायां विधिवैकल्यात्स्वल्पः पापबन्धः, भक्तिप्रभावादधिकतरा पापनिर्जरेति पूर्वं 'यतनाविशेषेण प्रवर्तमानस्य सर्वथाऽपि कायवधो न भवति' इत्यादि पञ्चाशकवृत्त्यनुसारेण प्रसाधितम्।

स एव वृत्तिकारः स्थानाङ्गवृत्तौ 'जिनपूजाद्यनुष्ठानं स्वल्पपापबहुनिर्जराकारणं' इति स्पष्टमेव स्वीकरोति। तत्र च जिनपूजादिकं किं विधिविकलं ग्राह्यं ? किं वा विधिसहितम् ? इति प्रश्नः।

महोपाध्याया वदन्ति → चतुर्थपञ्चाशकवत् अस्मिन्व्याख्यानेऽपि विधिवैकल्यवत्येव जिनपूजा ग्राह्या, यदि विधिसहिता गृह्येत, तर्हि स्वल्पपापबन्धकारणं नैव स्यादिति प्रागेव प्रतिपादितम्।

**यशो.: अशुद्धदानादिदृष्टान्तैः क्रियमाणाया जिनपूजाया विधिशुद्धाया ग्रहणानौचित्यात्।**

**चन्द्र.:** तथा 'स्थानाङ्गव्याख्यानेऽपि विधिवैकल्यवत्येव ग्राह्या' इत्यत्र युक्त्यन्तरमपि प्रदर्शयन्ति– **'न हि स्वल्पपाप... तथात्वप्रसङ्गात्'** इत्यत्र **अशुद्धदानादिदृष्टान्तैः क्रियमाणायाः** इत्यादि।

अयं भावः – प्रथमसूत्रे त्रीणि अल्पायुष्कताकारणानि प्रदर्शितानि। तत्र प्रथमं पृथिव्याद्यारम्भेण जिनपूजाकरणे प्राणातिपातः, द्वितीयं स्वभाण्डासत्योत्कर्षणादिना जिनपूजाकरणे मृषावादः, तृतीयं आधाकर्मकरणादिनाऽशुद्धं दानम्।

अत्र त्रीण्यपि एकस्यैव कार्यस्य कारणतया गृहीतानीति सदृशानि ग्राह्याणीति स्पष्टम्। तत्र च स्वभाण्डासत्योत्कर्षणं अविधिरेव, एवं आधाकर्मादिनाऽशुद्धदानमपि अविधिः एव, ततश्च तैः सह गृहीता जिनपूजा विधिसहिता ग्रहीतुं नैव शक्यते, अपि तु अविधिसहितैव ग्राह्या। सा च अविधिसद्भावादल्पपापकारणं भवेदेवेति न दोषः।

अन्वयार्थस्त्वेवम्–अशुद्धदानासत्योत्कर्षणादिदृष्टान्तैः क्रियमाणा जिनपूजा विधिशुद्धा ग्रहीतुं नोचिता, किन्तु अविधिसमन्वितैवेति।

**यशो.:** 'काऊण जिणाययणेहिं मण्डियं सयलमेइणीवट्टं दाणाइचउक्केण वि सुट्ठु वि गच्छिज्ज अच्चुअं न परओ' **त्ति महानिशीथे सामान्यतो जिनपूजाया दानादिचतुष्कतुल्यफलकत्वोपदेशेन विशेषे विशेषस्यैव औपम्यौचित्यात्।**

**चन्द्र.: ननु** अशुद्धादिदानस्य यत् अल्पायुष्कताफलं, तदेव विधिशुद्धपूजायाः फलं यदि भवेत्, तर्हि तादृश्येव पूजा ग्राह्या भवेत्। उपरितनमनुष्ठानमशुद्धं सत् हीनं फलं ददाति, अधस्तनमनुष्ठानं शुद्धं सत् उत्तमं फलं ददातीति कुत्रचित् द्वयोः फलं समानमपि स्यात्। यथा अशुद्धं सर्वविरतिचारित्रं मोक्षं न ददाति, किन्तु सौधर्मदेवलोकं, शुद्धं तु जिनपूजासामायिकप्रभृतिकमपि सौधर्मदेवलोकं ददातीति एवमत्रापि अशुद्धदानादिकं मोक्षं मुक्त्वाऽल्पपापबहुनिर्जराऽल्पायुष्कतारूपं फलं ददाति, शुद्धं तु जिनपूजादिकमपि मोक्षं मुक्त्वा तदेव फलं ददातीति प्रथमसूत्रे अशुद्धदानादिभिः सह शुद्धा जिनपूजा किमर्थं न गृह्यते? इत्याशङ्कायामाह –

**काऊण जिणाययणेहिं** इत्यादि। गाथाया अन्वयो भावार्थश्चायम्। जिनायतनैः सकलमेदिनीवृत्तं = सकलपृथ्वीवर्तुलं मण्डितं कृत्वा तथा सुष्ठ्वपि दानादिचतुष्केनाऽपि अच्युतं गच्छेत्, न परतः = अच्युतादुपरि गच्छेत् इति। **महानिशीथे** छेदग्रन्थविशेषे **सामान्यतो** = अशुद्धदानस्वभाण्डासत्योत्सर्पणादिरूपं विशेषं अनुक्त्वा **जिनपूजाया दानादिचतुष्कतुल्यफलकत्वोपदेशेन** = दानादिचतुष्केनाऽपि उत्कर्षतो अच्युतं यावत् गमनं, जिनायतनैः पृथ्वीमण्डनकरणलक्षणया जिनपूजयाऽपि च उत्कर्षतो अच्युतं यावद् गमनं इत्येवं य उपदेशः = निरूपणं, तेन **विशेषे** = अशुद्धदानादिरूपे विशेषे **विशेषस्यैव** = अशुद्धाया एव जिनपूजायाः,

'न तु शुद्धायाः' इत्येवकारार्थः, **औपम्यौचित्यात्** = स्थानाङ्गवृत्तौ यत् 'जिनपूजाद्यनुष्ठानस्यापि तथात्वप्रसङ्गात्' इत्यादिना प्रतिपादितं, तदौचित्यात्।

अयं भावः -

'दानादिचतुष्कं जिनायतनैः पृथ्वीमण्डनरूपा जिनपूजा च अच्युतफलवती' इति महानिशीथे प्रतिपादितमस्ति। अत्र दानादिचतुष्कं शुद्धमशुद्धं वेति न विशेषतः प्रतिपादितम्। अपि तु सामान्यत एव दानादिचतुष्कं प्रतिपादितम्। एवं जिनपूजा शुद्धाऽशुद्धा वेति न विशेषतो गृहीतं, किन्तु सामान्यत एव जिनपूजा गृहीता।

इत्थं च महानिशीथे सामान्यतो दानादिचतुष्कस्य सामान्यतश्च जिनपूजायाः समानं फलं प्रतिपादितम्। तथा च समानफलदायकत्वेन सामान्यतो दानादिचतुष्कं सामान्यतो जिनपूजा चोभयमपि परस्परं समानमेव सञ्जातम्।

स्थानाङ्गे चाशुद्धदानस्याल्पायुष्कतारूपं फलं प्रतिपादितम्, न तु सामान्यतो दानस्य, ततश्च स्थानाङ्गे विशेषस्वरूपं दानं गृहीतम्, तेनैव सह **'जिनपूजाद्यनुष्ठानस्यापि तथात्वप्रसङ्गात्'** इत्यादिना जिनपूजाया औपम्यं कृतम्। ततश्च तत्र विशेषस्वरूपेण दानेन सह विशेषस्वरूपस्यैव जिनपूजाद्यनुष्ठानस्यौपम्यमुचितं इति स्पष्टम्। ततश्च यदि अत्र अशुद्धं दानं विशेषः, तर्हि तेन सह अशुद्धजिनपूजादिरूपस्यैव विशेषस्यौपम्यं युज्यत इति।

यच्च भवता 'अशुद्धचारित्रस्य शुद्धजिनपूजादिकस्य समानं फलं, ततश्चात्रापि अशुद्धदानस्य शुद्धजिनपूजायाश्च समानं फलं भविष्यति' इत्यादि निगदितम्, तन्न युक्तम्। यतस्तत्र सामान्यतश्चारित्रस्य सामान्यतो जिनपूजादिकस्य च समानं फलं कुत्रापि न निगदितम्, किन्तु चारित्रस्य विशिष्टं फलं, जिनपूजादिकस्य हीनं फलं प्रतिपादितमस्तीति अशुद्धचारित्रस्य शुद्धजिनपूजादिकस्य फलसाम्यं सम्भवेत्।

प्रकृते तु नैवम्। यस्मादत्र सामान्यतो दानादिचतुष्कस्य सामान्यतो जिनपूजायाश्च समानं फलं प्रतिपादितमेव, ततश्च यदा अशुद्धदानादिरूपस्य विशेषस्य ग्रहणं क्रियते, तदा तेन सह गृह्यमाणा जिनपूजाऽपि विशेषरूपैव ग्रहीतुमुचितेति।

अत्यन्तमप्रमत्तेन प्रस्तुतः पदार्थो भावार्थश्च भावनीय इति।

**यशो.: किञ्च** - "संविग्गभावियाणं लुद्धयदिट्ठंतभावियाणं च। मुत्तूण खित्तकालं भावं च कहंति सुद्धुंछं"।। **(बृहत्कल्पभाष्ये गा. १६०७) इत्येतत्पर्यालोचनया लुब्धकदृष्टान्तभाविताना-मागमार्थाऽव्युत्पन्नानामेव अशुद्धदानसम्भवस्तादृशानामेव च जिनपूजासम्भवोऽपि विधिवैकल्यवानेव सम्भवतीति।**

**चन्द्र.:** 'अशुद्धदानादिदृष्टान्तैः क्रियमाणा जिनपूजा विधिरहितैव ग्राह्या' इत्यत्र युक्त्यन्तरमाह – **किञ्चेत्यादि।** प्रथमं भावार्थः प्रतिपाद्यते।

गृहस्था द्विविधाः – संविग्नभाविताः पार्श्वस्थादिभिः लुब्धकदृष्टान्तभाविताश्च। तत्र संविग्नभाविताः संविग्नैः भावितत्वादेव शुद्धमेव दानं प्रयच्छन्ति, पार्श्वस्थादिभिः भावितास्तु लुब्धकदृष्टान्तभावितत्वादेवाशुद्धमपि दानं प्रयच्छन्ति। पार्श्वस्थादयश्च लुब्धकदृष्टान्तं तान् प्रतीत्थं प्रतिपादयन्ति यथा 'लुब्धकानां मृगान् प्रति धावनं श्रेयः, तेषां हननं श्रेयः, मृगाणां तु तेभ्यः पलायनं श्रेयः, द्वयेऽपि स्वोचितं कार्यं कुर्वन्ति। एवं हे गृहस्थाः, भवन्तो लुब्धकसदृशाः, वयन्तु मृगसदृशाः। अशुद्धदानं च अस्मद्धननसदृशं। भवतां हि केनाऽपि प्रकारेणास्माकं अशुद्धमपि दानं कर्त्तव्यं, तदेव च भवतां श्रेयः, अस्माकं तु तदग्रहणं श्रेयः, सर्वैः स्वोचिते कर्त्तव्ये यतितव्यम्'इति।

एवं च श्रुत्वा ते गृहस्था अशुद्धदानेऽपि प्रगुणा भवन्तीति।

अत्र च यः संविग्नगीतार्थो धर्मोपदेशकः, तेन गृहस्थान् प्रति क उपदेशो दातव्य इति शास्त्रे प्रतिपादितम्। यदुत तादृशोपदेशकेन सर्वेभ्यः शुद्धदानस्यैवोपदेशो दातव्यः, यत्र तु अल्पदायकादिरूपं विशिष्टं क्षेत्रं, दुष्कालादिरूपो विशिष्टः कालः, ग्लानत्वादिरूपो विशिष्टभावश्च, तत्राशुद्धदानस्यावश्यकतायां सत्यां सर्वेभ्योऽशुद्धदानस्याप्युपदेशं ददाति इति।

अत्र क्षेत्रकालभावविशेषं विना यदोत्सर्गतः सर्वेभ्यः शुद्धदानप्ररूपणं क्रियते, तदा संविग्नभावितश्रोतॄन् प्रति स उपदेशो पिष्टपेषणतुल्य एव, यतस्ते प्रस्तुतोपदेशं विनाऽपि शुद्धमेव दानं प्रदातुं प्रवणा इति।

यदा तु क्षेत्रादिविशेषमाश्रित्याशुद्धदानोपदेशो दीयते, तदा लुब्धकदृष्टान्तभावितान् प्रति स उपदेशः पिष्टपेषणतुल्यः, यतस्ते प्रस्तुतोपदेशं विनाऽपि अशुद्धं दानं प्रदातुं प्रगुणा एवेति।

इत्थं च शास्त्रपाठानुसारेण निश्चीयते यदुत अशुद्धदानं लुब्धकदृष्टान्तभाविता एव कुर्वन्ति, न तु संविग्नभाविताः। ते तु यदा जिनपूजां कुर्वन्ति, तदा अशुद्धदानवत् मुग्धत्वात् अविधिसहितामेव कुर्वन्ति, ततश्च तैः क्रियमाणा जिनपूजाऽल्पतरपापबहुनिर्जरायाः कारणं स्यादेवेति स्थानाङ्गसूत्रे येऽशुद्धदानादयो दृष्टान्ता गृहीताः, तैः क्रियमाणा जिनपूजाऽपि मुग्धैः क्रियमाणत्वात् अविधियुतैव सम्भवतीति अविधिबलात् साऽल्पपापबन्धकारणं भवतु नाम, न काऽपि बाधाऽस्माकं, 'विधिशुद्धा जिनपूजा लेशतोऽपि पापबन्धकारणं नास्त्येव'इत्यस्माकमभिप्रायादिति।

अधुनाऽक्षरार्थः।

**संविग्गभावियाणं** = संविग्नसाधुभिः भावितानां गृहस्थानां **लुद्धयदिट्ठंतभावियाणं च** = लुब्धकदृष्टान्तैः भावितानां च गृहस्थानां **खित्तकालं** = जनरहितं दीर्घाध्वानं दुष्कालादिकं वा **भावं च** = स्वस्य ग्लानत्वादिकं च **मुक्त्वा कहंति** = कथयन्ति **सुद्धुंछं** = शुद्धदानं संविग्नगीतार्थोपदेशकाः। तादृशक्षेत्राद्यभावे शुद्धदानं तादृशक्षेत्रादिसद्भावे तु अशुद्धदानं गृहस्थान् प्रति कर्त्तव्यतयोपदिशन्तीति भावः।

**एतत्पर्यालोचनया** = अस्या गाथायाः पर्यालोचना = विचारणा यदा क्रियते, तदा तया एतन्निश्चीयते, यदुत **लुब्धकदृष्टान्तभावितानां** = अनन्तरोक्तानां **आगमार्थाऽव्युत्पन्नानामेव** = 'दुल्लहा उ मुहादाइ, मुहाजीवि वि दुल्लहा' इत्यादिना 'पिंडं असोहंतो नत्थि चरित्ती' इत्यादिना चागमेनापरिणतमतिमतामेव, 'न तु उत्सर्गापवादपरिणतिशालिनाम्' इत्येवकारार्थः **अशुद्धदानसम्भवः** = तेऽतिपरिणता एवाशुद्धदानं ददातीति, **तादृशानामेव च** = 'अशुद्धदानं श्रेयः' इत्यादिमुग्धतासम्पन्नानामेव च, अर्थात् शुद्धतात्मकविधिं प्रति प्रमादोपेक्षादिशालिनामेव च, न तु शुद्धदानं प्रति भक्तिश्रद्धादिसमन्वितानां इत्येवकारार्थः, **जिनपूजासम्भवोऽपि** आस्तां तावत् अशनादिदानं, किन्तु जिनपूजासम्भवोऽपीति 'अपि' शब्दार्थः **विधिवैकल्यवानेव** सम्भवतीति।

यो हि विधिं प्रति उपेक्षादिमान् भवति, स विधिमाहात्म्यज्ञानाद्यभावात् अशनादिदाने विधिवैकल्यवत् जिनपूजायामपि विधिवैकल्यं समाचरेदेवेति स्थानाङ्गसूत्रे योऽशुद्धदानदाता प्रदर्शितः, तस्य पूजाऽपि विधिवैकल्यवती, अत एव च अल्पपापबन्धादिकारणं भवतु नाम, किन्तु विधिशुद्धा तु नैवाल्पस्यापि पापस्य बन्धकारणं स्यादिति।

**यशो.: यत्तु-गुणवते पात्रायाऽप्रासुकादिद्रव्यदाने चारित्रकायोपष्टम्भान्निर्जरा, व्यवहारतो जीवघातेन चारित्रबाधनाच्च पापं कर्म्म, तत्र स्वहेतुसामर्थ्यापेक्षया बहुतरा (निर्जरा) निर्जरापेक्षया च अल्पतरं पापं भवति, तच्च कारण एव, यत उक्तं -**

'संथरणंमि असुद्धं दुण्ह वि गिह्णंत दिंतयाणऽहियं।
आउरदिट्ठंतेणं तं चेव हियं असंथरणे।।' (निशीथभाष्य गा. १६५०) त्ति

**चन्द्र.:** वचनान्तरं प्रदर्श्य तद् विधिशुद्धपूजया सह योजयन्नाह - **यत्तु** इत्यादि। अत्र **यत्तु** इत्यादेरारभ्य **तं चेव हियमसंथरणे** इत्येतदन्तं यावत् वचनान्तरं, **तद् गीतार्थेत्या**देरारभ्य **द्रष्टव्यः** इत्येतदन्तं यावत् महोपाध्यायकृतं समाधानमिति।

अत्रापि प्रथमं भावार्थः प्रतिपाद्यते, पश्चादक्षरार्थ उच्यते।

केचिदित्थं प्रतिपादयन्ति → (यत्केनचिदुच्यते यदुत) सुपात्राय यदाऽशुद्धदानं दीयते, तदा सुपात्रगतस्य चारित्रकायस्य उपष्टम्भो भवतीति कृत्वा निर्जरा भवति। अशुद्धदाने व्यवहारतो या जीवविराधना भवति, तया सुपात्रगतस्य चारित्रस्य बाधो भवतीति कृत्वा दातुः पापं कर्म भवति।

अत्र निर्जराऽधिका? पापकर्म वा? इति प्रश्नः। तत्र समाधानं त्विदम् - यदुत निर्जराया हेतुः चारित्रकायपोषणं, तस्य सामर्थ्यं पापकर्मबन्धकारणापेक्षयाऽधिकं इति कृत्वा निर्जराऽधिका भवति। पापकर्मणो हेतुस्तु व्यवहारतो जीवघातेन चारित्रबाधः, तस्य च सामर्थ्यं निर्जराकारणापेक्षयाऽल्पमिति कृत्वा पापकर्मबन्धोऽल्पो भवतीति।

तत्सत्यमेव, परन्तु यदा साधोः जनपदविरहितदीर्घमार्गो दुष्कालो ग्लानत्वादिकं वा कारणं भवेत्,

तदैव तन्मतं सत्यं मन्तव्यम्। अर्थात् कारणे सति यदाऽशुद्धदानं दीयते, तदैव तदशुद्धदानं अल्पतरपापबहुतरनिर्जराकारणं मन्तव्यम्, न तु कारणाभावे। यस्मात् कारणाभावे तु यदशुद्धदानं दीयते, तत् दातृगृहीत्रोः उभययोरपि अहितकारि प्रोक्तम्। न च यत् अल्पपापबहुनिर्जराकारणं, तत् 'अहितकारि' इति वक्तुं युज्यत इति।

तथा च कारणे सति सुपात्रायाशुद्धदानं अल्पपापादिकारणं, कारणाभावे तु सुपात्राय अशुद्धदानं अहितकारि इति।

अत्र केषाञ्चिन्मतं समाप्तम्।

एतदेव मतं **यत्तु** इत्यादिना **असंथरणे** इत्यन्तेन पाठेनात्र प्रदर्शितम्।

अक्षरार्थस्तु भावार्थानुसारेण सुगम एव। नवरं निशीथभाष्यगाथायाः स्पष्टार्थस्त्वयम् → **संस्तरणे** = **निर्वाहे** सति **अशुद्धं** अशनादिकं **गृह्णद्ददतोः द्वयोरपि अहितं** भवति। **असंस्तरणे** सति **तदेव च** = अशुद्धं **आतुरदृष्टान्तेन** = रोगिदृष्टान्तेन **हितं** भवति।

ग्लानत्वाद्यभावे सति साधोर्यदा अशुद्धं विनाऽपि निर्वाहो भवति, तदा यदि गृहस्थोऽशुद्धं ददाति, साधुश्च गृह्णाति, तदा निष्कारणं आज्ञाभङ्गादिदोषप्रवृत्तिसकाशादहितं भवति।

यदा तु ग्लानत्वादिवशात् अशुद्धं विना निर्वाहो न भवति, तदा अशुद्धग्रहणदानकरणे उभययोरपि हितं भवति।

यथा नीरोग्यवस्थायां यदौषधं अहितकारि, रोग्यवस्थायां तदेव हितकारि। ← इति।

अत्र केषाञ्चिन्मते कारणे सति अशुद्धदानं अल्पपापादिकारणं प्रतिपादितम्। कारणाभावे तु अहितमेव प्रतिपादितम्। ततश्च भवतीयमाशङ्का यदुत 'हे महोपाध्यायाः। यतनासत्त्वे अल्पोऽपि पापबन्धो नैव स्यात् इति भवतां मतम्। प्रकृतमते तु कारणे सति अशुद्धदानं अल्पपापादिकारणं प्रतिपादितमेव। कारणे सति अशुद्धदानं तु विधिस्वरूपयतनासमन्वितमेव, ततश्च भवदुक्तरीत्याऽत्राल्पोऽपि पापबन्धो नैव भवितुमर्हति, परन्तु कैश्चित्तदुच्यत एव। ततश्च किमत्र समाधानमिति प्रकाशयन्तु भवन्तः' इति

**यशो. : तद् गीतार्थाद्यन्यतरपदवैकल्य एव युज्यते, तत्साकल्ये स्वल्पस्यापि पापस्याऽसम्भवात्,**

महोपाध्यायाः प्राहुः – **तद् गीतार्थाद्यन्यतरपदवैकल्य एव युज्यते** इत्यादि। अयं भावः – 'अशुद्धग्रहणं कः करोति?' इत्यत्र शास्त्रे व्यवस्था कृताऽस्ति यदुत (१) यो गीतार्थो भवति, (२) यश्च कृतयोगी भवति, (योगोद्वहनादिना तपोभावितदेहो भवतीति यावत्) (३-४) यश्च रागरहितो द्वेषरहितश्च भवति, (५) यश्च सकारणो भवति, (६) यश्च बहुतरासत्प्रवृत्तेः या विनिवृत्तिः, तस्याः साधिकां चेष्टां यतनात्मिकामाचरति, स अशुद्धग्रहणेऽधिकारी भवति।

तथा च गीतार्थत्वं कृतयोगित्वं रागरहितत्वं द्वेषरहितत्वं कारणसहितत्वं यतना चेत्येवमेतानि पदानि यस्य समीपेऽस्ति, स अशुद्धग्रहणेऽधिकारीति। एतादृशः साधुः यदि अशुद्धग्रहणं करोति, तर्हि तस्य अल्पोऽपि पापकर्मबन्धो नास्त्येव। किन्तु प्रकृतानां पदानां मध्यात् प्रथमस्य द्वितीयस्य तृतीयादेर्वाऽभावे यदि स अशुद्धं गृह्णाति, तर्हि स अविधिं करोति, ततश्च अविधिप्रयुक्तोऽल्पकर्मबन्धस्तस्य भवत्येव।

इत्थं चात्रापि यदि सर्वपदैः समन्वितोऽशुद्धग्रहणं करोति, तर्हि तस्य तद्ग्रहणं विधिशुद्धमेवेति नाल्पोऽपि पापबन्धः, गीतार्थत्वाद्यन्यतरपदविकलस्तु अशुद्धग्रहणं यदि करोति, तर्हि तत् अविधिसमन्वितमिति कृत्वा भवत्येवाल्पपापबन्ध इति।

**गीतार्थान्यतर** इत्यशुद्धोऽयं पाठः प्रतिभाति, गीतार्थत्वाद्यन्यतरपदवैकल्य इत्येवं पाठो युक्त आभाति।

**तत्साकल्ये** = गीतार्थत्वादीनां पदानां सम्पूर्णतायां सत्यां **स्वल्पस्यापि** = आस्तां बहोरिति अपिशब्दार्थः **पापस्यासम्भवात्।**

**यशो.: व्यवहारतो बाधकस्याबाधकत्वात्,**

**चन्द्र.: ननु** 'व्यवहारतो जीवघातेन चारित्रबाधनाच्च पापं कर्म' इति उक्तमेवेति चेत्, असत्यं तत्, यस्मात् **व्यवहारतो बाधकस्य** = अविध्यभावेन निश्चयतस्तावत् लेशतोऽपि चारित्रस्य बाधको जीवघातो नास्त्येव। यस्तु बाह्यहिंसामात्रादेव व्यवहारतो बाधको जीवघातः, स चारित्रस्य बाधको नैव भवतीति तत्र स्वल्पोऽपि पापबन्धो नास्त्येवेति स्पष्टम्।

**यशो.: स्वहेतुसामर्थ्यस्य द्रव्यभावाभ्यामुपपत्तेः।**

**चन्द्र.: ननु** 'स्वहेतुसामर्थ्यापेक्षया बहुतरा निर्जरा, निर्जरापेक्षया चाल्पतरं पापं भवति' इति पूर्वमुक्तम्। यदि च व्यवहारतो बाधको जीवघातः सर्वथैवाबाधकः, तर्हि तत्र अल्पतरपापस्यैवाभावात् तद्धेतोः सामर्थ्यमपि वक्तुमशक्यमेवेति चेत् न, **स्वहेतुसामर्थ्यस्य** = अल्पपापात्मकं यत् स्वं, तस्य हेतुभूतो यो जीवघातः, तत्सामर्थ्यस्य **द्रव्यभावाभ्यां उपपत्तेः।**

अयमाशयः – गीतार्थत्वादिपदसाकल्ये सति जीवघातस्याल्पपापकारणतासामर्थ्यं द्रव्यत एवेति तत्र जीवघातो न लेशतोऽपि पापकर्मबन्धं प्रति कारणं भवति।

गीतार्थत्वाद्यन्यतरपदवैकल्ये तु जीवघातस्याल्पपापकारणतासामर्थ्यं भावत इति तत्र जीवघातोऽल्पपापबन्धकारणं भवति।

एवं चाल्पपापबन्धरूपस्य स्वस्य हेतुर्यो जीवघातः, तस्य सामर्थ्यं द्रव्यभावाभ्यां द्विविधमस्ति। ततश्च गीतार्थत्वाद्यन्यतरपदवैकल्ये एव तस्य भावतः सामर्थ्यं, तदेव चाल्पपापकारणं, सर्वपदसाकल्ये तु तस्य द्रव्यतः सामर्थ्यं, तत्तु नाल्पस्यापि पापस्य कारणमिति।

**यशो.: अयमेवातिदेशो विधिशुद्धजिनपूजायां द्रष्टव्यः ।**

**चन्द्र.:** एवं तावत् गीतार्थत्वादिपदसाकल्ये अशुद्धग्रहणं नाल्पस्यापि पापस्य कारणमिति प्रतिपादितम्, अधुना एतदेव सर्वं विधिशुद्धायां जिनपूजायां योजयन्नाह – **अयमेवातिदेश** इत्यादि। एकत्र प्रतिपादितस्य तत्त्वस्यान्यत्र निर्देशमात्रं अतिदेशः। प्रकृते तु गीतार्थत्वादिपदसाकल्ये सति अशुद्धग्रहणे स्वल्पस्यापि पापस्याभावरूपो यः पदार्थः प्रतिपादितः, स एव अतिदेशस्वरूपः सन् **विधिशुद्धजिनपूजायां** द्रष्टव्यः।

अयं भावः–यद्यपि विधिशुद्धजिनपूजायां जीवघातो भवति, तथापि तस्याल्पपापं प्रति सामर्थ्यं द्रव्यत एवेति स अल्पपापं तत्र न बध्नाति। अविधियुतायां तु जिनपूजायां तस्याल्पपापं प्रति सामर्थ्यं भावत इति स अल्पपापं बध्नाति तत्रेति।

**यशो.: अन्यैस्तु - अकारणेऽपि गुणवत्पात्रायाप्रासुकादिदाने परिणामवशात् बहुतरा निर्जरा अल्पतरं च पापकर्मेति च प्रतिपादितम्, परिणामप्रामाण्यात् । ''संथरणंमी०'' त्यादौ अशुद्धं द्वयोरपि दातृगृहीत्रोरहितायेति च व्यवहारतः संयमविराधकत्वात् दायकस्य लुब्धकदृष्टान्तभावितत्वेनाव्युत्पन्नत्वेन च देवगतौ शुभाल्पाऽऽयुष्कतानिमित्तत्वादिति योजितम्।**

**चन्द्र.:** सुपात्रायाशुद्धदाने केषाञ्चिन्मतं प्रदर्श्य, तत्र च स्वाभिप्रायं स्पष्टीकृत्याधुना तत्रैवान्येषां मतं प्रतिपादयन्नाह – **अन्यैस्तु** इत्यादि। अत्र **अन्यैस्तु** इत्यस्य **योजितम्** इत्यनेन सहान्वयः कर्त्तव्यः।

अत्रापि प्रथमं भावार्थो निगद्यते, पश्चादक्षरार्थः।

पूर्वं यत्प्रतिपादितं यदुत ''कारणे सत्येव सुपात्रस्याशुद्धदानं द्वयोर्हिताय, कारणाभावे तु अहिताय'' इत्यादि। तन्न, यस्मात् कारणाभावेऽपि यदा सुपात्रस्य भक्तिभावेनाशुद्धं दानं दीयते, तदा भक्तिपरिणाममाहात्म्यात् बहुतरा निर्जरा, मुग्धतावशाच्चाल्पपापकर्म भवति। बहुतरनिर्जराऽल्पपापकर्मकारणं च हितायैवेति।

यत्तु '**संथरणंमि असुद्धं**' इत्यादिगाथायामकारणेऽशुद्धदानग्रहणयोः पक्षद्वयं प्रत्यहितत्वं प्रतिपादितम्, तत्तु सापेक्षमेवाहितं ग्राह्यम्। यस्मात्तत्र सुसाधुः व्यवहारतः संयमविराधको भवतीति कृत्वा तदशुद्धं तस्याहितम्। दायकस्तु गृहस्थो लुब्धकदृष्टान्तभावितः, अत एवाव्युत्पन्न इति कृत्वा देवगतौ अल्पायुष्कतां प्राप्नोतीति कृत्वा तदशुद्धं तस्याहितम्।

ततश्च यथा व्यापारे पञ्चकोटिधनप्राप्तिसम्भवेऽपि मुग्धतादिदोषादेककोटिधनप्राप्तौ सत्यां 'व्यापारिणोऽहितमभवत्' इत्युच्यते, एवमेवात्रापि सुसाधोः यदहितं उच्यते, तत् व्यवहारतोऽपि संयमविराधकसाध्वपेक्षया। एवं दायकस्य यदहितमुच्यते, तत् परिणतदायकसम्बन्धिदीर्घशुभायुष्कफलापेक्षया, न तु वस्तुतोऽहितं तदिति।

एवं अन्येषां मतं प्रतिपादितम्।

अक्षरार्थस्तु भावार्थानुसारेण प्रायः सुगम एव। नवरं **परिणामप्रामाण्यात्** = 'कर्मबन्धादौ अध्यवसाय एव प्रमाणं इति' भद्रबाहुस्वामिवचनसिद्धादध्यवसायप्रामाण्यादिति।

**व्यवहारतः संयमविराधकत्वात्** = सुसाधुः कारणं विनाऽशुद्धं नैव गृह्णाति, यदि च तेन गृहीतं, तर्हि अनाभोगत एव, ततश्च तस्य व्यवहारत एव संयमविराधकत्वं, न तु निश्चयत इति। **अव्युत्पन्नत्वेन च** = अतिपरिणतत्वेन। उत्सर्गैकरुचिरपरिणतरूपोऽव्युत्पन्नः, अपवादैकरुचिरतिपरिणतरूपोऽव्युत्पन्नः, स्याद्वादरुचिस्तु व्युत्पन्न इति।

**यशो.: अयमतिदेशोऽव्युत्पन्नीयपूजायां दृष्टव्य इति ॥४॥**

**चन्द्र.:** एवमन्येषां मतं प्रदर्श्य जिनपूजायां तद् योजयन्नाह - **अयमतिदेशोऽव्युत्पन्नीयपूजायां दृष्टव्य इति।** यथा निष्कारणमशुद्धं ददानस्य भक्तिवशादविवेकवशाच्च क्रमशो बहुतरा निर्जरा अल्पपापं च, तथैव प्रमादादिनाऽविधियुतां पूजां कुर्वाणस्य भक्तिवशात् बहुतरा निर्जरा, प्रमादादिजन्याविधिवशाच्चाल्पपापबन्ध इत्येवं योजनं कर्त्तव्यमिति भावः। इयं च पूजा अव्युत्पन्नेनैव क्रियत इति कृत्वाऽव्युत्पन्नीया जिनपूजोच्यते।

समाप्ता चतुर्थी गाथा।

❋ ❋ ❋

**यशो.: तदिदं अखिलं मनसिकृत्याह -**

**सम्भावणे विसद्दो दिट्ठंतोऽणणुगुणो पयंसेइ।**
**सामण्णाणुमिईए सूरी पुण अंसओ बाहं ॥५॥**

**चन्द्र.:** अधुना पञ्चमगाथायाः प्रस्तावनामाह - **तद्** = अनन्तरोक्तं प्रसिद्धं **इदं** = प्रत्यासन्नं एव **अखिलं** = सर्वं **मनसिकृत्य** = उपयोगविषयीकृत्य **आह** -

पञ्चमगाथायाः संस्कृतछाया अन्वयश्च।

**सम्भावनेऽपिशब्दोऽस्ति दृष्टान्तोऽननुगुणः।**
**सूरिः पुनः सामान्यानुमितौ अंशतो बाधं प्रदर्शयति।॥५॥**

**यशो.: सदोषमपि स्नाना(दी)त्यत्रापिशब्दः सम्भावने, तेन न सर्वं सदोषमेव, यतनादिसत्त्वे भावोत्कर्षे दोषाभावात्। दृष्टान्तोऽशुद्धदानरूपः शुद्धजिनपूजायामननुगुणोऽननुकूलः। सूरिः = अभयदेवसूरिः पुनः, सामान्यानुमितौ = स्नानत्वपूजात्वाद्यवच्छेदेन निर्दोषत्वानुमितौ ''न चैतदाऽऽगमानुपाती'' त्यादिना अंशतो बाधं प्रदर्शयति। विधिविरहितायाः पूजायाः कर्दमोपलेपादितुल्याल्पदोषदुष्टत्वात्।**

**चन्द्र.: सदोषमपि स्नानादि** इत्यादि।

अयं भावः – प्रस्तुतग्रन्थद्वितीयगाथावृत्तौ चतुर्थपञ्चाशकगतदशमगाथावृत्तिः प्रदर्शिता, तत्र च अभयदेवसूरिणाऽनुमानं कथितमस्ति यथा **अधिकारिणः किञ्चित्सदोषमपि स्नानादि गुणकरं विशिष्टशुभभावहेतुत्वात्** इत्यादि। तत्र **सदोषमपि** इत्यत्र यः 'अपि' शब्दः, स सम्भावनायां वर्तते। ततश्च न सर्वं स्नानादि सदोषमेव, यस्मात् यस्मिन्स्नानादौ सम्पूर्णा यतना वर्तते, तत्र सम्पूर्णयतनाप्रभावाद् भावोत्कर्षो भवत्येव, भावोत्कर्षे च सति स्नानादौ नाल्पोऽपि पापकर्मबन्धादिरूपो दोषोऽस्तीति।

अत एव या शुद्धजिनपूजा, तस्यामशुद्धदानस्य दृष्टान्तः प्रतिकूल एव। यस्मात् अशुद्धदान-मल्पपापादिकारणं, शुद्धजिनपूजा तु नेति। तस्मादशुद्धजिनपूजायामेवाशुद्धदानस्य दृष्टान्त उचितः। तस्मात्स्थानाङ्गोक्ता जिनपूजाऽशुद्धैव ग्राह्या, अशुद्धदानदृष्टान्तस्य तत्र प्रतिपादितत्वात्। स्थानाङ्गपाठस्तु "जिनपूजाद्यनुष्ठानस्यापि तथात्वप्रसङ्गात्" इत्यादिरूपः प्रसिद्ध एवेति।

नन्वेवं विधिशुद्धं स्नानपूजादिकं निर्दोषं सम्भवति, तर्हि "स्नानपूजादिकं निर्दोषं" इत्यनुमितिः सत्यैव स्यात्, एवं तर्हि सा स्वीकर्तव्यैव स्यात्। अभयदेवसूरिणा तु यत् '**न चैतदागमानुपाति**' इत्यादिना पञ्चाशकवृत्तौ तन्निषेधः कृतो दृश्यते, तत्कथं घटेतेति शङ्कायामाह – **सूरिः** = अभयदेवसूरिः **पुनः सामान्यानुमितौ = स्नानत्वपूजात्वाद्यवच्छेदेनेत्यादि ।**

इदमत्र तात्पर्यम्,

स्नानपूजादीनि द्विविधानि – विधिशुद्धान्यविधियुक्तानि च। तत्र यानि विधिशुद्धनि, तानि सर्वाणि निर्दोषाणि, यानि चाविधियुक्तानि तानि किञ्चित्सदोषाणि। एवं सति,

विधिशुद्धानि स्नानादीनि निर्दोषाणि इत्यनुमानं सत्यम्,

अविधियुक्तानि स्नानादीनि सदोषाणि इत्यनुमानं सत्यम्।

परन्तु,

'स्नानादीनि निर्दोषाणि' इत्यनुमानं यदि क्रियते, तर्ह्यत्र स्नानत्वावच्छेदेन सकलस्नानेषु निर्दोषत्वं साध्यते, तच्च न युक्तं, अविधियुक्तेषु निर्दोषत्वाभावात्। तस्मात्सूरिः अस्मिन्ननुमाने अंशतो बाधप्रदर्शनाय 'न चैतदागमानुपाति' इति कथयति। अर्थात् 'हे अनुमानकारक! त्वया सर्वेषु स्नानेषु निर्दोषत्वं साध्यते, तत्र विधिशुद्धेषु निर्दोषत्वसाधनं युक्तम्, किन्तु अविधिशुद्धेषु पक्षांशभूतेषु निर्दोषत्वसाधनं न युक्तम्' इत्येवं सूरिः प्रदर्शयति।

तथा च सूरेरयमेवाशयः यदुत विधिशुद्धानि स्नानादीनि निर्दोषाण्येव, अविधियुक्तानि स्नानादीनि किञ्चित्सदोषाण्येव, किन्तु सर्वाणि स्नानादीनि तु निर्दोषाणि सदोषाणि वा न वक्तव्यानि, अंशतो बाधसम्भवादिति।

अंशतो बाधः कथं भवतीत्येतदेवाह – **विधिविरहितायाः पूजायाः** इत्यादि। पक्षस्य द्वौ अंशौ – विधिशुद्धा पूजा, विधिरहिता पूजा च। तत्र विधिरहितायां पूजायां पक्षांशभूतायां दुष्टत्वमस्ति, ततश्च निर्दोषत्वं नास्ति, ततश्चाशंतो साध्याभावात्मकरूपो बाधदोषोऽत्रानुमाने भवतीति।

**यशो.: भवति चांशतो बाधप्रतिसन्धानेऽवच्छेदकावच्छेदेनाऽनुमितिप्रतिबन्धः।**

**चन्द्र.: ननु** एवं अंशतो बाधदोषप्रतिपादनेन किं कारणेन 'सर्वाणि स्नानादीनि निर्दोषाणि' इत्यनुमितेः प्रतिबन्धो भवति? इति शङ्कायामाह - **भवति चांशतो बाधप्रतिसन्धाने** = न्यायपरिभाषायां पक्षतावच्छेदकसामानाधिकरण्येन बाधज्ञाने सति **अवच्छेदकावच्छेदेन** = न्यायपरिभाषायां पक्षतावच्छेदकावच्छेदेन **अनुमितिप्रतिबन्ध** इति।

अयं भावः -

'जीवा मोक्षगामिनः' इत्यनुमाने यदि सर्वान् जीवानाश्रित्य मोक्षगामित्वं साध्यते, तर्ह्यत्र सर्वे जीवाः पक्षः, तेषु पक्षता, तदवच्छेदको धर्मो जीवत्वम्, तदवच्छेदेनानुमितिः अत्र क्रियते।

अत्र च शास्त्रज्ञाता चिन्तयति 'ननु जीवा मोक्षगामिनो भवन्तीति सत्यम्, किन्तु सर्वे जीवा न, यतो भव्या एव मोक्षगामिनः, अभव्यास्तु नैव' इति। अत्राभव्याः पक्षीभूतानां जीवानामंशस्वरूपाः, तेषु च साध्याभावः स्पष्ट एव ज्ञायते। ततश्चात्राशंतो बाधप्रतिसन्धानं (साध्याभावज्ञानं) सञ्जातम्। तेन च तस्य शास्त्रज्ञातुः 'सर्वे जीवा मोक्षगामिनः' इत्यनुमितिर्नैव भवति।

अत्रांशतो बाधप्रतिसन्धानमेव पक्षतावच्छेदकसामानाधिकरण्येन बाधज्ञानमिति।

**यशो.: सामानाधिकरण्येनानुमितौ तु नायमपि दोष इति विभावनीयं सुधीभिः ॥५॥**

**चन्द्र.:** अयं भावः - श्रेणिककृष्णरावणप्रभृतीन् जीवान् लक्ष्यीकृत्य 'जीवा मोक्षगामिनः' इत्येवमनुमानं यदा क्रियते, तदा साऽनुमितिः पक्षतावच्छेदकसामानाधिकरण्येनानुमितिरुच्यते। अत्र च यदि कश्चिच्छास्त्रज्ञाता 'संगमपालकादयो जीवा न मोक्षगामिनः' इत्येवं पक्षतावच्छेदकसामानाधिकरण्येन बाधप्रतिसन्धानवान् भवति, तदापि तस्य श्रेणिकादिजीवान् पक्षीकृत्य कृता 'जीवा मोक्षगामिनः' इत्येवंरूपा पक्षतावच्छेदकसामानाधिकरण्येनानुमितिर्भवत्येवेति।

अत एवाह **सामानाधिकरण्येनानुमितौ तु नायमपि** = न अनुमितिप्रतिबन्धकोऽपि **दोष** इति। → सूरिः' न चैतदागमानुपाति' इति वचनेन सर्वाणि स्नानादीनि किञ्चित्सदोषाण्येव मन्यते ← इत्येवंरूपः पूर्वपक्षोक्तो दोषस्तु तावन्नास्त्येव, किन्तु यदि विधिशुद्धानि स्नानादीनि पक्षीकृत्य यद्यनुमितिः क्रियते,तदा तु तादृशानुमितिप्रतिबन्धरूपोऽपि दोषो न भवेदेवेति **अपि** शब्दार्थः।

अयं भावः - अभयदेवसूरिरिममेवाशयं बिभर्ति यदुत → विधिशुद्धानि स्नानादीनि निर्दोषाण्येव, अविधियुतानि किञ्चित्सदोषाण्येव ← इति।

एवं च यदि सर्वाणि स्नानादीनि पक्षीकृत्य निर्दोषत्वस्यानुमितिः क्रियते, तर्हि स निषेधं कुर्यादेव। किन्तु यदि विधिशुद्धानि स्नानादीनि पक्षीकृत्य निर्दोषत्वस्यानुमितिः क्रियते, तर्हि स न निषेधं कुर्यात्, अविधियुक्ते स्नानादौ किञ्चित्सदोषत्वज्ञाने सत्यपि तादृशज्ञानस्य विधियुते स्नानादौ

निर्दोषत्वानुमितिप्रतिबन्धकत्वाभावादिति।

अतिगहनमिदं तत्त्वमत उच्यते **विभावनीयं सुधीभिः।**

❁ ❁ ❁

**यशो.: ननु परिणामप्रामाण्ये विधिवैगुण्येऽपि को दोष इत्याशङ्क्याह**

**दुग्गयनारीणाया जइवि पमाणीकया हवइ भत्ती ।**

**तहवि अजयणाजणिआ हिंसा अन्नाणओ होई ॥६॥**

**चन्द्र.:** अधुना षष्ठगाथायाः प्रस्तावनायां प्रथमं पूर्वपक्षं दर्शयन्ति महोपाध्यायाः – **ननु** इत्यादिना। **परिणामप्रामाण्ये** = कर्मबन्धाबन्धादौ जीवाध्यवसाय एव प्रमाणं' इत्येवं स्वीक्रियमाणे सति **विधिवैगुण्येऽपि** = क्रियात्मकस्य बाह्यविधेः सर्वथाऽभावेऽपि विकलतायामपि वा **को दोषः** = पापबन्धादिरूपो भवेत्? न कोऽपि? शुभपरिणामस्यैव प्रामाण्यात् इति।

पूर्वपक्षस्यायमाशयः –

महोपाध्यायैः परिणामस्य प्रामाण्यमप्युक्तं, तथा → विधिशुद्धायां जिनपूजायामल्पस्यापि कर्मबन्धस्याभावः, विधिविरहितायां भक्तिसहितायान्तु तस्यामल्पपापबन्धः ← इत्येवमप्युक्तम्। इत्थं च महोपाध्याया विधेरेव पापबन्धाभावकारणत्वमविधेरेव च पापबन्धकारणत्वं प्रतिपादयन्ति, ते एव च परिणामस्य प्रामाण्यं प्रतिपादयन्ति। ततश्च भवतीयमाशङ्का यदुत ''यदि परिणाम एव प्रमाणं, तर्हि विधिरविधिर्वा कोऽपि भवतु, परिणामानुसारेणैव फलं भविष्यति, तस्मात् विधेराग्रहो न न्याय्य इति।

महोपाध्यायाः षष्ठगाथायां समादधति – **दुग्गय** इत्यादि।

षष्ठगाथायाः संस्कृतछाया अन्वयश्चैवम् –

**यद्यपि दुर्गतनारीज्ञातात् भक्तिः प्रमाणीकृता भवति ।**

**तथाऽपि अयतनाजनिता हिंसा अज्ञानतो भवति ॥६॥**

**यशो.: दुर्गतनारीज्ञाताद् यद्यपि प्रमाणीकृता भवति भक्तिः,**

**चन्द्र.:** दुर्गतनारी नाम निर्धनस्त्री, वयोवृद्धया तया वनोत्पन्नैः मुधालब्धैः तुच्छपुष्पैः श्रीमन्महावीरपूजाकरणभावना कृता, भक्तिरूपेण तादृशपरिणामेन तस्याः स्वर्गलोकप्राप्तिरभवत्। परम्परया च मुक्तिः। न च तया विधिसमाचरणं कृतम्, विधिज्ञानस्यैवाभावात्। तथाऽपि फलं सम्प्राप्तम्, इत्थं च प्रस्तुतप्रसङ्गात् **प्रमाणीकृता** = 'इदं प्रमाणं' इत्येवं प्रसाधिता **भवति भक्तिः** = परिणामः।

**यशो.: तथापि अयतनाजनिता हिंसाऽज्ञानतो भवति, 'प्रमादानाभोगाभ्यां प्राणभूतानि हिनस्ती'-ति वचनात्।**

**चन्द्र.:** एवं स्वीकृत्याऽपि विधेरावश्यकतां प्रदर्शयति – **तथापि अयतनाजनिता हिंसा** = तात्त्विकी हिंसा **अज्ञानतो भवति** तस्या दुर्गतनार्यापि ।

ननु कथं तस्या विशिष्टपरिणामसत्त्वेऽपि तात्त्विकी हिंसा ? इति जिज्ञासायामाह– **प्रमादानाभोगाभ्यां प्राणभूतानि हिनस्ति इति वचनात्।** तस्याश्च अनाभोग आसीदेवेति तस्यास्तात्त्विकी हिंसा मन्तव्यैवेति।

**यशो.: तथा च तत्र आचार्योक्तः कूपदृष्टान्त उपतिष्ठत एव,**

**चन्द्र.:** **ननु** यदि तस्यास्तात्त्विकी हिंसा, तर्हि तस्या अल्पपापबन्धोऽपि मन्तव्य इति चेत् सत्यम्। एतदेवाह **तथा च तत्र** = दुर्गतनारीदृष्टान्ते **आचार्योक्तः** = मूलग्रन्थे हरिभद्रसूरिभिरुक्तः, वृत्तौ तु अभयदेवसूरिभिः सविस्तरं निरूपितः **कूपदृष्टान्तः** = प्रथमं सदोषः, पश्चादधिकतरलाभवानित्येवंरूपपदार्थप्रसाधकः **उपतिष्ठत एव।**

अयं भावः– यदि सा नारी विधिज्ञानवती स्यात्, तर्हि सा विधिपालनं कुर्यात्, तर्ह्यज्ञानजन्या तात्त्विकी हिंसा तस्या न स्यात्, अल्पोऽपि पापबन्धो न स्यादेव। किन्तु अज्ञानवशात्तया योऽविधिः कृतः, तेन तस्या अल्पपापबन्धः स्यादेव।

एतदपि व्यवहारतः प्रोक्तम्। निश्चयतस्त्वयं स्पष्टार्थः, यदुत विधिज्ञानपालनादिवतः परिणामो यादृशो भवेत्, विध्यज्ञानवतः अत एव विध्यपालनवतः परिणामस्तादृशो न भवेत्, किन्तु तस्मात्किञ्चिन्मात्रया हीनो भवेत्। ततश्च परिणामहानिसकाशादेव फलहानिः, परन्तु तत्र विधेरेव प्राधान्यात् परिणामवत् विधिरपि कर्मबन्धादिकं प्रति प्रमाणमिति।

**यशो.: अव्युत्पत्त्ययतनाजनितस्य दोषस्योत्तरशुभभावदृष्ट्यैव शोधयितुं शक्यत्वात्।**

**चन्द्र.:** **ननु** दुर्गतनारीदृष्टान्ते कूपदृष्टान्तः कथं घटत इति विवेचयतु भवानिति जिज्ञासायामाह - **अव्युत्पत्त्ययतनाजनितस्य** = अव्युत्पत्तिर्नाम अज्ञानं, तया या अयतना, साऽव्युत्पत्त्ययतना उच्यते। तया जनितस्य **दोषस्य** = अल्पपापबन्धरूपस्य **उत्तरशुभभावदृष्ट्यैव** = उत्तरकालीना या शुभभावरूपा दृष्टिः, तयैव, न तु तां विना **शोधयितुं** = निराकर्तुं **शक्यत्वात्।**

तथा च दुर्गतनारी यदि स्वर्गं परम्परया च मोक्षं प्राप्ता, तर्हि अवश्यं मन्तव्यं यदुत प्रथमं तस्याः अज्ञानप्रयोज्यायतनायाः सकाशादल्पप पबन्धः, पश्चात् शुभभावदृष्टिः, पश्चाच्च अल्पपापादिविनाशः.... इत्येवंक्रमेण मुक्तिः।

यत्र चैवं भवति, तत्र कूपदृष्टान्त उपस्थितो भवत्येव, यतस्तत्रापि प्रथमं हानिः, पश्चाल्लाभ इति।

**यशो.: भक्त्यनुष्ठानमपि अविधिदोषं निरनुबन्धीकृत्य परम्परया मुक्तिजनकमिति केचित् ब्रुवते।'**

**चन्द्र.:** अत्र प्रसङ्गतः प्रीतिभक्तिवचनासङ्गानुष्ठानानां फले मतद्वयं प्रतिपादयन्नाह – तत्र प्रथमं केषाञ्चिन्मतं दर्शयति। **भक्त्यनुष्ठानमपि** इत्यादि।

चत्वारि सदनुष्ठानानि सन्ति – प्रीतिः भक्तिः वचनं असङ्गानुष्ठानं च। तानि च उत्तरोत्तरं प्रधानानि। तत्रास्तां तावद् वचनासङ्गानुष्ठाने, किन्तु द्वितीयं **भक्त्यनुष्ठानमपि अविधिदोषं** = यदि अनुष्ठाने अज्ञानप्रमादादितोऽविधिदोषो भवति, तदापि तं दोषं **निरनुबन्धीकृत्य** = 'उत्तरकालीनसदनुष्ठाने पुनः स न भवेत्' इत्येतादृशं शक्तिरहितं कृत्वा **परम्परया** = स्वर्गादिक्रमेण **मुक्तिजनकम्** = मोक्षसाधकम् **इति केचित् ब्रुवते।**

**यशो.: हरिभद्राचार्यास्तु** 'अभ्युदयफले चाद्ये निःश्रेयससाधने तथा चरमे' **(षो० १०) इत्याहुः। आद्ये = प्रीतिभक्त्यनुष्ठाने, चरमे = वचनाऽसङ्गानुष्ठाने।**

**चन्द्र.:** द्वितीयं हरिभद्राचार्याणां मतं प्रदर्शयति – **हरिभद्राचार्यास्तु अभ्युदयफले चाद्ये** इत्यादि। प्रीत्यनुष्ठानं भक्त्यनुष्ठानं च स्वर्गमेव ददाति, न मोक्षं। मोक्षं तु वचनानुष्ठानं असङ्गानुष्ठानमेव च ददाति।

प्रथममतेन भक्त्यनुष्ठानं वचनासङ्गानुष्ठाने व्यापारीकृत्य मोक्षं ददाति इति उच्यते।

हरिभद्राचार्यमतं तु इदं यदुत भक्त्यनुष्ठानं वचनासङ्गानुष्ठाने प्रति भवतु नाम कारणम्, किन्तु मोक्षं प्रति तस्य कारणत्वं नैवास्ति, न हि तत् एतादृशं समर्थं, यदुत तत् वचनासङ्गानुष्ठाने व्यापारीकृत्य मोक्षं ददातीति।

एतत्तत्त्वं तु विस्तरभियाऽधुनोपेक्ष्यते।

**यशो.: दुर्गतनारीज्ञातं चैवं** - श्रीमन्महावीरवर्द्धमानस्वामी इक्ष्वाकुकुलनन्दनः प्रसिद्धसिद्धार्थपार्थिवपुत्रः पुत्रीयितनिखिलभुवनजनो जनितजनमनश्चमत्कारगुणग्रामो ग्रामाकरनगरपृथुं पृथिवीं विहरन्नन्यदा कदाचित्काकन्दीनामिकायां पुरि समाजगाम। तत्र चाऽमरचरविसरविरचितसमवसरणमध्यवर्तिनि भगवति धर्मदेशनां विदधति नानाविधयानवाहनसमारूढप्रौढपत्तिपरिगते सिन्धुरस्कन्धमधिष्ठिते छत्रच्छन्ननभःस्थले मागधोद्गीतगुणगणे भेरीभाङ्कारभरिताम्बरतले नरपतौ तथा तद्विधवरवैश्यादिकपुरजने तथा गन्धधूपपटलप्रभृतिपूजापदार्थव्यग्रकरकिङ्करीनिकरपरिगते विविधवसनाभरणरमणीयतरशरीरे नगरनारीनिकरे भगवतो वन्दनार्थं व्रजति सति एकया वृद्धदरिद्रयोषिता जलेन्धनाद्यर्थं बहिर्निर्गतया कश्चिन्नरः पृष्टः 'क्वाऽयं लोक एकमुखस्त्वरितं याति?' तेनोक्तं 'जगदेकबान्धवस्य देहिनां जरामरणरोगशोकदौर्गत्यादिदुःखछिदुरस्य श्रीमन्महावीरस्य वन्दनपूजनाद्यर्थम्'। ततस्तच्छ्रवणात् तस्या भगवति भक्तिरभवत्। अचिन्तयच्च, अहमपि भगवतः पूजार्थं यत्नं करोमि, केवलमहमतिदुर्गता पुण्यरहिता विहितपूजाङ्गवर्जितेति।

ततोऽरण्याऽऽदृष्टानि मुधालभ्यानि सिंदुवारकुसुमानि स्वयमेव गृहीत्वा भक्तिभरनिर्भराङ्गी 'अहो! धन्या पुण्या कृतार्था कृतलक्षणा, सुलब्धं मम जन्म, जीवितफलं चाहमवाप' इति भावनया पुलककण्टकितकाया प्रमोदजलप्लावितकपोला भगवन्तं प्रति प्रयान्ती समवसरणकाननयोरन्तराल एव वृद्धतया क्षीणायुष्कतया च झगिति पञ्चत्वमुपगता। ततः सा विहितपूजाप्रणिधानोल्लसितमानसतया

देवत्वमवाप्तवती। ततस्तस्याः कलेवरमवनिपीठलोठितमवलोक्याऽनुकम्पापरीतान्तःकरणो लोको मूर्छितेयमिति मन्यमानोऽम्भसा सिषेच। ततस्तामपरिस्पन्दामवलोक्य लोको भगवन्तं पप्रच्छ, 'भगवन्! असौ वृद्धा किं मृतोत जीवतीति?' भगवांस्तु व्याजहार यथा – 'मृताऽसौ देवत्वं चावाप्ता। ततः पर्याप्तिभावमुपागत्य प्रयुक्तावधिः पूर्वभवानुभूतमवगम्य मद्वन्दनार्थमागतः, स चायं मत्पुरोवर्ती देव इति। ततो भगवदभिहितमिदमनुश्रुत्य समस्तः स समवसरणधरणीगतो जनः परमं विस्मयमगमत्। यथा 'अहो! पूजाप्रणिधानमात्रेणापि कथममरतामवाप्तासाविति'। ततो भगवान्गम्भीरां धर्मकथामकथयत्, यथा–स्तोकोऽपि शुभाध्यवसायो विशिष्टगुणपात्रविषयो महाफलो भवति। यतः "इक्कंपि उदगबिन्दु, जह पक्खित्तं महासमुद्दंमि। जाए अक्खयमेवं, पूयावि जिणेसु विन्नेया।। उत्तमगुणबहुमाणो, पयमुत्तमसत्तमज्झयारंमि। उत्तमधम्मपसिद्धी, पूयाए जिणवरिंदाणं" ।। (पूजापञ्चा. गा. ४७-४८) ति। ततो भगवांस्तत्सम्बन्धिनं भाविभवव्यतिकरमकथयत्। यथा–अयं दुर्गतनारीजीवो देवसुखान्यनुभूय ततश्च्युतः सन् कनकपुरे नगरे कनकध्वजो नाम नृपो भविष्यति। स च कदाचित्प्राज्यं राज्यसुखमनुभवन् मण्डूकं सर्पेण, सर्पं कुररेण, कुररमजगरेण, तमपि महाहिना ग्रस्यमानमवलोक्य भावयिष्यति, यथा – 'एते मण्डुकादयः परस्परं ग्रसमाना महाहेर्मुखमवशा विशन्ति, एवमेतेऽपि जना बलवन्तो दुर्बलान्यथाबलं बाधयन्तो यमराजमुखं विशन्ति' इति भावयंश्च प्रत्येकबुद्धो भविष्यति। ततो राज्यसम्पदमवधूय श्रमणत्वमुपगम्य देवत्वमवाप्स्यति। एवं भवपरम्परयाऽयोध्याया नगर्याः शक्रावतारनाम्नि चैत्ये केवलश्रियमवाप्य सेत्स्यति इति गाथार्थः।"

**चन्द्र.:** ननु दुर्गतनारीदृष्टान्तं ज्ञातुमीहते मन्मन इति चेत् **दुर्गतनारीज्ञातं चैवम्** = ज्ञातं = उदाहरणम्। प्रायः सर्वं स्पष्टम्। नवरं विषमाः पदार्थाः स्पष्टीक्रियन्ते। **पुत्रीयितेत्यादि** = पुत्रमिव आचरितः स्नेहविषयीकृतो निखिलो भुवनजनो येन स तथा, **गुणग्रामः** = गुणसमूहः । **पृथुः** = विस्तृता। **चराः** = किङ्कराः **विसरः** = समूहः। **प्रौढपत्तयः** = विशिष्टाः सुभटाः। **सिन्धुरः** = हस्ती **मागधाः** = गायकविशेषाः **भेरीभाङ्कारः** = भेरी नाम वाद्यविशेषः, तस्य शब्दो 'भाङ्कारः' उच्यते।

**पुलकाः** = रोमाञ्चाः, ते कण्टका इव सञ्जाता यस्मिन्काये, स पुलककण्टकितः कायः, तादृशः कायो यस्याः सा।

पूजापञ्चाशकगतगाथाद्वयसङ्क्षेपार्थस्त्वयम् – यथा एकोऽपि उदकबिन्दुः महासमुद्रे प्रक्षिप्तः सन् अक्षतं जायते, एवं जिनेषु पूजाऽपि विज्ञेया। उत्तमगुणबहुमानं उत्तमजीवानां मध्ये पदं = स्थानं (प्रापयति)। जिनवरेन्द्राणां पूजया उत्तमधर्मस्य = चारित्रस्वरूपस्य प्रसिद्धिः = प्राप्तिर्भवति।

**कुररः** = तिर्यग्विशेषः, 'नोळिया' इति गुर्जरभाषामध्ये प्रसिद्धः।

**यशो.: यतनां चात्र स्नानपूजादिगतामित्थमादिशन्ति -**
"भूमीपेहणजलच्छाणणाइ, जयणा उ होइ न्हाणादौ ।
एत्तो विसुद्धभावो, अणुहवसिद्धो च्चिअ बुहाणं" ।।

"एसो चेव इहं विही, विसेसओ सव्वमेव जत्तेणं।
जह रेहंति तह सम्मं, कायव्वमणण्णचिट्ठेणं ।।

वत्थेण बंधिऊणं, णासं अहवा जहा समाहीए।
वज्जेयव्वं तु तहा, देहम्मि वि कंडुयणमाइ" ।।
**(पूजापञ्चाशके गा. ११-१९-२०) ।। इत्यादि ।।६।।**

**चन्द्र.:** ननु ज्ञातं तावत् दुर्गतनार्युदाहरणमधुना स्नानादिसम्बन्धिनीं यतनां ज्ञातुमिच्छामीति जिज्ञासायां आह - **यतनां चात्र** = सर्वज्ञशास्त्रे **स्नानपूजादिगताम्** = 'गृहस्थेन पूजार्थं स्नानं कथं कर्तव्यं?' इत्येवंरूपां 'गृहस्थेन पूजा कथं कर्त्तव्या?' इत्येवंरूपां च **इत्थं** = प्रतिपादयिष्यमाणप्रकारेण **आदिशन्ति** = शास्त्रकर्तार हरिभद्रसूरिः इति।

पूजापञ्चाशकगतगाथायाः सङ्क्षेपार्थस्त्वयम् -

यस्यां भूमौ स्नानं कर्त्तव्यं, सा प्रथमं प्रेक्षणीया। तथा जलं गालनीयम्। एवमादिरूपा यतना स्नानादौ भवति। **अस्मात्** = यतनायुक्तात् स्नानात् बुधानां विशुद्धभावोऽनुभवसिद्ध एव (तस्मात् यतनायुक्तं स्नानं कर्तव्यमिति भावार्थः)।

एषा तावत्स्नानगता यतना निगदिता।

अधुना पूजागतां यतनामाह -

एष एव विधि इह = पूजायां द्रष्टव्यः, विशेषतोऽयं विधिः यदुत यथा सर्वं सम्यग् शोभते, तथा **अनन्यचेष्टेन** = पूजां विना अन्यकार्येषु चेष्टारहितेन यत्नेन सर्वं सम्यग् कर्त्तव्यमिति।

वस्त्रेण नासिकां बद्ध्वा पूजा कार्या, अथवा यथासमाधि पूजा कार्या। अर्थात् श्वासोच्छ्वासग्रहणे असमाधौ सत्यां तु वस्त्रेण नासिकां अबद्ध्वापि जिनपूजा कार्या। तथा पूजासमये स्वदेहेऽपि कण्डूयनादि वर्जनीयमिति।

एवं तावदत्यन्तं संक्षेपत उक्तम्। विस्तरार्थिना तु पञ्चाशकवृत्तिः अवलोकनीया।

**यशो. : नन्वेवं विध्यंशेऽशुद्धो भक्त्यंशे च शुद्धो योगः प्राप्तः, तथा च कथं न तत एकविधकर्मबन्धः? न च मिश्रं कर्म शास्त्रे प्रोक्तं येन मिश्रात्ततो मिश्रं कर्म बध्येतेत्याशङ्कायामाह -**

**चन्द्र. :** पूर्वपक्षः शङ्कते – **नन्वेवं** इत्यादि। पूर्वपक्षस्यायमभिप्रायः– 'यः अविधिसमन्वितां भक्तिसमन्वितां च जिनपूजां करोति, स जिनपूजायां विधिरूपेंऽशे अज्ञानप्रमादादिप्रयोज्याविधिसमाचरणात् अशुद्धयोगवान् भवति, भक्तिरूपेंऽशे तु शुभभावसत्त्वात् शुद्धयोगवान् भवति। एवं च अविधिभक्तियुक्तां जिनपूजां कुर्वतः शुद्धाशुद्धरूपो योगः सिध्यति। ततश्च शुद्धयोगात्पुण्यबन्धः, अशुद्धयोगात्पापबन्धश्च यथा भवति, तथा शुद्धाशुद्धरूपाद्योगात् तृतीयः कश्चित् कर्मबन्धो मन्तव्यः स्यात्। न च मिश्ररूपाद्योगात् तत्र मिश्रं कर्म पुण्यपापाभ्यां भिन्नस्वरूपं वक्तुं शक्यम्, शास्त्रे मिश्रकर्मणः कुत्राऽपि प्रतिपादनाभावात्। ततश्च एतादृशस्य शुद्धाशुद्धयोगवतः कर्मबन्धः कीदृशोऽवगन्तव्यः ?' इति।

अक्षरार्थस्त्वयम् – **एवं** = 'गृहस्थस्य अविधिभक्तिसमन्विता जिनपूजा सम्भवति' एवं यत्प्रतिपादितमस्ति, तदनुसारेण **विध्यंशेऽशुद्धः** = विधिरूपस्यांशस्यापालनात्तदंशे गृहस्थस्य अविधिस्वरूपोऽशुद्धयोगः **भक्त्यंशे च** = शुभभावस्वरूपेंऽशे **शुद्धो योगः प्राप्तः। तथा च** = एवं शुद्धाशुद्धयोगे सिद्धे सति **कथं न ततः** = शुद्धाशुद्धयोगात् **एकविधकर्मबन्धः** = पुण्यबन्धात्पापबन्धाच्च विभिन्नरूपः कश्चिदन्यस्वरूप एव कर्मबन्धः। अस्माभिस्तु शुद्धयोगात्पुण्यकर्म, अशुद्धयोगाच्च पापकर्म इत्येवं द्विविधं कर्म इष्यते, पूर्वपक्षस्तु कथयति अत्र शुद्धाशुद्धः मिश्रयोगः, ततस्तस्मात् पुण्यापुण्यमिश्रणात्मकं एकस्वरूपमेव कर्म भवत्विति।

ननु भवतु नाम मिश्रयोगात् पुण्यपापोभयबन्धस्वरूपं मिश्रं कर्म, को दोषः ? इत्यतः पूर्वपक्षः प्राह – **न च मिश्रं कर्म** इत्यादि। यदि हि मिश्रं कर्म शास्त्रे प्रोक्तं स्यात्, तर्हि शुद्धाशुद्धयोगात् मिश्रं वक्तुं शक्यं स्यात्, किन्तु शास्त्रे मिश्रं कर्म नोक्तमिति 'मिश्रात् योगात् मिश्रकर्म' इति वक्तुमशक्यमेवेति।

अथवा अत्र पूर्वपक्षस्यायमप्याशयः सम्भवति – स्नानपूजादौ जलाद्यारम्भसद्भावात्तत्राशुद्धः योगः, इति तस्मिन्काले पापबन्धः। तदनन्तरं चैत्यवन्दनकाले शुभभावमात्रसत्त्वात्तत्र शुद्धः योगः, इति तस्मिन्काले पुण्यबन्धः। एवं विभिन्नकालमाश्रित्य अल्पपापबन्धो बहुपुण्यबन्धश्च अद्य यावत् प्रसिद्धः। दुर्गतनारीदृष्टान्ते तु पुष्पाद्यारम्भकाल एव तस्या निधनमभवत्, न हि तया प्रथममारम्भः पश्चाच्च भावपूजा कृता। तस्याश्च स्वर्गादिप्राप्तिरस्त्येवेति कृत्वा तस्या आरम्भकाल एव शुभभावसद्भावः स्वीकरणीयः स्यात्, अन्यथा तस्याः स्वर्गादिप्राप्तिः कथं भवेत्? ततश्च दुर्गतनारीदृष्टान्ते तु न विभिन्नकाले शुद्धोऽशुद्धश्च योगः, किन्तु एकस्मिन्नेव काले अविधिरूपोऽशुद्धः, भक्तिरूपश्च शुद्धो योगो मन्तव्यो भवति। इत्थं च एकस्मिन्नेव काले शुद्धाशुद्धयोगसद्भावात् तदा किं शुद्धयोगबलात्केवलं पुण्यकर्म मन्तव्यं ? यदि वा अशुद्धयोगबलात्केवलं पापकर्म मन्तव्यम् ? इति प्रश्नः, उभयत्रापि निर्णयाभावात् किं शुद्धाशुद्धयोगात् कश्चित्तृतीय एव मिश्रस्वरूपः कर्मबन्धो मन्तव्य इति। परन्तु सोऽपि न सम्भवति, शास्त्रेऽनुक्तत्वात् इति।

**यशो.: सुद्धासुद्धो जोगो, एसो ववहारदंसणाभिमओ।**
**णिच्छयणओ उ णिच्छई, जोगज्झवसाणमिस्सत्तं ।।७।।**

**चन्द्र.:** महोपाध्यायाः समादधति - **सुद्धासुद्धो** इत्यादि।
सप्तमगाथायाः संस्कृतछाया अन्वयश्चेत्थं
**एष शुद्धाशुद्धो योगः, व्यवहारदर्शनाभिमतः ।**
**निश्चयनयस्तु जोगाध्यवसायमिश्रत्वं नेच्छति ।।७।।**

**यशो.: एष दुर्गतनारीसदृशानां जीवानां विधिवैधुर्येऽपि भक्तिकालीनो जिनपूजायोगः अशुद्धदानादिवच्छुद्धाशुद्धः = आंशिकशुद्ध्यशुद्धिवान्, व्यवहारदर्शनस्य = व्यवहारनयस्य, अभिमतः।**

**चन्द्र.: एष** = अनन्तरोक्तोऽविधिभक्तिसमन्वितः, 'जिनपूजायोगः' इति सम्बन्धः। **दुर्गतनारीसदृशानां** = अज्ञानवशात् अविधियुक्तानां पात्रतावशाच्च भक्तियुक्तानां **विधिवैधुर्येऽपि** = विधि-अभावेऽपि, विधिविकलत्वेऽपि वा **भक्तिकालीनो** = जिनेश्वरबहुमानसमन्वितो **जिनपूजायोगः अशुद्धदानादिवच्छुद्धाशुद्धः** = **आंशिकशुद्ध्यशुद्धिमान् व्यवहारदर्शनस्येत्यादि।** तथा च व्यवहारनयस्तं योगं आंशिकशुद्ध्यशुद्धिमन्तं मन्यते, न तु निश्चयनयः।

**यशो.: ततश्च वाग्व्यवहारमात्रसिद्धेर्नान्यत्फलम्।**

**चन्द्र.: ननु** भवतु नाम व्यवहारनयस्य मिश्रयोगस्वीकारः, परन्तु तेन मिश्रयोगेन कर्मबन्धोऽपि मिश्रस्तु स्यादेव, कस्तत्र निषेधं कुर्यात् इति प्रश्ने सत्याह - **ततश्च** = यस्मात् मिश्रयोगो व्यवहारमात्रस्याभिप्रेतः, तस्मादेव **वाग्व्यवहारमात्रसिद्धेः** = 'अयं मिश्रयोग' इत्येवंरूपोच्चारमात्रमेव प्रकृतव्यवहारस्य फलं, तत्तु सिध्यति, परन्तु तस्मात् **नान्यत्फलम्** = मिश्रकर्मबन्धादिरूपमिति।

इदमत्र तात्पर्यम्।

व्यवहारो हि सामान्यतो वाग्व्यवहारं साधयति, तथाहि - कश्चित्पिता स्वपुत्रं 'जिनदत्त-देवदत्त-महेन्द्र' इत्यादिनाम्ना प्रसिद्धं करोति, अयं च व्यवहारः। अस्य च फलं एतावन्मात्रं यदुत पिता अन्ये च लोकास्तं 'जिनदत्त' इत्यादिनाम्ना उच्चारयन्ति। इत्थं चात्र व्यवहारो वाग्व्यवहारं साधयतीति स्पष्टम्।

परन्तु व्यवहारे स 'जिनदत्त' उच्यते, इति कृत्वा परमार्थतः स जिनेन दत्तो न भवति, एवमेव परमार्थेन स देवेन दत्तो महानिन्द्रो वा न भवति।

एवं अविधिभक्तियुक्ते जिनपूजाद्यनुष्ठाने व्यवहारः शुद्धाशुद्धयोगं मन्यते। ततश्च व्यवहारानुसारेण 'अस्यां जिनपूजायां शुद्धाशुद्धो योगोऽस्ति' इति वाचो व्यवहारो भवत्येव। परन्तु परमार्थतो न तत्र मिश्रयोगः, न वा तस्मान्मिश्रयोगात् मिश्रकर्मबन्धापत्तिरिति दुर्गतनारीदृष्टान्तात् मिश्रयोगं मत्वा मिश्रकर्मबन्धापत्तिदानं सर्वथैवानुचितम्। परमार्थतो मिश्रयोगस्यैव शुभाशुभोभयस्वरूपस्यैकस्याभावात्।

**यशो.: निश्चयनयस्तु योगाध्यवसायस्थानानां मिश्रत्वं नेच्छति, अशुभरूपाणां शुभरूपाणां च शास्त्रे प्रतिपादनात् तृतीयराशेरकथनादिति स्पष्टं महाभाष्ये।**

**चन्द्र.:** एतदेवाह -

**निश्चयनयस्तु** वास्तविकवस्तुमात्रग्राही नयस्तु **योगाध्यवसायस्थानानां मिश्रत्वं नेच्छति।** शुभरूपाणां अशुभरूपाणां च द्विस्वरूपाणां योगस्थानानां परस्परं मिश्रत्वं = शुभाशुभोभयैकरूपत्वं नेच्छति, एवं शुभरूपाणां अशुभरूपाणां च द्विस्वरूपाणां अध्यवसायस्थानानां परस्परं मिश्रत्वं नेच्छति।

अत्र योगो मनोवाक्कायसम्बन्धी,

अध्यवसायस्तु आत्मसम्बन्धीति।

**ननु** स नयः किमर्थं मिश्रत्वं नेच्छतीत्यत आह - **अशुभरूपाणां शुभरूपाणां च** इत्यादि। **प्रतिपादनादिति।**

**ननु** भवतु नाम शुभरूपाणामशुभरूपाणां च शास्त्रे प्रतिपादनम्, किन्तु मिश्ररूपस्तृतीयोऽपि राशिरस्माभिः स्वीक्रियतामिति चेत् न, **तृतीयराशेः** = मिश्रराशेः **अकथनात्।** तथा च यदि शास्त्रे तृतीयराशिरुक्तः स्यात्, तर्हि निश्चयनयस्तमपीच्छेत्, न चोक्तः, ततश्च तेन नेष्यत इति।

इत्थं च परमार्थतो मिश्रयोग एव नास्तीति मिश्रकर्मापत्तिः मूलत एव निरस्तेति।

**ननु** द्वौ एव राशी कथितौ, न तु तृतीय इति कुत्र शास्त्रे भवता दृष्टमिति जिज्ञासायामाह - **इति स्पष्टमेव महाभाष्ये** = विशेषावश्यकभाष्ये।

एकदैक एव योगोऽध्यवसायश्च भवति, शुभोऽशुभो वा, न तु शुभाशुभौ द्वौ इति निश्चयनयस्य स्पष्टोऽभिप्रायः। व्यवहारस्तु मिश्रस्य वाग्व्यवहारमात्रं करोति, परमार्थतस्तु स नास्त्येवेति।

**यशो.: ननु (न च) समूहालम्बनोपयोगरूपस्याध्यवसायस्य सम्भवात्कथं तदप्रतिपादनमिति वाच्यम्, समूहालम्बनज्ञानस्य विशेषणीयत्वाद् विध्यौपयिकस्य विशिष्टोपयोगस्यैवमधिकृतत्वादिति युक्तमुत्पश्यामः ।**

**चन्द्र.:** पुनः पूर्वपक्षः शङ्कते - **न च समूहालम्बनोपयोगरूपस्येत्यादि।**

अयं भावः - नानाविशेष्यताशालिज्ञानं समूहालम्बनं। तथाहि - 'घटपटौ नीलपीतौ' इति ज्ञाने घटे घटत्वावच्छिन्ना विशेष्यता, पटे च पटत्वावच्छिन्ना विशेष्यता वर्तते। नीलरूपं घटे पीतरूपं च पटे प्रकारीभूतम्। ततश्च इदं ज्ञानं घटत्वावच्छिन्नविशेष्यतापटत्वावच्छिन्नविशेष्यतास्वरूपाभ्यां नानाविशेष्यताभ्यां शालत इति समूहालम्बनं उच्यते।

प्रकृते च दुर्गतनार्या 'भगवान् पूज्यो मुधालभ्यानि तुच्छानि पुष्पाणि आनेतव्यानि' इत्येवंरूपं एकस्मिन्नेव समये एकं ज्ञानं सम्भवति। अत्र भगवत्त्वावच्छिन्नविशेष्यता पुष्पत्वावच्छिन्नविशेष्यता चेत्येवं नानाविशेष्यता

ज्ञाने विद्यत इति कृत्वेदं ज्ञानं समूहालम्बनम्। इदं च स्वीकृतमेव। तस्मिंश्च 'भगवान् पूज्य' इत्यंशे भक्तिभावः, 'मुधालभ्यानि तुच्छाण्यपि पुष्पाणि आनेतव्यानि' इत्याद्यंशे अविधिभावः। तथा च समूहालम्बनरूपे एकस्मिन्नेवाध्यवसाये अविधिभक्तिभावसम्भवात्, एकस्मिन्नेव अध्यवसाये शुद्धाशुद्धोभयस्वरूपं मिश्रत्वमापतितमेवेति शास्त्रे तस्य प्रतिपादनं कर्त्तव्यमेव, ततश्च किमर्थं तस्य प्रतिपादनं न कृतमिति।

समादधति महोपाध्यायाः – **समूहालम्बनज्ञानस्य विशेषणीयत्वात्** विशिष्टज्ञानरूपतया स्वीकरणीयत्वात्। तत् समूहालम्बनरूपतया न, किन्तु विशिष्टज्ञानरूपतयैव स्वीकर्त्तव्यमिति।

अयं भावः – 'घटपटौ नीलपीतौ' इत्यत्र नानाविशेष्यतासद्भावात्समूहालम्बनत्वम्, परन्तु नीलघटवान् पीतपट इत्येवंरूपं यदि ज्ञानं मन्येत, तर्हि नीलघटविशिष्टो यः पीतपटः, स एवात्र विशेष्य इति कृत्वेदं ज्ञानं न नानाविशेष्यताशालि, अत एव न समूहालम्बनं, परन्तु विशिष्टज्ञानमेव।

प्रकृते हि अविधिविशेष्यको भक्तिविशेष्यकश्चेत्येवं यदि विशेष्यकद्वयवानध्यवसायः स्वीक्रियेत, तर्हि एकस्मिन्नेव काले शुभाशुभाध्यवसायमिश्रणात् मिश्रं कर्म मन्तव्यं स्यात्, न च तत् शास्त्रे प्रोक्तम्। तस्मादत्र समूहालम्बनरूपोऽध्यवसायो नैव मन्तव्यः, किन्तु विशिष्टाध्यवसाय एव मन्तव्यः, तथा चाविधिविशिष्टभक्तिविशेष्यकोऽध्यवसायोऽत्र विशिष्टोऽध्यवसाय इति न मिश्रकर्म मन्तव्यं स्यात्।

**ननु** समूहालम्बनं त्यक्त्वा विशिष्टाध्यवसायस्वीकारेण मिश्रबन्धापत्तिः कथं निरस्ता भवतीति स्पष्टं न ज्ञायते ? इत्यत आह – **विध्यौपयिकस्य** = विधिप्राप्त्युपायभूतस्य **विशिष्टोपयोगस्य** = भक्त्युपयोगस्य **एवं** = समूहालम्बनत्वं त्यक्त्वा विशिष्टाध्यवसायत्वस्वीकरणेन **अधिकृतत्वात्** = स्वीकृतत्वात् महाभाष्ये इति **युक्तं** = 'एतदेव शोभनं' इत्येवं **उत्पश्यामः** = वयं यशोविजयिनो मन्यामहे।

इदमत्र तात्पर्यम्।

यस्मिन्ननुष्ठाने विधिर्भक्तिश्च स्तः, तस्मिन्ननुष्ठाने यदि कल्पनातो लक्षरूप्यकसदृशं पुण्यं बध्येत, तर्हि तत्र 'विधिना त्रिंशत्सहस्रसदृशं भक्त्या च सप्ततिसहस्रसदृशं पुण्यं बद्धम्' इत्येवं न मन्तव्यम्। किन्तु 'भक्तिरेव लक्षरूप्यकसदृशं पुण्यं बन्धयति' इत्येवं मन्तव्यम्। केवलं स्वामिसदृशी भक्तिः सेवकसदृशस्य विधेः सहायं विना तादृशं पुण्यं नैव बन्धयतीत्यत्र भक्तिः सेवकसदृशं विधिं आदिश्य तत्साहाय्येन तादृशं पुण्यं बन्धयतीत्येवं विधेः उपायभूताऽत्र भक्तिः सम्पूर्णं फलं ददाति।

यस्मिन्ननुष्ठाने अविधिभक्तिश्च स्तः, तस्मिन्ननुष्ठाने यदि कल्पनातो सप्ततिसहस्ररूप्यकसदृशं पुण्यं बध्येत, तर्हि एवं न मन्तव्यं यदुत भक्तिरत्र लक्षं ददाति अविधिस्तु त्रिंशत्सहस्रसदृशं पापं ददाति, ततश्च लक्षपुण्यात् तादृशं पापं निराकृतं सत् अवशिष्टं सप्ततिसहस्रं पुण्यं इति।

किन्तु अत्रेदमेव मन्तव्यं यदुत अत्र भक्तिस्वरूपः स्वामी न सक्षमः, ततश्च स न सम्पूर्णविधेरुपायभूतः, अतोऽत्राविधिः प्रवृत्ता। ततश्चात्र मन्दा भक्तिः अविध्युपायभूताऽभवदिति कृत्वाऽत्राविधिभक्तिसमन्वितमनुष्ठानमस्ति। परन्तु भक्तेर्मन्दत्वादेव सा सप्ततिसहस्रसदृशं पुण्यं ददाति।

इदमेव च समूहालम्बनस्य विशिष्टज्ञानस्य च मध्येऽन्तरमस्ति, यदुत समूहालम्बने अविधिरपि विशेष्यः, ततश्च तस्य प्राधान्यात् तस्याल्पपापकर्मात्मकं फलं मन्तव्यं स्यात्। भक्तिस्तु विशेष्या अस्त्येवेति तस्या अपि प्राधान्यात् तस्या बहुपुण्यात्मकं फलं मन्तव्यं स्यात्, इत्थं चैकस्मिन्काले मिश्रकर्म मन्तव्यं स्यात्।

विशिष्टज्ञाने तु विधिभक्ति-उभयसत्त्वे भक्त्यध्यवसाय एव विधि-अध्यवसायोपायभूतः सन् सम्पूर्णं फलं ददाति। अविधिभक्तिसत्त्वे तु अविधिः न स्वतन्त्रो विशेष्यः, अपि तु अविधिविशिष्टाया भक्तेरध्यवसायोऽत्र प्रवृत्त इत्येव मन्तव्यम्। ततश्च अविध्युपायभूतस्य भक्तिभावस्य विध्युपायभूतभक्तिभावसकाशात् मन्दत्वमिति कृत्वा स प्रतिपादितस्य सम्पूर्णफलस्यापेक्षयाऽल्पं फलं ददाति। न तु अविधिः अल्पं पापं, भक्तिः सम्पूर्णं पुण्यं, सम्पूर्णपुण्याच्चाल्पपापकर्मणो हानिं कृत्वाऽवशिष्टं फलं परिगणनीयमिति।

तस्मादत्रायमेव सारो यदुत लोकेऽपि अयं व्यवहारो दृश्यते,यत् यदि ग्राहकस्य दायकसकाशात् सहस्रं ग्राह्यं, देयं तु न किञ्चिदपि, तदा ग्राहको बलवान् गण्यते, स च सहस्रं गृह्णाति।

यदा तु ग्राहकस्य दायकसकाशात्सहस्रं ग्राह्यं, किन्तु तस्यैव दायकस्य व्यापारान्तरापेक्षया शतं देयं, तदा स ग्राहको न सहस्रं गृहीत्वा शतं ददाति। न वा लोको वदति यत् अयं सहस्रस्य ग्राहकः। किन्तु स ग्राहको नवशतकस्यैव ग्राहको गण्यते, लोकेऽपि स नवशतकं गृह्णाति, न तु किञ्चिदपि ददाति। अत्र अयं ग्राहको सहस्रग्राहकापेक्षयाऽल्पबलवान् गण्यते।

एवमेव विधिभक्तिकाले भक्त्यध्वसायः केवलं पुण्यस्य ग्राहक एव, नतु दायक इति स सर्वं पुण्यं गृह्णाति।

अविधिकाले तु भक्त्यध्यवसायो ग्राहको दायकश्चेत्येवं स प्रतिपादितभक्त्यध्यवसायापेक्षया मन्दः सन् अल्पं पुण्यं गृह्णाति, न तु किञ्चिदपि ददाति। अर्थात् न पापस्य बन्धो भवति।

अत्यन्तं गहनमिदं तत्त्वं सूक्ष्मधिया विभावनीयम्।

**यशो. : तथा चाविध्यंशे उत्कटत्वेऽशुद्ध एव, भक्त्यंशे पुनरुत्कटत्वे शुद्ध एव योग इत्येतन्मते एकस्माद्योगादेकदैक एव बन्धः।**

**चन्द्र. :** एतदेव महोपाध्यायाः प्राहुः

**तथा च अविध्यंशे उत्कटत्वे अशुद्ध** एव = न तु शुद्ध इत्येवकारार्थः, योग इति सम्बन्धः कार्यः। **भक्त्यंशे पुनरुत्कटत्वे शुद्ध एव** = न तु अशुद्धः **योग इति एवंरीत्या एतन्मते** = निश्चयनयमते **एकस्माद्योगात्** = शुद्धादशुद्धाद् वा **एकदा** = एकस्मिन् काले **एक एव** = पुण्यस्य पापस्य वा, न तु उभयस्येत्येवकारार्थः।

अत्र मन्दमतिप्रबोधार्थं स्थूलदृष्ट्या कोष्ठकं दर्श्यते।

| | अविधि : | विधि: | अभक्ति: | भक्ति: | पुण्यकर्म | पापकर्म | |
|---|---|---|---|---|---|---|---|
| (१) | 0% | 100% | 0% | 100% | 100% | X | श्रेष्ठः शुद्धयोगः |
| (२) | 30% | 70% | 30% | 70% | 70% | X | मध्यमः शुद्धयोगः |
| (३) | 49% | 51% | 49% | 51% | 51% | X | जघन्यः शुद्धयोगः |
| (४) | 100% | 0% | 100% | 0% | X | 100% | श्रेष्ठः अशुद्धयोगः |
| (५) | 70% | 30% | 70% | 30% | X | 70% | मध्यमः अशुद्धयोगः |
| (६) | 51% | 49% | 51% | 49% | X | 51% | जघन्यः अशुद्धयोगः |

अत्र कुत्रापि मिश्रयोगत्वं मिश्रकर्मत्वं वा न भवति।

**यशो.: बन्धकालस्य प्रदीर्घत्वात् परिणामपरावृत्त्या च मिश्रत्वं भावनीयम्,**

**चन्द्र.:** नन्वेवं मिश्रयोगस्य व्यवहारः कथं भवेदित्यत आह - **बन्धकालस्य** = पुण्यबन्धस्य पापबन्धस्य च यः कालः, तस्य प्रदीर्घत्वात् **परिणामपरावृत्त्या च** = अविध्यंशोत्कटपरिणामाद् विध्यंशोत्कटपरिणामः, तस्माच्च पुनरपि अविध्यंशोत्कटपरिणामः, तस्माच्च पुनरपि विध्यंशोत्कटपरिणाम इत्येवं परिणामस्य परावर्तनेन च **मिश्रत्वं भावनीयम्।**

यदि हि बन्धकाल एकसमयभावी एव स्यात्, तर्हि एकस्मिन्समये तु एक एव शुद्धोऽशुद्धो वा योगः स्यादिति योगमिश्रत्वं न स्यात्।

एवं यदि बन्धकालस्य प्रदीर्घत्वेऽपि यदि दीर्घकालं यावत् एक एव शुद्धोऽशुद्धो वा योगः स्यात्, तदाऽपि योगमिश्रत्वं न स्यात्।

ततश्च मिश्रयोगत्वाय बन्धकालस्य प्रदीर्घत्वं परिणामपरावर्तनं चावश्यकमिति कृत्वोभयमप्यत्र प्रदर्शितम्।

योगे मिश्रत्वमिव कर्मण्यपि एवं उपचारतो मिश्रत्वं भावनीयम्।

न तु एकस्मिन्नेव समये शुद्धाशुद्धोभययोगरूपं मिश्रत्वं, न वा एकस्मिन्नेव समये पुण्यपापोभयबन्धरूपं मिश्रत्वमिति।

**यशो.: एकधारारूढे तु भक्तिभावेऽविधिदोषोऽपि निरनुबन्धतया द्रव्यरूपतामश्नुवंस्तत्र भग्न इवावतिष्ठते।**

**चन्द्र.: ननु** बन्धकालः प्रदीर्घोऽस्ति, परन्तु यस्य सततं भक्तिभाव एव उत्कटो भवेत्, न तु अन्तरा कुत्रापि अविधिभाव उत्कटो भवेत्, तस्य स अनुत्कटोऽविधिभावः कीदृशः स्यादिति जिज्ञासायामाह- **एकधारारूढे तु** = प्रदीर्घकालं यावत् उत्कटतां बिभ्राणे **भक्तिभावे** सति **अविधिदोषोऽपि** = अनुत्कटोऽविधिदोषोऽपि, सर्वथाऽविधिदोषाभावे तु प्रश्नावकाश एव न, किन्तु योऽनुत्कटोऽविधिदोषोऽस्ति, सोऽपि इत्यपिशब्दार्थः **निरनुबन्धतया** = उत्तरोत्तरानुष्ठाने भवनं सानुबन्धत्वं, तद्रहितत्वं निरनुबन्धत्वं,

*तया* ***द्रव्यरूपतां*** *= अप्रधानद्रव्यस्वरूपतां* ***अश्नुवन्*** *= प्राप्नुवन्* ***तत्र*** = एकधारारूढभक्तिभावान्वितेऽनुष्ठाने **भग्न इव** सन्नपि असन्निव **अवतिष्ठत** इति।

अयं भावः – असत्कल्पनया कल्प्यते यदुत 'जिनपूजाकालो मुहूर्तप्रमाणः' इति। तत्र

कियत्समयपरिमाणे प्रथमविभागे उत्कटो भक्तिभावः, अनुत्कटश्चाविधिभावो वर्तते, ततश्च तत्र उत्कटभक्तिभावमाहात्म्यात् शुद्ध एव योगः। तत्रानुत्कटाविधिभावसत्त्वेऽपि भावतोऽशुद्धयोगो न भवेत्। किन्तु अनन्तरं कियत्समयपरिमाणे द्वितीयविभागे यदा भक्तिभावोऽनुत्कटो भविष्यति, अविधिभावश्च उत्कटस्तदा तत्र भावतोऽशुद्धयोगो भविष्यतीति कृत्वा प्रथमविभागे प्रधानद्रव्यस्वरूपोऽशुद्धयोगो वक्तुं शक्यते, यस्माद् यो भावतोऽशुद्धयोगस्य कारणं भवति, स एव प्रधानद्रव्यस्वरूपोऽशुद्धयोग इति।

द्वितीयविभागे तु प्रोक्तरीत्योत्कटाविधिभावमाहात्म्यादशुद्धयोग एव, परन्तु अनुत्कटभक्तिभावसत्त्वात् पुनस्तृतीयविभागे उत्कटभक्तिभावसम्भवाच्च तत्र प्रधानद्रव्यस्वरूपः शुद्धयोगो वक्तुं शक्यते।

एवं यस्यां जिनपूजायां अविधिभावस्य भक्तिभावस्य चोत्कटानुत्कटस्वरूपस्य परावर्तनं भवति, तस्यां भावतः शुद्धयोगस्याशुद्धयोगस्य च प्रधानद्रव्यस्वरूपस्य शुद्धयोगस्याशुद्धयोगस्य च सद्भावो भवतीति।

अस्यां च जिनपूजायां पुनः पुनः अविधिभावस्य भक्तिभावस्य च परावर्तनेन भवनात् द्वौ अपि स्वफलं प्रदर्शयतः।

परन्तु यस्यां जिनपूजायां भक्तिभाव एकधारारूढ एव भवति, अर्थात् तस्य परावर्तनेनाविधिभाव उत्कटो न भवति, तस्यां जिनपूजायां अनुत्कट एवाविधिभावः सततं विद्यते, स च अग्रे उत्कटाविधिभावस्य कारणं न भवतीति कृत्वा स अनुत्कटोऽविधिभावः प्रधानद्रव्यस्वरूपोऽपि न भवति। यस्मात् भविष्यत्काले भावतोऽविधिभावस्य कारणं भवन्नेवानुत्कटोऽविधिभावः प्रधानद्रव्यस्वरूपोऽविधिभावो भवति।

इत्थं च एकधारारूढे भक्तिभावे सति विद्यमानोऽनुत्कटोऽविधिभावः अप्रधानद्रव्यरूपतां प्राप्नोति, ततश्च सन्नपि स मृत इवावतिष्ठते, न किञ्चिदपि स्वफलं ददाति, केवलं भक्तिभावजन्ये फले किञ्चिन्मात्रया हानिर्भवतीति।

**યશો.: एकधारारूढेऽविधिभावेऽप्यविधिभक्तिपर्यवसायिनि विधिपक्षादूषकतामप्यसहमाने भक्तिभावस्तथा(? स्य) अविधियुतस्य विषयेऽप्यर्चनादेर्भावस्तवाहेतुत्वेन न द्रव्यस्तवत्वमिति प्रतिपादनादिति विवेचकाः ॥७॥**

**ચન્દ્ર.: ननु** यथा भक्तिभाव एकधारारूढः सम्भवति, तथाऽविधिभावोऽपि जीवविशेषस्य एकधारारूढः सम्भवतीति ततश्च तदा किं भवतीति ज्ञातुमीहते मन इति अत आह – **एकधारारूढे** = यस्यां जिनपूजायां सततं उत्कट अविधिभाव एव भवति, भक्तिभावस्तु अनुत्कट एव, तस्यां जिनपूजायां स अविधिभाव एकधारारूढ उच्यते, ततश्च तादृशे **अविधिभावेऽपि** = 'यथा पूर्वं एकधारारूढे भक्तिभावे प्रतिपादितं,

तथैवाविधिभावेऽपि मन्तव्यम्' इत्यपिशब्दार्थः। केवलं तत्राविधिभावो भग्न इवावतिष्ठते, अत्र भक्तिभावो भग्न इवावतिष्ठते।

अयं चाविधिभावः कीदृशः? इत्याह **अविधिभक्तिपर्यवसायिनि** = अविधिरेव प्रधानो यस्यां,तादृशी या भक्तिः, तत्स्वरूपोऽयमविधिभावः परमार्थतोऽस्ति इति। न त्वत्र 'अविधिसमन्विता भक्तिः' इत्येवमर्थः करणीयः, यस्मादस्मिन्नर्थे अविधिसमन्विताया भक्तेः प्राधान्यमपि भवेत्, न चैतदिष्टम्, एकधारारूढेऽविधिभावे अविधिप्राधान्यस्यैव प्रतिपादयितुमिष्टत्वाद् इति। अविधिभावस्यैवात्र प्राधान्यं प्रतिपादयितुं स्पष्टं विशेषणमाह - **विधिपक्षादूषकतामप्यसहमाने** इति।

अयं भावः - अविधिभावोऽनेकविधो भवति, तथाहि -

एकस्तावदविधिभावः कारणिक अत एवापवादरूपः, परमार्थतस्तु विधिभाव एवेति।

द्वितीयोऽविधिभावः अज्ञानजन्यो विधिबहुमानादिसमन्वितश्च।

तृतीयोऽविधिभावः विधिज्ञानसद्भावेऽपि प्रमादजन्यः, किन्तु सम्यग्दर्शनमाहात्म्यात् विधिरूपस्य पक्षस्य बहुमानवान्, अतो विधिपक्षप्ररूपणाऽविधिपक्षखण्डनादिगुणवान्।

चतुर्थोऽविधिभावः प्रमादादिजन्यः, मिश्रसम्यक्त्वसदृशत्वात् न विधिपक्षं प्रति बहुमानवान्, न वा विधिपक्षं प्रति निन्दादिमान्। अयं चाविधिभावो विधिपक्षाऽदूषकतावान् गण्यते।

किन्तु योऽविधिभावो विधिपक्षं दूषयति, 'विधिः निष्फल एव, किं तेन' इत्यादिना विधिपक्षं खण्डयति, सोऽविधिभावो विधिपक्षाऽदूषकतामपि न धारयति। स एव 'विधिपक्षादूषकतामपि असहमान' इत्युच्यते।

ततश्च एतादृश एकधारारूढोऽविधिभावो यत्रास्ति, तत्र **भक्तिभावस्तथा** भग्न इवावतिष्ठते इति भावः।

**ननु** किमर्थं 'तत्र विद्यमानोऽनुत्कटो भक्तिभावो भग्न इवावतिष्ठते' इति मन्यते? इत्यत्र कारणमाह - **अविधियुतस्य** = एकधारारूढेण विधिपक्षादूषकतामपि असहमानेनाविधिना सहितस्य **विषयेऽपि** = तीर्थकरादौ श्रेष्ठविषयेऽपीति। कुदेवादिविषये तु तादृशाविधियुतस्यार्चनादेर्भावस्तवहेतुत्वं नैव भवतीति ज्ञापनार्थं अपिशब्दः। **अर्चनादेः** = जिनपूजनादेः, अर्थात् जिनविषयकस्य भक्तिभावस्य **भावस्तवाहेतुत्वेन** = देशविरतिसर्वविरत्यादिस्वरूपस्य भावस्तवस्य द्रव्यस्तवप्रधानप्रयोजनस्य अजनकत्वेन **न द्रव्यस्तवत्वम्** = न तात्त्विकं जिनपूजनत्वम्। निरर्थकमेव तदिति भावः **इति** = **'अविधियुतस्य'** इत्यादेरारभ्य **'न द्रव्यस्तवत्वम्'** इत्येतदन्तं यावत् **प्रतिपादनात्** = **निरूपणात्** ।

**विवेचकाः** = पदार्थं स्पष्टं विवेचयितुं समर्थाः।

अयमत्राशयः -

(१) जिनपूजादौ यस्मिन्ननुष्ठाने सर्वथा भक्तिभाव एवास्ति, अविधिभावस्य लेशोऽपि नास्ति,

तस्मिन्ननुष्ठाने सम्पूर्णं फलं भवति।

(२) जिनपूजादौ यस्मिन्ननुष्ठाने सर्वथाऽविधिभाव एवास्ति, भक्तिभावस्य लेशोऽपि नास्ति, तस्मिन्ननुष्ठाने सम्पूर्णं विपरीतं फलं भवति।

(३) जिनपूजादौ यस्मिन्ननुष्ठाने उत्कटभक्तिभावस्य कालः प्रभूतः, उत्कटाविधिभावस्य च कालोऽ-ल्पः, अर्थादनुत्कटभक्तिभावस्य कालोऽल्पः, अनुत्कटाविधिभावस्य कालः प्रभूतः, तत्र शुभं फलं प्रभूतं, तदपेक्षयाऽशुभं फलमल्पमिति।

(४) जिनपूजादौ यस्मिन्ननुष्ठाने उत्कटाविधिभावस्य कालः प्रभूतः, उत्कटभक्तिभावस्य च कालोऽ-ल्पः, अर्थादनुत्कटाविधिभावस्य कालोऽल्पः, अनुत्कटभक्तिभावस्य च कालः प्रभूतः, तत्राशुभं फलं प्रभूतं, तदपेक्षया शुभं फलं अल्पमिति।

(५) जिनपूजादौ यस्मिन्ननुष्ठाने उत्कटभक्तिभाव एवानवरतं वर्तते, ततश्चोत्कटाविधिभावो नैव भवति, केवलं अनुत्कटाविधिभावो वर्तते, तत्र स निरनुबन्धतया = अप्रधानतया द्रव्यरूपतां प्राप्नुवन् भग्न इवावतिष्ठते।

(६) जिनपूजादौ यस्मिन्ननुष्ठाने उत्कटाविधिभाव एवानवरतं वर्तते, ततश्चोत्कटभक्तिभावो नैव भवति, केवलं अनुत्कटभक्तिभावो वर्तते, तत्र स निरनुबन्धतया = अप्रधानतया द्रव्यरूपतां प्राप्नुवन् स भग्न इवावतिष्ठते।

एवं सङ्क्षेपतोऽभिहितः सारः, विस्तरार्थस्तु स्वयमेवाभ्युह्य ग्राह्यः।

इदन्तु स्पष्टीकर्तव्यम्-अनादिसंसारे जीवेनोत्कटोऽनुत्कटो वा स्वल्पोऽपि भक्तिभावो नैव प्राप्तः, यस्मात्तस्य प्राप्तिश्चरमावर्त एव भवति। ततश्च यद्यपि प्रतिपादितरीत्या बहुकालीनोत्कटाविधिभाव - समन्वितस्याल्पकालीनोत्कटभक्तिभावसमन्वितस्य जिनपूजाद्यनुष्ठानस्य बहुपापफलकत्वं अस्ति, तथाऽपि तत्र भक्तिभावप्राप्तिरेव चरमावर्तसूचिकेति महत्फलम्।

एवमेवैकधारारूढेणाविधिभावेन समन्विते जिनपूजादौ यद्यपि अनुत्कटभक्तिभाव भग्न इव एवातिष्ठते, तथाऽपि तस्य प्राप्तिरेव दुर्लभेति तदपेक्षया तु महत्फलमेव। यत्तु अत्र अल्पाधिकफलविचारणं क्रियते, तत् एकधारारूढोत्कटभक्तिभावसमन्वितजिनपूजाद्यपेक्षया, बहुकालीनोत्कटभक्तिभावसमन्वितजिनपूजाद्यपेक्षया चेति। यस्मात् तत्र प्रभूतं फलं, तदपेक्षया एकधारारूढोत्कटाविधिभावसमन्वितजिनपूजादौ बहुकालीनोत्कटाविधिभावसमन्वितात्पकालीनोत्कटभक्तिभावयुक्तजिनपूजादौ च चरमावर्तसूचनमात्ररूपं फलमित्यादि स्पष्टं विवेचनीयमिति।

**यशो.: ननु किमित्येवमविधियुतभक्तिकर्मणो व्यवहारतो निश्चयतो वा बन्धप्रदीर्घकालापेक्षया मिश्रत्वमुच्यते।**

**चन्द्र.:** शङ्कते – **ननु किमित्येवं** = प्रतिपादितनीत्या **अविधियुतभक्तिकर्मणो व्यवहारतो** 'मिश्रत्वं उच्यते' इत्यन्वयः, **निश्चयतो वा बन्धप्रदीर्घकालापेक्षया मिश्रत्वमुच्यते।**

व्यवहारत एकस्मिन्नेव समयेऽपि मिश्रत्वं सम्भवति, निश्चयतस्तु एकस्मिन्समये शुद्धोऽशुद्धो वा एक एव योगः, केवलं बन्धप्रदीर्घकालापेक्षया परिणामपरावृत्त्या च मिश्रत्वं उच्यते।

**यशो.: यावता द्रव्यहिंसयैव जलपुष्पादिजीवोपमर्दरूपया मिश्रत्वमुच्यताम् ।**

**चन्द्र.: ननु** हे पूर्वपक्ष! यद्येवं मिश्रत्वं न वक्तव्यं, कथं तर्हि वक्तव्यमित्यतः पूर्वपक्ष एव प्राह– **यावता द्रव्यहिंसयैव** = व्यवहारतो जीवव्यपरोपणरूपयैव, न तु अशुद्धयोगेन मिश्रत्वं इत्येवकारशब्दार्थः। द्रव्यहिंसाया एव स्वरूपमाह– **जलपुष्पादिजीवोपमर्दरूपया मिश्रत्वं** = शुद्धयोगेन सहेति शेषः।

**यशो.: उत्तरकालिकचैत्यवन्दनादिभावस्तवेन तद्दोषापनयनात्कूपदृष्टान्तोपपत्तेः? इत्याशङ्कायामाह -**

**चन्द्र.: ननु** हे पूर्वपक्ष! भवतु नामानया प्रक्रियया मिश्रत्वं, परन्तु अत्र कूपदृष्टान्तघटनं कथं कर्त्तव्यमित्यतः पूर्वपक्षः प्राह – **उत्तरकालिकेत्यादि।** द्रव्यस्तवान्ते निरवद्यं यत् चैत्यवन्दनं क्रियते, तदनन्तरं च यत् 'जय वीयराय' इत्यादिरूपं यत् प्रणिधानं क्रियते, तदेतत् सर्वं भावस्तवः, ततस्तेन भावस्तवेन **तद्दोषापनयनात्** = जलपुष्पादिजीवविराधनारूपाया द्रव्यहिंसाया अपनयनात् **कूपदृष्टान्तोपपत्तेः** = प्रथमं हानिः, पश्चाद् तस्यैवापायस्य निष्काशनं अधिकलाभश्चेत्येवंरूपभावार्थप्रतिपादकस्य कूपदृष्टान्तस्य संघटनं भवतीति।

**इति** पूर्वपक्षकृतायां **आशङ्कायां** आह –

**यशो.: जइ विहिजुयपूयाए, दुट्ठत्तं दव्वमित्तहिंसाए ।**
**तो आहारविहारप्पमुहं, साहूण किमदुट्ठं? ॥८॥**

**चन्द्र.:** अष्टम्या गाथायाः संस्कृतछाया अन्वयश्चैवं।

**यदि विधियुतपूजायां, द्रव्यमात्रहिंसया दुष्टत्वं।**
**तर्हि साधूनां आहारविहारप्रमुखं किं अदुष्टं? ॥८॥**

**यशो.: यदि विधियुतपूजायां विधियुतभक्तिकर्मणि, द्रव्यमात्रहिंसया दुष्टत्वं स्यात्, 'तो' त्ति = तर्हि, साधूनामाहारविहारप्रमुखं किमदुष्टमुच्यते? तदपि दुष्टमेव वक्तुमुचितम्, तत्रापि द्रव्यहिंसादोषस्यावर्जनीयत्वात्। यतनया तत्र न दोष इति चेत्, अत्रापि किं न तथा?**

**चन्द्र.: तत्रापि** = साधूनां आहारविहारप्रमुखेऽनुष्ठाने **द्रव्यहिंसादोषस्य** = जीवोपमर्दरूपस्य **अवर्जनीयत्वात्।** वायुकायस्य विराधना तावदवश्यंभाविनी, अनाभोगप्रमादादिना चान्याऽपि विराधनाऽनिरुद्धप्रसरेति।

पूर्वपक्ष:प्राह - **यतनया तत्र** = आहारविहारादौ **न दोष इति चेत्,**

समाधानमाह - **अत्रापि** = विधिशुद्धजिनपूजायां **किं न तथा** = यतनया दोषाभावः ? दोषाभावो भवत्येवेति भावः।

**यशो.: जिनपूजादौ द्रव्यहिंसाया असदारम्भप्रवृत्तिनिवृत्तिफलत्वेनाहिंसारूपत्वात् ।**

**चन्द्र.: ननु** जिनपूजादौ स्पष्टमेव जलपुष्पादिविराधनादर्शनात् दोषाभावस्वीकरणं दुष्करमित्यत आह - **जिनपूजादौ द्रव्यहिंसाया असदारम्भप्रवृत्तिनिवृत्तिफलत्वेन** असदारम्भस्य या प्रवृत्तिः तस्मात् या निवृत्तिः, सैव फलं यस्याः, सा तथा असदारम्भप्रवृत्तिनिवृत्तिफला, तादृशफलत्वेनेति। **अहिंसारूपत्वात्।**

अयमाशयः -

गृहस्थाः स्वदेहशौचार्थं जलेन स्वदेहक्षालनं कुर्वन्ति, तत्र चाप्कायविराधना, सा चासदारम्भः। एवं स्वकुटुम्बार्थं गृहनिर्माणकारणाय पृथ्वीं खनयन्ति, तत्र च पृथ्वीविराधना, सा चासदारम्भः। एवं व्यापारार्थं समुद्रे यानपात्रप्रेषणादिप्रकारेणाऽपि प्रभूतं असदारम्भं प्रवर्तयन्ति।

एष सर्वोऽपि असदारम्भोऽशातादिपापकर्मणः कारणं भवति।

यदा तु ते एव गृहस्था जिनपूजार्थं स्नानं कुर्वन्ति, जिनपूजार्थमेव जिनगृहनिर्माणाय पृथ्वीं खनयन्ति, एवं जिनपूजायां जलपुष्पादीन् जीवान् विराधयन्ति इति, तदा ते सदारम्भे प्रवृत्ताः कथ्यन्ते। एष च सर्वोऽपि सदारम्भो द्वाभ्यां प्रकाराभ्यां असदारम्भस्य निवृत्तिं साधयति, सदारम्भकाले तदुत्तरकाले च। तथाहि -सदारम्भकाले असदारम्भस्यासम्भव इति कृत्वा तदा तन्निवृत्तिः इत्येकः प्रकारः, तथा सदारम्भेण मोहनीयक्षयोपशमं साधयित्वोत्तरकालं असदारम्भस्य निवृत्तिं साधयति इति द्वितीयः प्रकारः।

इत्थं च सदारम्भोऽसदारम्भनिवृत्तिफलक इति कृत्वा परमार्थतः स अहिंसैव, ततश्च जिनपूजादौ विद्यमानः सदारम्भोऽहिंसैवेति न जिनपूजादौ सदारम्भेन कारणेन दुष्टत्वमिति।

**यशो.: तदुक्तम् -**

**''असदारंभपवत्ता, जं च गिही तेण तेसि विण्णेया ।**
**तण्णिव्वित्तिफल च्चिय, एसा परिभावणीयमिणं'' ॥१॥ (पू. पञ्चा. ४३)**

**चन्द्र.: तद्** = अनन्तरोक्तं **उक्तं** = कथितं पूजापञ्चाशके।

गाथाऽन्वयस्त्वेवम् → **यस्माच्च कारणात् गृहिणोऽसदारम्भप्रवृत्ताः,** तेन = **तस्माच्च कारणात्तेषां गृहस्थानां एषा तन्निवृत्तिफला चैव, इदं परिभावनीयम्** ←।

**यशो.: 'असदारम्भप्रवृत्ताः = प्राण्युपमर्दनहेतुत्वेनाशोभनकृष्यादिव्यापारप्रसक्ताः, यद्यस्माद्धेतोः, चशब्दः समुच्चये, गृहिणः = गृहस्थाः, तेन हेतुना, तेषां = गृहिणां, विज्ञेया = ज्ञातव्या, तन्निवृत्तिफलैव = देहगेहादिनिमित्तजीवोपमर्दनरूपाशुभारम्भनिवृत्तिप्रयोजनैव। भवति हि जिनपूजाजनितभावविशुद्धिप्रकर्षेण चारित्रमोहनीयक्षयोपशमसद्भावात्कालेनासदारम्भेभ्यो निवृत्तिः। तथा जिनपूजाप्रवृत्तिकाले चाऽसदारम्भाणामसम्भवात् शुभभावसम्भवाच्च तन्निवृत्तिफलाऽसौ भवतीत्युच्यते, एषा = जिनपूजा, परिभावनीयं = पर्यालोचनीयम्, इदं = जिनपूजाया असदारम्भनिवर्तनफलत्वं भवद्भिरपि, येनावबुध्य तथैव प्रतिपद्यते, इति गाथार्थः' इति पञ्चाशकवृत्तौ।**

**चन्द्र.:** अस्या एव गाथायाः पञ्चाशकग्रन्थे लिखिता वृत्तिरेव लेशतः प्रदर्श्यते। **असदारम्भेत्यादि।** वृत्तिः प्रायः स्पष्टा, नवरं किञ्चिदुच्यते।

कृष्यादिव्यापारोऽशोभनः किमर्थं? इत्येतत्प्रतिपादनार्थमेवाह - **प्राण्युपमर्दहेतुत्वेन** इति। तथा च यस्मादयं कृष्यादिव्यापारः प्राण्युपमर्दहेतुः, तस्मात्स अशोभन इति।

**देहगेहादीत्यादि** देहगेहादि एव निमित्तं यस्य, तादृशो यो जीवोमर्दनरूपोऽशुभारम्भः, तस्य निवृत्तिः एव प्रयोजनं = कार्यं यस्याः, तादृशी सा जिनपूजाऽस्ति।

**ननु** कथं जिनपूजा असदारम्भनिवृत्तिफलेत्यत आह - **भवति हि** इत्यादि। अत्र हि कालान्तरभाविनी विरतिरूपा असदारम्भनिवृत्तिः प्रतिपादिता।

तथा **जिनपूजाप्रवृत्तिकाले** इत्यादि। अत्र हि जिनपूजाकालभाविनी असदारम्भनिवृत्तिः प्रतिपादिता। तत्रापि यदि शुभभावो न भवेत्, तर्हि भावतोऽसदारम्भनिवृत्तिः न स्यात्। तस्माद् भावतोऽसदारम्भनिवृत्तिप्रसाधनार्थं **शुभभावसम्भवाच्चेति** उक्तम्। तदभावे तु अभव्यानामपि व्यवहारतोऽसदारम्भनिवृत्तिः भवत्येव, न च तया कोऽपि आत्मिको लाभ इति। **भवद्भिरपि** = पूर्वपक्षरूपैः, किमर्थं तैरपि इदं परिभावनीयं इत्याह - **येन** = परिभावनेन **अवबुध्य** = जिनपूजाया असदारम्भनिवर्तनफलत्वं सम्यग् ज्ञात्वा **तथैव** = यथा सम्यग् ज्ञानं, तथैव **प्रतिपद्यते, इति गाथार्थः।**

**यशो.: "यतनातो न च हिंसा, यस्मादेषैव तन्निवृत्तिफला।**
**तदधिकनिवृत्तिभावाद्विहितमतोऽदुष्टमेतदिति" ॥१६॥ (षष्ठषोडशके)**

**चन्द्र.:** जिनपूजादौ द्रव्यहिंसा यतनासद्भावान्न हिंसेति पदार्थं पाठान्तरेण दृढीकुर्वन्नाह - **यतनातो** इत्यादि। जिनपूजायां यतनातो **हिंसा** न, यस्मात् **एषैव** = द्रव्यहिंसैव **तदधिकनिवृत्तिभावात्** = जिनपूजासम्बन्धिहिंसायाः सकाशाद्याऽधिका हिंसा, तस्मात् या निवृत्तिः, तस्याः सद्भावात् **तन्निवृत्तिफला** = हिंसानिवृत्तिफला। **अतो** = अस्मात्कारणात् **एतद्** = जिनभवननिर्माणं इति षोडशकगाथासङ्क्षेपार्थः।

**यशो.: अत एवाऽऽपेक्षिकाल्पायुष्कताधिकारे 'नन्वेवं प्राणातिपातमृषावादावप्रासुकदानं च कर्त्तव्यतामापन्नमिति चेत्? आपद्यतां नाम भूमिकाविशेषापेक्षया, को दोषः? अत एव यतिधर्माऽशक्तानां द्रव्यस्तवद्वारेण प्राणातिपातादौ प्रवृत्तिः प्रवचने प्रोक्ता' इति भगवतीवृत्तावुक्तम् ।**

**चन्द्र.: अत एव** = यतनासत्त्वे द्रव्यहिंसाया असदाम्भप्रवृत्तिनिवृत्तिफलत्वादेव **आपेक्षिकाल्पायुष्कताधिकारे** = वधादिविरतिनिरवद्यदानजन्यस्य शुभदीर्घायुष्कस्यापेक्षया अल्पं यत् शुभायुष्कं, तदापेक्षिकं अल्पायुष्कं, तादृशायुष्कताया अधिकार इत्यर्थः। एतच्चायुष्कं जिनपूजार्थवधादिसत्त्वे भक्त्या सदोषदाने च भवतीति उक्तमेव प्राक्।

भगवतीवृत्तिसम्बन्धी पाठस्तु प्रायः सुगम एव, नवरं **नन्वेवं** = यदि जिनपूजार्थप्राणातिपातादेः शुभाल्पायुष्कताकारणत्वं, तर्हि तानि कर्तव्यानि आपद्येरन्निति।

समादधति अभयदेवसूरयः – **आपद्यतां नाम भूमिकाविशेषापेक्षया** = मुग्धतासमन्वितशुभभाववत्तास्वरूपो यो भूमिकाविशेषः, तदपेक्षया त्रीण्यपि कर्त्तव्यान्येव तेषामिति।

**अत एव** = भूमिकाविशेषापेक्षया कर्त्तव्यत्वमकर्त्तव्यत्वं वा सिध्यतीति यत्तत्त्वं, तस्मादेव कारणात् **यतिधर्माशक्तानां** = साधुधर्मं स्वीकर्तुं असमर्थानां **द्रव्यस्तवद्वारेण** = जिनपूजादिस्वरूपेण **प्राणातिपातादौ प्रवृत्तिः प्रवचने प्रोक्ता** इति।

**यशो.: अत्र यतिधर्माशक्तत्वम् असदारम्भप्रवृत्तत्वम् अधिकारिविशेषणं द्रष्टव्यम् ।**

**चन्द्र.: ननु** भगवतीवृत्त्या जिनपूजाया असदारम्भप्रवृत्तिनिवृत्तिफलत्वं कथं सिध्यतीति चेत्, **अत्र** = भगवतीवृत्तौ **यतिधर्माशक्तत्वं असदारम्भप्रवृत्तत्वं अधिकारिविशेषणं** = 'जिनपूजा करणेऽधिकारी कः?' इति प्रदर्शकं विशेषणं प्रदत्तमिति।

अयं भावः –

''औषधग्रहणे कोऽधिकारी?'' इति चिन्तायां 'यो रोगी स औषधाधिकारी' इति उच्यते। अत्र रोगित्वं औषधाधिकारिविशेषणम्।

एवमत्र 'जिनपूजायां कोऽधिकारी?' इति चिन्तायां 'यो यतिधर्माशक्तः, स जिनपूजाधिकारी' इति भगवतीवृत्तौ उक्तम्। ततश्च यतिधर्माशक्तत्वं जिनपूजाधिकारिविशेषणम्, यतिधर्माशक्तत्वं नाम असदारम्भप्रवृत्तत्वमेव, यस्मात् असदारम्भप्रवृत्तः कदापि यतिधर्मशक्तो न भवति। ततश्चासदारम्भप्रवृत्तिमत्त्वमेव पूजाधिकारिविशेषणम्।

एवं च यथा रोगी रोगनाशार्थं औषधं गृह्णाति इति औषधस्य फलं रोगनिवृत्तिरेव, एवं असदारम्भप्रवृत्तिमान् असदारम्भप्रवृत्तिनिरोधार्थमेव सदारम्भरूपं जिनपूजादिकं गृह्णाति इति जिनपूजादेः फलं

असदारम्भप्रवृत्तिनिवृत्तिरेवेति सिद्धम्।

ततश्च पञ्चाशकपाठात् षोडशकपाठात् भगवतीपाठाच्च स्पष्टं सिध्यति यदुत जिनपूजादिकं असदारम्भप्रवृत्तिनिवृत्तिफलकं, ततश्च जिनपूजादिहिंसाया: परमार्थतोऽहिंसात्वमेवेति यतनासत्त्वे जिनपूजादिकेऽनुष्ठाने द्रव्यहिंसाया लेशतोऽपि दोषत्वं नास्त्येवेति दृढतरं मन्तव्यमिति।

**यशो.: कूपज्ञातान्यथानुपपत्त्या पूजादिकाले द्रव्यहिंसाजनितं पापमवर्जनीयमेव, आज्ञायोगादाहारविहारादिकं साधूनां न दुष्टमिति चेत् ।**

**चन्द्र.:** एवं तावन्महोपाध्यायै: साधूनां आहारविहारादिकं गृहस्थानां च जिनपूजादिकं द्रव्यहिंसाया: सद्भावात् समानं प्रसाधितम्, ततश्चाहारविहारादिवत् जिनपूजादिकं निर्दोषं प्रसाधितम्, किन्तु पूर्वपक्षो द्वयोर्मध्ये भेदं प्रतिपादयति यदुत "साधूनां आहारविहारादिकेऽनुष्ठाने भगवतां आज्ञाऽस्ति, आज्ञायोगाच्च तत्सर्वं निर्दोषम्, गृहस्थानां तु जिनपूजादिकेऽनुष्ठाने भगवतामाज्ञा नास्ति। किन्तु कूपदृष्टान्त: प्रतिपादितोऽस्ति, कूपदृष्टान्तानुसारेण च तत्र पापं अल्पमपि मन्तव्यमेव इति स्पष्ट एव आहारविहारादिकस्य जिनपूजादिकस्य च भेद" इति। एतदेव सर्वं पूर्वपक्ष: प्रसाधयति – **कूपज्ञातान्यथाऽनुपपत्त्या** = जिनपूजाद्यनुष्ठानविषये शास्त्रे य: कूपदृष्टान्तो निरूपित:, तस्याल्पपापं विनाऽघटमानत्वात् **पूजादिकाले द्रव्यहिंसाजनितं पापं** = अशाताप्रभृतिकं **अवर्जनीयमेव** = अवश्यं मन्तव्यमेव। **आज्ञायोगात्** = 'साधुभि: आहारविहारादिकं करणीयम्' इति जिनाज्ञासद्भावात् **आहारविहारदिकं साधूनां न दुष्टम् इति चेत् ।**

**यशो.: अत्रापि परिमितसंसारफलकत्वार्थवादेनानुकम्पादाविवाज्ञायोग: किं न कल्प्यते?**

**चन्द्र.:** महोपाध्याया: समादधति यदुत "यथाऽऽहारविहारादिकेऽनुष्ठाने आज्ञायोगोऽस्ति, तथैव जिनपूजादिकेऽनुष्ठाने यत् संसाराल्पताकारणत्वं प्रतिपादितं, तेन तस्मिन्नपि आज्ञायोग: कल्पनीय:, यस्मात् संसाराल्पताकारणीभूते अनुष्ठाने भगवान् आज्ञां दद्यादेव, ततश्च साक्षाददृश्यमाणाऽपि सा कल्पयितुं युक्तैव" इति।

एतदेवाहु: – **अत्रापि** = जिनपूजादिकेऽपि, आस्तां आहारविहारादिकेऽनुष्ठाने इत्यपिशब्दार्थ: **परिमितसंसारफलकत्वार्थवादेन** = 'जिनपूजादिकं संसारपरिमितताफलकं' इत्येवं प्रदर्शको यो जिनपूजादिप्रशंसास्वरूप: अर्थवाद:, तेन **अनुकम्पादौ इव आज्ञायोग: किं न कल्प्यते?** अर्थादनुमीयत एव इति भाव:।

अनुमानं चेत्थं –

जिनपूजादिकं 'कर्त्तव्यं' इत्याज्ञा अस्ति परिमितसंसारफलकत्वाभिधानात्, अनुकम्पावत् ।

यत्र यत्र परिमितसंसारफलकत्वाभिधानं तत्र तत्र 'कर्त्तव्यं' इत्याज्ञाऽस्ति यथाऽनुकम्पायाम्। जिनपूजादिकेऽपि परिमितसंसारफलकत्वाभिधानं अस्त्येवेति तत्र 'कर्त्तव्यं' इत्याज्ञाऽपि अस्त्येवेति।

**यशो.: उक्तं हि संसारप्रतनुताकारणत्वं द्रव्यस्तवस्य,**
**तत्र दानादिचतुष्कतुल्यफलकत्वोपवर्णनमप्यत्रोपष्टम्भकमेव ॥८॥**

**चन्द्र.:** एतदेवाह – **उक्तं हि संसारेत्यादि** 'अकसिणपवत्तगाणं' इत्यादिगाथायां प्रागेतद् दृष्टमेवेति। **द्रव्यस्तवस्य** = जिनपूजादिकस्य।

**ननु** सत्यं तदुक्तं, परन्तु पुष्पजलादिहिंसासमन्वितस्य तस्य संसारप्रतनुताकारणत्वं स्वीकर्तुं न मन उत्सहत इति प्रश्ने सति तत्कारणत्वस्य दृढतां सूचयन् शास्त्रपाठान्तरमप्याह – **तत्र** = द्रव्यस्तवे **दानादिचतुष्कतुल्यफलकत्वोपवर्णनमपि** = 'काउण जिणाययणेहिं मंडियं पुढवीं, दाणाइचउक्केण वि सुट्ठु वि गच्छिज्ज अच्चुअं' इति प्राक्प्रतिपादिता या महानिशीथगाथा, तत्र जिनायतनादिरूपे द्रव्यस्तवे यत् दानादिसमानफलकत्वस्य निरूपणं कृतं, तन्निरूपणमपि, न केवलं संसारप्रतनुताकारणत्वनिरूपणमेव आज्ञायोगानुमाने उपष्टम्भकम्'इत्यपिशब्दार्थः। **अत्र** = 'जिनपूजादिकं कर्त्तव्यं' इत्याज्ञायोगस्यानुमाने कर्त्तव्ये **उपष्टम्भकमेव** = पोषकमेव।

अयं भावः –

न दृश्यतां नाम द्रव्यस्तवे साक्षात् 'द्रव्यस्तवः कर्त्तव्यः' इत्याज्ञायोगः। किन्तु 'द्रव्यस्तवः संसारप्रतनुताकारणं' इति वचनं तु दृश्यत एव, ततश्च तेनैव वचनेन द्रव्यस्तवे कर्त्तव्यताप्रतिपादकः आज्ञायोगोऽनुमीयत एव। एवं 'द्रव्यस्तवो दानादिसमानफलकः' इति यदुपवर्णनं महानिशीथेऽस्ति, तेनाऽपि द्रव्यस्तवे कर्त्तव्यताप्रतिपादकः आज्ञायोगोऽनुमीयत एव, तथा च महानिशीथोपवर्णनं द्रव्यस्तवकर्त्तव्यतानुमानस्योपष्टम्भकमेवेति सिद्धम्।

❁ ❁ ❁

**यशो.: अथ 'द्रव्यस्तवे यावानारम्भस्तावत्पापम्'इत्यत्र स्थूलानुपपत्तिमाह -**
**जावइओ आरंभो, तावइयं दूषणंति गणणाए।**
**अप्पत्तं कह जुज्जइ, अप्पंपि विसं च मारेइ ॥९॥**

**चन्द्र.:** कश्चित्पूर्वपक्ष एवं वदति **द्रव्यस्तवे** = जिनपूजादिके **यावान्** = यत्परिमाणः **आरम्भः** = जीववधः, **तावत्पापम्** = तत्परिमाणमसातादिकं कर्म इति।

महोपाध्याया **अत्र** = अस्मिन्पूर्वपक्षवचने **स्थूलानुपपत्तिं** = स्थूलदृष्ट्या दृश्यमानां **अनुपपत्तिं** = असङ्गतिं आह –

नवम्या गाथायाः संस्कृतछाया अन्वयश्च –

**यावान् आरम्भः, तावद् दूषणं इति गणनायां ।**

**अल्पत्वं कथं युज्यते, अल्पमपि विषं च मारयति ॥९॥**

**यशो.: द्रव्यस्तवे यावनारम्भस्तावद्दूषणमिति गणनायां क्रियमाणायां, ऋजुसूत्रनये प्रतिजीवं भिन्नभिन्नहिंसाऽऽश्रयणादसङ्ख्यजीवविषय आरम्भ एकभगवद्विषया च भक्तिरिति अल्पपापबहुतरनिर्जराकारणत्वं सर्वथाऽनुपपन्नम्।**

**चन्द्र.:** हे पूर्वपक्ष! द्रव्यस्तवेऽल्पं पापं बह्वी च निर्जरेति भवतामभिमतम्। त्वं चाधुना वदसि यदुत द्रव्यस्तवे **यावान् आरम्भः** = यत्सङ्ख्याको जीववधस्**तावद्दूषणं** = तत्संख्याकः पापबन्ध इति।

एवं च यदि गणना क्रियते, तर्हि तादृश्यां **गणनायां क्रियमाणायां** सत्यां **ऋजुसूत्रनये** = निश्चयनयविशेषे **प्रतिजीवं भिन्नभिन्नहिंसाश्रयणाद् असङ्ख्यजीवविषय आरम्भः** इत्यादि **सर्वथाऽनुपपन्नं** इति यावत्सर्वं स्पष्टम्।

आशयस्त्वयम् –

अयं हि नयो मन्यते, एकस्मिन्जलबिन्दौ यदि असंख्येया जीवाः, तर्हि एकजलबिन्दुविराधनायां असंख्यजीवानां विराधना, एवं च जिनपूजादौ कोटिप्रभृति जलबिन्दुविराधको गृहस्थः कोटिगुणितानामसंख्यजीवानां विराधकः, भक्तिस्तु तस्य एकस्या भगवत्प्रतिमाया एवेति अत्र हिंसासंख्याप्राचुर्यात् प्रचुरपापमेव, भक्तिसंख्यायाः तुच्छत्वात् तुच्छपुण्यमेव। एवं च द्रव्यस्तवे यत् अल्पपापबहुतरनिर्जराकारणत्वं उच्यते, तत् केनाऽपि प्रकारेण नैव घटत इति।

**यशो.: आत्मरूपहिंसाऽहिंसावादिशब्दादिनयमते त्वाह-अल्पमपि विषं च हालाहलं मारयति। आध्यात्मिक आरम्भो यद्यल्पोऽपि स्यात्तदा पुण्यानुबन्धिपुण्यप्राप्तिर्न स्यादेव, व्याधाद्यपेक्षया कर्णजीविनामिवाल्परसस्यापि तस्य शुभकर्मविरोधित्वादिति भावः ॥९॥**

**चन्द्र.:** पूर्वपक्ष आह → 'यावान् आरम्भः, तावत्पापं' इति तु सत्यम्, परन्तु स आरम्भः ऋजुसूत्रनयेन न ग्राह्यः, किन्तु शब्दसमभिरूढैवम्भूतनयरूपैः त्रिभिर्निश्चयनयैः ग्राह्यः, यस्मात् ते एवं मन्यन्ते यदुत 'न परजीवस्य वधोऽस्माकं हिंसा, परन्तु अस्माकं आत्मन एव ज्ञानादिगुणरूपस्य वधो हिंसा' इति। तथा च जिनपूजायां असंख्यजीवनाशेऽपि स वधो वधो न गण्यते, किन्तु तदा ज्ञानादिगुणरूपस्वात्मविनाश एव अर्थात् ज्ञानादिगुणनाश एव वधो गण्यते, स एव चारम्भः, स च यावान् भवेत् तावत्पापमिति। स चारम्भोऽल्प इति तज्जन्यं पापमप्यल्पमेव ← इति।

अत्र समादधाति – **आत्मरूपहिंसाऽहिंसावादिशब्दादिनयमते तु** = आत्मस्वरूपस्यैव हिंसा अहिंसा तात्त्विकीति वादिनो ये शब्दादिनयाः, तेषां मते पूर्वपक्षेणाङ्गीक्रियमाणे **आह** ग्रन्थकृत् – **अल्पमपि विषं चेत्यादि।**

एतदेव स्पष्टयति – **आध्यात्मिक आरम्भो** = आत्मस्वरूपहिंसास्वरूपो **यद्यल्पोऽपि** आस्तां तावत् बहुः, किन्तु अल्पोऽपि **स्यात्**, तदा **पुण्यानुबन्धिपुण्यप्राप्तिर्न स्यादेव।** यदि हि जिनपूजायां अल्पोऽपि आरम्भो न स्यात्, तर्हि सर्वथा पुण्यमेव स्यात्, न तु अल्पं पापं बहु च पुण्यमिति। यदि च अल्पोऽपि

आरम्भः स्यात्, तर्हि भवन्मतेन स आरम्भ आत्मस्वरूपहिंसारूपः, स च अल्पोऽपि सन् पुण्यानुबन्धिपुण्यविरोधी एवेति तत्राल्पपापं बहु च पुण्यं वक्तुं अशक्यमेवेति भावः। ननु अल्पोऽपि आध्यात्मिक आरम्भः कथं पुण्यानुबन्धिपुण्यविरोधी स्यादित्यतो हेतुमाह – **व्याधाद्यपेक्षया** = एकद्वित्रिचतुर्पञ्चानां मृगादिपञ्चेन्द्रियाणां प्रतिदिनं वधकारको यो व्याधादिः, तदपेक्षया **कर्णजीविनामिव** = नाविकानामिव **अल्परसस्यापि तस्य** = आध्यात्मिकारम्भस्य **शुभकर्मविरोधित्वात्** = सातादिबन्धप्रतिपन्थित्वात् ।

अयं भावः– व्याधादीनां आध्यात्मिक आरम्भोऽधिकः, तदपेक्षया नाविकादीनां आध्यात्मिक आरम्भोऽल्पः, परन्तु 'नाविकादीनां व्याधाद्यपेक्षयाऽल्प आध्यात्मिक आरम्भः तस्मात्तेषां पुण्यानुबन्धिपुण्यं भवतु' इति वक्तुं नैव शक्यते। तत्राल्पोऽपि आरम्भ 'आध्यात्मिक' इति कृत्वा पुण्यानुबन्धिपुण्यप्रतिबन्धको भवत्येवेति।

एवं यदि द्रव्यस्तवे भवता आध्यात्मिक आरम्भ इष्येत, तर्हि स अन्येषामाध्यात्मिकारम्भाणामपेक्षयाऽल्पोऽपि सन् पुण्यानुबन्धिपुण्यप्रतिपन्थी स्यादेवेति अल्पोऽपि आध्यात्मिक आरम्भो विधिशुद्धजिनपूजायां वक्तुमशक्य एव, केवलं जीववधात्मकस्यारम्भस्य तु न दूषकत्वमिति अनेकशो निगदितमेवास्ति।

❁ ❁ ❁

**યશો.: सूक्ष्मानुपपत्तिमाह -**

**कक्कसवेज्जमसायं, बन्धइ पाणाइवायओ जीवो ।**
**इय भगवईइ भणियं, ता कह पूयाइ सो दोसो ।।१०।।**

**ચન્દ્ર.:** एवं स्थूलदृष्ट्या सम्भवन्तीमनुपपत्तिं प्रदर्श्याधुना सूक्ष्मदृष्ट्या दृश्यमानां अनुपपत्तिमाह – दशम्या गाथायाः संस्कृतछाया अन्वयश्चैवम् ।

**जीवः प्राणातिपाततः कर्कशवेद्यमसातं बध्नाति।**
**इति भगवत्यां भणितम्, तस्मात् पूजायां कथं स दोषः ।।१०।।**

**યશો.: 'कर्कशवेदनीयमसातं बध्नाति प्राणातिपाततो जीवः' इति भणितं भगवत्यां तत्कथं पूजायां = भगवच्चरणार्चायां,स प्राणातिपाताख्यो दोषः अल्पोऽपि?, हि तस्मिन् सति कर्कशवेदनीयं कर्म बध्येताऽसातवेदनीयं च, इष्यते च भगवत्पूजया कर्कशवेदनीयकर्माऽबन्धः स्वल्प (अत्यंत) सातवेदनीयबन्धश्चेति विपरीतमापन्नमायुष्मतः ।।१०।।**

**ચન્દ્ર.: तस्मिन् सति** = प्राणातिपाते सति।

ननु जिनपूजायां प्राणातिपातोऽस्त्येव, तथा प्राणातिपातेन कर्कशवेदनीयकर्मणो असातवेदनीयस्य च बन्धोऽपि अस्त्येव, भवतां नाम एतौ द्वौ पदार्थौ, को दोषः? इति चेत्, अरे मुग्ध! तर्हि जिनपूजायां प्राणातिपातेन कर्कशवेदनीयं असातं च स्यात्, **इष्यते च** इत्यादि।

**विपरीतं आपन्नं** = जिनपूजायां कर्कशवेदनीयकर्मबन्धाभावोऽत्यन्तसातवेदनीयबन्धश्च इष्यते, परन्तु तत्र प्राणातिपाते सञ्जायमाने तज्जन्यः कर्कशवेदनीयकर्मबन्धोऽसातवेदनीयबन्धश्च अनिष्टोऽपि सन् स्वीकर्त्तव्य आपद्येत इति भावः। **आयुष्मतः** कटाक्षभाषयोक्तमिदं पदमिति।

कर्कशवेदनीयं नाम प्रभूतदुःखेन यद् वेद्यते, तत्कर्म। एतच्चाग्रे प्रदर्शयिष्यते एवेति।

❁ ❁ ❁

**यशो.: तस्मादयमाऽऽरम्भोऽप्यनारम्भ एव श्रद्धेय इत्याह -**
**आरम्भो वि हु एसो, हंदि अणारम्भओ त्ति णायव्वो।**
**वहविरईए (भगवईए), भणिअं जमकक्कसवेयणिज्जं तु ॥११॥**

**चन्द्र.: ननु** तर्हि जिनपूजायां भवन्नारम्भः प्राणातिपातो न यदि मन्तव्यः, तर्हि किंस्वरूप स? इति जिज्ञासायामाह – **तस्मात्** = जिनपूजायां आरम्भस्य स्वीकारे कर्कशवेदनीयकर्मबन्धाद्यापत्तिसम्भवाद् **अयं** = पुष्पोपमर्दनादिरूप **आरम्भोऽपि** आस्तां तावत् चैत्यवन्दनादिगतोऽनारम्भ इति अपिशब्दार्थः **अनारम्भ एव** = 'न त्वारम्भः' इत्येवकारार्थः **श्रद्धेय** इत्याह –

एकादश्या गाथायाः संस्कृतछाया अन्वयश्च –

**एष आरम्भोऽपि हन्दि अनारम्भ इति ज्ञातव्यः।**
**यत् वधविरत्या (भगवत्यां) अकर्कशवेदनीयं भणितं तु ॥११॥**

**यशो.: आरम्भोऽप्येष = द्रव्यस्तवभावी, हंदीत्यामन्त्रणे, अनारम्भ इति ज्ञातव्यः, असदारम्भनिवृत्त्यंशप्राधान्यात्। यद् = यस्मात्, अकर्कशवेदनीयकर्म वधविरत्यैव बध्यत इति भणितं भगवत्याम्।**

**चन्द्र.: ननु** आरम्भोऽपि सन् 'अनारम्भ' इति कथं ज्ञातव्यः? इत्यतो हेतुमाह - **असदारम्भनिवृत्त्यंशप्राधान्यात्।** तथा च प्रस्तुते आरम्भे असदारम्भस्य निवृत्तिरूपो योंऽशः, तस्यैव प्राधान्यमस्ति, स निवृत्त्यंशस्तु अनारम्भ एवेति तत्प्राधान्यवान् अयं आरम्भोऽपि अनारम्भ एवेति।

ननु 'अत्र असदारम्भस्य निवृत्तिरेव प्रधाना' इति भवता कथं निर्णीतमिति चेत्, अत आह – **यद् = यस्मात्** इत्यादि।

अयं भावः – भगवत्यां वधविरत्यैव अकर्कशवेदनीयं कर्म सातवेदनीयबन्धश्च भणितौ। एतच्च उभयमपि द्रव्यस्तवे वर्तते, ततश्च यदि द्रव्यस्तवे आरम्भः स्यात्, तर्हि वधविरतिर्नैव स्यात्, ततश्च प्रकृतं फलमपि न स्यात्, परन्तुं तत्फलं तु अस्त्येवेति एतदेव मन्तव्यं यदुत द्रव्यस्तवे दृश्यमान आरम्भः परमार्थतोऽनारम्भ एवेति तत्र वधविरतिसद्भावात्फलं सम्भवत्येवेति।

**यशो.: उपलक्षणमिदं सातवेदनीयबन्धस्य ।**

**चन्द्र.: ननु** एकादश्यां गाथायां अकर्कशवेदनीयमेवोक्तं न तु सातवेदनीयमित्यत आह – **उपलक्षणं** = स्वज्ञापकत्वे सति इतरस्यापि ज्ञापकं **इदं** = 'अकर्कशवेदनीयं' इति गाथोक्तं पदं। कस्योपलक्षणमित्याह – **सातवेदनीयबन्धस्य** इत्यादि। तथा च भगवत्यामुभयमपि उक्तं, प्रकृतगाथायां तु गाथावशादेकमेव वक्तुं शक्यमिति एकमेवोक्तं, परन्तु एकेन द्वितीयमपि ग्राह्यमेवेति भावः।

**यशो.: अत्रालापकाः - (भग. ७/६/२८५-२८६)**

**(१) 'अत्थि णं भन्ते! जीवा णं कक्कसवेयणिज्जा कम्मा कज्जंति? हंता अत्थि। कहण्णं भंते! जीवा णं कक्कसवेयणिज्जा कम्मा कज्जंति? गोयमा! पाणाइवाएणं जाव मिच्छादंसणसल्लेणं, एवं खलु गो० जीवा णं कक्कसवेयणिज्जा कम्मा कज्जंति।**

**अत्थि णं भंते! णेरइया णं कक्कस० एवं चेव, एवं जाव वेमाणिआणं।**

**चन्द्र.: अत्र** = 'प्राणातिपाततः कर्कशवेदनीयं कर्म भवति' इत्यादि यत् दशम्यां एकादश्यां च गाथायां प्रतिपादितम्, तस्मिन्विषये **आलापकाः** = भगवतीसूत्रान्तर्गतानि सूत्राणि।

सूत्रालापकानां भावार्थश्चायम् ।

तत्र प्रथमसूत्रम् –

'हे भदन्त! जीवाः कर्कशवेदनीयानि कर्माणि कुर्वन्ति इति किमस्ति?' इति गौतमप्रश्नः।

'हन्त! अस्ति' इति भगवदुक्तमुत्तरम्।

'हे भदन्त! जीवाः कथं = केन प्रकारेण कर्कशवेदनीयानि कर्माणि कुर्वन्ति?' इति प्रश्नः।

'हे गौतम! प्राणातिपातेन यावत् मिथ्यादर्शनशल्येन, एवं खलु जीवाः कर्कशवेदनीयानि कर्माणि कुर्वन्ति।' इति उत्तरम्।

अत्र प्राणातिपातः अष्टादशपापस्थानानां मध्ये प्रथमं पापस्थानं, मिथ्यादर्शनशल्यं च अष्टादशमम्, प्रथमाष्टादशमयोर्ग्रहणेन 'यावत्' पदोपादानेन च मध्यमानि षोडश पापस्थानानि ग्राह्याणि।

तथा सामान्यत आगमशैलिरेवेयम् यदुत प्रथमं सर्वजीवान् आश्रित्य ततश्च चतुर्विंशतिदण्डकान् आश्रित्य पदार्थप्ररूपणं क्रियते। तत्र चतुर्विंशतिदण्डका इमे – सप्त नरका एको दण्डकः, दश भवनपतयश्च दश दण्डकाः, पृथ्वीकायः, अप्कायः, तेजस्कायः, वायुकायः, वनस्पतिकायः, द्वीन्द्रियाः, त्रीन्द्रियाः, चतुरिन्द्रियाः, तिर्यग्पञ्चेन्द्रियाः, मनुष्याः, व्यन्तराः, ज्योतिष्काः, वैमानिकाश्चेति।

तत्र प्रथमं जीवानाश्रित्य प्ररूपणं कृत्वाऽधुना नारकादीनाश्रित्य तदेव प्ररूपणं कर्तुं आह – **नेरइया** इत्यादि। तथा च जीवा इव सर्वेऽपि दण्डकाः प्राणातिपातादिना कर्कशवेदनीयं कर्म कुर्वन्तीति।

**यशो.: अत्थि णं भंते! जीवा णं अकक्कसवेयणिज्जा कम्मा कज्जंति? हंता अत्थि। कहण्णं भंते! जीवा णं अकक्कसवेयणिज्जा कम्मा कज्जंति? गो० पाणाइवायवेरमणेणं जाव परिग्गहवेरमणेणं, कोहविवेगेणं जाव मिच्छादंसणसल्लविवेगेणं। एवं खलु गोयमा! जीवा णं अकक्कसवेयणिज्जं (ज्जा) कम्मं (म्मा) कज्जइ (कज्जंति)।**

**अत्थि णं भंते। णेरइआ णं अकक्कसवेयणिज्जा कम्मा कज्जंति? णो इणट्ठे समट्ठे। एवं जाव वेमाणिया णं णवरं मणुस्साणं जहा जीवा णं।**

**चन्द्र.:** अधुना द्वितीयसूत्रम्।

तत्र जीवास्तावदकर्कशवेदनीयं कर्म कुर्वन्त्येव, परन्तु चतुर्विंशतिदण्डकानां मध्ये सर्वेऽपि दण्डका न तत्कुर्वन्ति, यस्मात् प्राणातिपातविरमणादिना तद्भवति, तच्च विरमणं विरतिरूपं न सर्वेषु दण्डकेषु, किन्तु केषुचिदेवेति सूत्रे जीवानाश्रित्य अकर्कशवेदनीयकर्म प्राणातिपातविरमणादिना प्रतिपादितं, परन्तु दण्डकानाश्रित्य केवलं मनुष्येष्वेव प्राणातिपातविरमणादिना अकर्कशवेदनीयकर्म प्रतिपादितं, तत्र विरतिसद्भावात्। शेषेषु दण्डकेषु तदभाव एव प्रतिपादितः, विरत्यभावादिति।

एतदेव सूत्रे 'णवरं मणुस्साणं जहा जीवाणं' इत्यादिना निगदितम्।

**यशो.: अत्थि णं भंते! जीवा णं सातावेदणिज्जा कम्मा कज्जंति? हंता अत्थि। कहण्णं भंते! जीवा णं सातावेदणिज्जा कम्मा कज्जंति? गो० पाणाणुकंपयाए, भूयाणुकम्पयाए, जीवाणुकम्पयाए सत्ताणुकंपयाए। बहूणं पाणाणं जाव सत्ताणं अदुक्खणयाए, असोयणयाए, अजूरणयाए, अतिप्पणयाए अपीडणयाए अपरियावणयाए एवं खलु गो० जीवा णं सातावेदणिज्जा कम्मा कज्जंति। एवं णेरइआण वि, एवं जाव वेमाणिआणं।**

**चन्द्र.:** अधुना तृतीयसूत्रम्।

'हे भदन्त! जीवाः सातवेदनीयं कर्म कुर्वन्तीति एतद् किमस्ति?, इति प्रश्नः।

'हन्त! अस्ति' इति उत्तरम्।

'हे भदन्त! जीवाः कथं सातवेदनीयं कर्म कुर्वन्ति' इति पुनरपि प्रश्नः।

'गौतम! प्राणानुकम्पया, भूतानुकम्पया, जीवानुकम्पया, सत्त्वानुकम्पया, बहूनां प्राणानां भूतानां जीवानां सत्त्वानां अदुःखनतया अशोचनतया अजूरणतया अतिप्रणतया अपीडनतया अपरितापनतया जीवाः सातवेदनीयं कर्म कुर्वन्ति।

एवं नारकादारभ्य वैमानिकपर्यन्तेषु चतुर्विंशतिदण्डकेषु सातबन्धो विज्ञेयः।

**यशो.: अत्थि णं भंते! जीवा णं अस्साया वेअणिज्जा कम्मा कज्जंति? हंता अत्थि। कहण्णं भंते! जीवा णं अस्साया वेअणिज्जा कम्मा कज्जंति? गो० परदुक्खणयाए, परसोअणयाए, परजूरणयाए, परतिप्पणयाए, परपीडणयाए, परपरियावणयाए, बहूणं पाणाणं जाव सत्ताणं दुक्खणयाए जाव परितावणयाए। एवं खलु गो० जीवा णं अस्सायावेअणिज्जा कम्मा कज्जंति। एवं णेरइआण वि एवं जाव वेमाणियाणं ॥'**

**चन्द्र.:** अधुना चतुर्थसूत्रम् -

तत्तु तृतीयसूत्राद् विपरीतं ज्ञेयम्, भावार्थस्तु तस्य स्पष्ट एवेति।

**यशो.: कर्कशरौद्रदु:खैर्वेद्यन्ते यानि तानि कर्कशवेदनीयानि, स्कन्दकाऽऽचार्यसाधूनामिव। अकर्कशेन सुखेन वेद्यन्ते यानि तान्यकर्कशवेदनीयानि भरतादीनामिव। दु:खस्य करणं दु:खनं तद् (न) विद्यते यस्य तद्भावोऽदु:खनता तया। एतदेव प्रपञ्च्यते-असोयणयाए ति दैन्यानुत्पादेन, अजूरणयाए त्ति शरीरापचयकारिशोकानुत्पादनेन, अतिप्पणयाए त्ति अश्रुलालादिक्षरणकारिशोकानुत्पादनेन, अपीडणयाए त्ति यष्ट्यादिपीडनपरिहारेण, अपरितावणयाए त्ति शरीरपीडानुत्पादनेनेति वृत्ति: ॥**

**चन्द्र.:** अधुना सूत्रचतुष्कसम्बन्धिनी भगवतीवृत्ति: प्रदर्श्यते- **कर्कशरौद्रेत्यादि**। सा च सुगमैव, नवरं **स्कन्दकाचार्यसाधूनामिव** = पालकेन यन्त्रके तिलकवत् पीडितानाम् इव **भरतादीनामिव** = आदर्शगृहे केवलज्ञानप्राप्तिमताम्।

**यशो.: वस्तुतो अनिवर्त्तनीयाशुभानुबन्धं कर्कशवेदनीयम्, अतादृशमकर्कशवेदनीयम् ।**

**चन्द्र.:** ननु भगवतीसूत्रचतुष्कस्यार्थेऽनेके प्रश्ना:, तथाहि -

(१) एकेन्द्रिया जीवा: प्राणातिपातादीन् अकुर्वाणा: कथं कर्कशवेदनीयकर्मबन्धका उक्ता: ? यदि च तेषामविरतिसद्भावात् कर्कशवेदनीयं कर्म उच्येत, तर्ह्यपि तन्न युक्तम्। यस्मात् अविरतिपरिणामेन यद्यपि तेषां भवतु नामऽसातं कर्म, परन्तु तीव्राध्यवसायाभावात् तेषां तत्कर्म कर्कशरौद्रदु:खै: वेदनीयं तु नैव भवति। किन्तु सामान्यदु:खैरेव वेदनीयं भवति। इत्थं च एकेन्द्रियाणां कर्कशवेदनीयकर्मबन्धोऽनुपपन्न इति प्रथम: प्रश्न:।

(२) द्वितीयसूत्रे मनुष्यणामेव अकर्कशवेदनीयकर्मबन्ध उक्त:, न तु अन्येषां दण्डकानां। तत्र अकर्कशवेदनीयकर्मबन्धकारणानि तु प्राणातिपातादिविरमणान्येव प्रतिपादितानि, ततश्च वैमानिकदेवप्रभृतिषु मिथ्यादर्शनशल्यरूपस्याष्टादशमस्य पापस्थानस्य विरमणसद्भावात् तेषु अकर्कशवेदनीयकर्मबन्ध: सम्भवेदेव, स किमर्थं अत्र नोक्त: ? तथा पञ्चेन्द्रियतिर्यक्षु तु देशविरतिपरिणामस्वीकारात् प्राणातिपातादीनामपि लेशतो विरमणमस्त्येव इति तेष्वपि अकर्कशकर्मबन्धो वक्तव्य:, न चोक्त इति प्रश्न:।

(३) तथा चतुर्विंशतिदण्डकेषु सातबन्ध उक्तः, किन्तु अत्र सातबन्धः प्राणादीनां अदुःखनाशोचनादिभिरभिप्रेतः, तादृशश्च सातबन्ध एकेन्द्रयादिषु कथं सम्भवेत्? ते हि अदुःखनाशोचनादि न कुर्वन्त्येव।

किञ्च यदि एकेन्द्रिया अदुःखनाशोचनादिभिः सातं बध्नन्ति, तर्हि प्राणादीनां अदुःखनादि एव प्राणातिपातविरमणं, ततश्च तेषु प्राणातिपातविरमणसिद्धिः, ततश्च द्वितीयसूत्रानुसारेण तेषु अकर्कशवेदनीयापत्तिर्दुर्वारेति।

(४) तथा एकेन्द्रियाः परदुःखनतादि न कुर्वन्ति, तत एकेन्द्रियाणां तज्जन्यमसातं चतुर्थसूत्रोक्तं कथं घटेतेति।

अत्र महोपाध्यायाः समादधति –

**वस्तुतः** = परमार्थतः **अनिवर्तनीयाशुभानुबन्धं** = निवर्तयितुं अयोग्योऽशुभानुबन्धो यत्कर्मणः, तत् कर्म कर्कशवेदनीयम्।

तथा च हे प्रश्नकार! भगवतीवृत्तौ यदुक्तं यदुत '**कर्कशरौद्रदुःखैर्वेद्यन्ते यानि तानि कर्कशवेदनीयानि**' तत् स्थूलव्यवहारत उक्तम्। यस्मात् एकेन्द्रिया न तादृशतीव्राध्यवसायेन प्राणातिपातादीनि कुर्वन्ति, येन तेषां कर्कशवेदनीयं कर्म बध्येत। परन्तु तेषां अविरत्यादिमाहात्म्यात् तादृशं कर्म बध्यते, यत्कर्म उदयमागतं सन् पुनरपि तादृशं कर्म बन्धयति, एवं अनिवर्तनीयाशुभानुबन्धवत् कर्म तेषां भवति, एतदेव च तेषां कर्कशवेदनीयं कर्म।

यथाहि कस्यचित् सद्योघाती महान् शूलादिस्वरूपो रोगो भवति, कस्यचित्तु जीवितानपहार्यपि चिरकालस्थायी औषधादिभिरपि अनिवारणीयो ज्वरादिरूपः सामान्यरोगो भवति, परन्तु द्वितीयरोगोऽपि प्रभूतानर्थकार्येव।

एवं प्रकृते नरकादिसम्बन्धिदुःखैः वेदनीयं कर्म महारोगसदृशम्, निगोदादिस्थानसम्बन्धिसामान्यदुःखैः वेदनीयं किन्तु दीर्घकालं यावद् वेदनीयं कर्म दीर्घकालस्थायि सामान्यरोगसदृशं, परन्तु तस्यानुबन्धो निवारयितुं न शक्यत इति कृत्वा तत् कर्कशवेदनीयमेव।

तथा चैकेन्द्रियाणां उत्कटदुःखोत्पादककर्म तीव्राध्यवसायाभावात् मा भवतु नाम, किन्तु चिरकालीनानुत्कटदुःखोत्पादककर्म तु भवितव्यतादिवशात्सम्भवत्कर्कशमेवेति प्रथमप्रश्नसमाधानमिति।

**अतादृशं** = निवर्तनीयाशुभानुबन्धं कर्म **अकर्कशवेदनीयं**, ।

**यशो.: वैमानिकादिषु तन्निषेधश्च प्रौढिवादः विशिष्टविरतिपरिणाम-जनिताऽशुभानुबन्धापनयापेक्षया ।**

**चन्द्र.:** अधुना द्वितीयप्रश्नस्य समाधानमाह – **वैमानिकादिषु तन्निषेधश्च** = अकर्कशवेदनीयकर्मनिषेधश्च **प्रौढिवादः** = बहुमान्यपुरुषपरम्परासमायातो वादः **विशिष्टविरतिपरिणामजनिताशुभानुबन्धापनयापेक्षया ।**

अयं भावः – साधोः प्राणातिपातादिविरमणं सर्वथाऽस्ति, तिर्यग्देशविरतिधरस्य देशतोऽस्ति, वैमानिकादीनामपि मिथ्यादर्शनशल्यविरमणं अस्ति। ततश्च तादृशविरमणप्रभावात् साधोः तिर्यग्देशविरतिधरस्य वैमानिकादीनां च सर्वेषां अशुभानुबन्धस्य निवर्तनं भवत्येव। ततश्च सर्वेषां निवर्तनीयाशुभानुबन्धं कर्म अर्थात् अकर्कशवेदनीयं कर्म भवत्येव। तथाऽपि अत्र तिर्यक्षु वैमानिकादिषु च तन्नोक्तं, तत्र कारणं तु इदमेव, यदुत यो विशिष्टो विरतिपरिणामः, तज्जनितो योऽशुभानुबन्धापनयः, च तद्वदेव कर्मात्र अकर्कशवेदनीयतया ग्राह्यमिति विवक्षितम्। तिर्यक्षु सर्वविरतिपरिणामो नास्ति, वैमानिकादिषु तु देशविरतिपरिणामोऽपि नास्ति, ततश्च तेषु अकर्कशवेदनीयं न स्वीकृतम्। देशविरतिपरिणामजन्यस्याशुभानुबन्धापनयस्य मिथ्यादर्शनविरमणजन्यस्य चाशुभानुबन्धापनयस्य तेषु सत्त्वात् तदपेक्षया तु तेष्वपि अकर्कशवेदनीयं अस्त्येव। यदि तु नैवं मन्येत, तर्हि तेषु मिथ्यात्वशल्यस्य विरमणं निरर्थकमेव स्यात्।

**यशो.: अन्यथा मिथ्यादर्शनशल्यविरमणस्याऽपि तत्र नैष्फल्यापत्तेः ।**

**चन्द्र.:** एतदेवाह – **अन्यथा** = 'विशिष्टविरतिपरिणामजनितस्याशुभानुबन्धापनयस्य अपेक्षयैव अकर्कशवेदनीयं कर्मात्राभिप्रेतं, इत्येवं यदि न मन्येत, किन्तु सामान्यत एव 'निवर्तनीयाशुभानुबन्धं कर्म अकर्कशवेदनीयं' इति यदि मन्येत, तर्हि **मिथ्यादर्शनशल्यविरमणस्यापि** = 'प्राणातिपातादिविरमणस्य तु असद्भावात् तत्र तस्य निष्फलत्वं तावद् भवेदेव, परन्तु यदेतत् मिथ्यात्वविरमणं वैमानिकादिषु अस्ति, तस्यापि' इत्यपिशब्दार्थः। **तत्र** = वैमानिकादिषु **नैष्फल्यापत्तेः** = अकर्कशवेदनीय-कर्मस्वरूपस्यफलस्याभावात् अन्यफलस्य चाप्रतिपादनात् फलरहितत्वापत्तेः।

अस्मन्मते तु नेयमापत्तिः, 'विशिष्टविरतिपरिणामजनितस्यैव अशुभानुबन्ध-अपनयस्य तत्राभाव' इति स्वीकारात् 'मिथ्यादर्शनविरतिपरिणामजनितस्य अशुभानुबन्धस्यापनयनं तत्र सम्भवत्येव, न शास्त्रपाठविरोध' इति।

भवन्मते तु वैमानिकादिषु अकर्कशवेदनीयकर्मण एवाभावः, ततश्च तत्र केनाऽपि प्रकारेणाशुभानुबन्धापनयनमस्वीकृतमेवेति भवेदेव तत्र मिथ्यात्वविरमणस्य निष्फलतापत्तिः।

**यशो.: सर्वसंवरस्य च शैलेश्यामेव सम्भवादिति द्रष्टव्यम् ।**

**चन्द्र.: नन्वेवं** सापेक्षमेव कर्म अकर्कशवेदनीयं उच्यते, तत्र च विशिष्टविरतिपरिणाम एवाधिक्रियते न तु देशविरतिपरिणामो मिथ्यात्वविरमणपरिणामश्च, तर्हि ताविव विशिष्टविरतिपरिणामोऽपि मुच्यताम्,

केवलं सर्वोत्कृष्टो विरतिपरिणाम एव गृह्यतामित्यत आह – **सर्वसंवरस्य च** = सर्वोत्कृष्टस्य विरतिपरिणामस्य **शैलेश्यामेव** = न तु षष्ठादिगुणस्थानेष्वपीति एवकारार्थः **सम्भवात्।**

तथा च सर्वसंवरजनितस्याशुभानुबन्धापनयनस्यापेक्षया यदि अकर्कशवेदनीयं उच्येत, तर्हि तादृशं कर्म षष्ठादिगुणस्थानेऽपि न स्यात्। एवं शैलेश्यामपि न तत् कर्म सम्भवेत्, तत्र कर्मबन्धस्यैवाभावात्। तथा चाकर्कशवेदनीयं कर्मैव न घटेतेति।

तस्मात् अत्र विशिष्टविरतिपरिणामजनितेनाशुभानुबन्धापनयेन युक्तं कर्मैव अकर्कशवेदनीयं ग्राह्यम्, न तु देशविरतिपरिणामजनितेन, न वा मिथ्यात्वशल्यविरमणपरिणामजनितेनाशुभानुबन्धापनयेन युक्तं, न वा सर्वसंवरपरिणामजनितेनाशुभानुबन्धापनयेन युक्तमिति।

**यशो.: एतेन 'देवेष्वर्कर्कशवेदनीयकर्मकरणनिषेधादेव द्रव्यस्तवस्य न तद्धेतुत्वम्'इति दुर्वादिमतमपास्तं।**

**चन्द्र.: एतेन** = प्रौढिवादप्रतिपादनेन **दुर्वादिमतम् अपास्तं** इत्यन्वयः कार्यः।

**देवेषु** इत्यादि। दुर्वादिमतस्याभिप्रायस्त्विदम् → भगवतीसूत्रे अकर्कशवेदनीयं कर्म देवेषु निषिद्धम्, देवाश्च द्रव्यस्तववन्तो भवन्ति, तथाऽपि तेषु यदि तन्नास्ति, ततश्च द्रव्यस्तवसत्त्वेऽपि अकर्कशवेदनीयं नास्तीति 'कारणसत्त्वेऽपि कार्यं नास्ति' इत्यादिस्वरूपः अन्वयव्यभिचारोऽत्र भवतीति कृत्वा द्रव्यस्तवो न अकर्कशवेदनीयस्य कारणम् ← इति।

**यशो.: "ज्ञेया सकामा यमिनाम्" (योगशास्त्रे) इत्यादिवदीदृशप्रौढिवादानामुत्कृष्टनिषेधपरत्वात्।**

**चन्द्र.: ननु** कथं दुर्वादिमतमपास्तं? इति जिज्ञासायामाह – **ज्ञेया सकामा यमिनामित्यादिवत्** इत्यादि।

**अयं भावः**, श्रीयोगशास्त्रे हेमचन्द्रसूरिभिः 'ज्ञेया सकामा यमिनाम्, अकामा त्वन्यदेहिनाम्' इति गाथायां यमिनः = साधवः, तद्भिन्नानां सर्वेषामकामनिर्जरा प्रतिपादिता। ततश्च तत्राऽपि इयमापत्तिः यदुत 'किं देशविरतिधराणां श्रावकाणामपि अकामनिर्जरा भवति?' तत्र समाधानमिदमेव यदुत अयं प्रौढिवादः। एतादृशाः प्रौढिवादाश्च उत्कृष्टस्यैव निषेधं कुर्वन्ति, न तु जघन्यमध्यमयोः। अर्थात् 'साधुभिन्नानां गृहस्थादीनां उत्कृष्टा सकामनिर्जरा नैव भवति' इति। न चैते प्रौढिवादाः सर्वथा निषेधकराः।

प्रस्तुतः अकर्कशवेदनीयस्य देवेषु निषेधकरो भगवतीपाठोऽपि प्रौढिवाद एव, सोऽपि च योगशास्त्रपाठवत् देवेषु विशिष्टविरतिपरिणामवतां सम्भवत् अकर्कशवेदनीयं कर्मैव निषिध्यति, न तु सर्वथा अकर्कशवेदनीयं, तिर्यक्षु मध्यमस्य अकर्कशवेदनीयस्य देवेषु च जघन्यस्याकर्कशवेदनीयस्य सद्भावादिति।

**यशो.: अन्यथा तदीयभगवद्वन्दनगुणोत्कीर्त्तनादीनामप्यतादृशत्वाऽऽपत्तेरिति विभावनीयं सुधीभिः ॥११॥**

**चन्द्र.: ननु** देवानां अकर्कशवेदनीयं कर्म मा मन्यतां नाम, को दोषः ? एवं यमिभिन्नानामपि सकामा निर्जरा मा मन्यतां नाम, को दोषः ? किमिति प्रौढिवादकल्पनेन ? इति शङ्कायामाह – **अन्यथा** = एते पाठाः प्रौढिवादाः, तेषां चोत्कृष्टनिषेधपरत्वमेवेति यदि न मन्यते, तर्हि **तदीयभगवद्वन्दनगुणोत्कीर्तनादीनामपि** = भक्तिमद्भिः देवैः क्रियमाणानां भगवतो वन्दनगुणोत्कीर्तनादिरूपाणां शुभानुष्ठानानामपि, 'तेषां भोगसुखादीनां तावत् अकर्कशवेदनीयाजनकत्वमिष्टमेव, परन्तु एतादृशशुभयोगानामपि' इत्यपि शब्दार्थः। **अतादृशत्वापत्तेः** = अकर्कशवेदनीयकर्मबन्धाकारकत्वापत्तेरिति। **विभावनीयं** = सम्यक् चिन्तनीयं **सुधीभिः** = विवेकिभिरिति।

ननु चतुर्णां प्रश्नानां मध्ये द्वयोः समाधानं निगदितं भवता, किन्तु तृतीयचतुर्थयोस्तु समाधानमवशिष्टमिति चेत्, श्रुणु।

एकेन्द्रियाः प्राणादीनां दुःखनतादिकं न कुर्वन्तीत्यपेक्षया सातबन्धः, ते एव च प्राणादीनां दुःखनतादिविरतिभाजो न भवन्ति, इति तेषां यदाऽसातबन्धः, तदा तत्प्राधान्यं कृत्वाऽसातबन्धो गण्यते।

अयं भावः – सातबन्धकाले एकेन्द्रियादीनां अनाभोगतोऽपि कश्चिच्छुभपरिणामो मन्तव्य एव, स च अदुःखनतादिरूपः, तथाऽसातबन्धकाले एकेन्द्रियादीनां अनाभोगतोऽपि कश्चिदशुभपरिणामो मन्तव्य एव, स च दुःखनतादिरूप इत्येवं तृतीयचतुर्थसूत्रयोरपि समाधानं समवसेयम्।

❁ ❁ ❁

**यशो.: ननु द्रव्यस्तवे भक्तिजन्यसातावेद्यबन्धेन विरुध्यन्नसातबन्धो मा भूत्, पृथिव्याद्युपमर्दात् ज्ञानावरणीयादिबन्धहेतुत्वादेव तस्य हिंसात्वमक्षतमित्याशङ्कायामाह -**

**धुवबन्धिपावहेउत्तणं ण दव्वत्थयंमि हिंसाए ।**
**धुवबन्धा जमसज्झा, तत्ते उइयरेयरासयया ॥१२॥**

**चन्द्र.:** शङ्कते **ननु द्रव्यस्तवे** इत्यादि। सातस्यासातस्य च परस्परं विरोधित्वात् एकबन्धकाले अपरबन्धो मा भवतु, परन्तु सातबन्धकाले ज्ञानावरणादिबन्धस्तु न विरोधी। ततश्चैवं मन्तव्यं यदुत द्रव्यस्तवकाले पृथिव्यादिहिंसावशात् ज्ञानावरणादिकबन्धः, स चाल्पः, तदपेक्षया भक्तिवशात् सातबन्धोऽधिकः, इत्थं चाल्पपापबहुपुण्यरूपं फलं भवेत्। ततश्च कूपदृष्टान्त उपपद्यते, उत्तरकालीनशुभभावेन प्राक्कालीनज्ञानावरणादिविगमसम्भवात्।

एतदेवाह – **पृथिव्यादि** इत्यादि। **तस्य** = द्रव्यस्तवस्य।

द्रव्यस्तवो हि पृथिव्याद्युपमर्दवशात् ज्ञानावरणादिबन्धहेतुः, ततश्च स हिंसा इति भावः। एवं **आशङ्कायां सत्यां** आह –

द्वादश्या गाथायाः संस्कृतछाया अन्वयश्चेत्थम् -

**द्रव्यस्तवे हिंसया ध्रुवबन्धिपापहेतुत्वं न ।**

**यत् तत्त्वे इतरेतराश्रयात् ध्रुवबन्धा असाध्या ॥१२॥**

**यशो.: ध्रुवबन्धिपापस्य ज्ञानावरणादिप्रकृतिकदम्बकरूपस्य हेतुत्वं न द्रव्यस्तवीयहिंसायां वक्तुं युक्तम्। यद् = यस्मात् ध्रुवबन्धा असाध्याः प्रक्रमाद् द्रव्यस्तवभाविहिंसायाः, सामान्यहेतुसद्भावे ह्यवश्यंसम्भविबन्धाः।**

**चन्द्र.: ध्रुवबन्धिपापस्य** = स्वहेतुसत्त्वे यस्य अवश्यंभावी बन्धः, तत् ध्रुवबन्धिपापं, अथवा स्वबन्धविच्छेदो यस्मिन्गुणस्थाने, तद्गुणस्थानं यावत् यस्यावश्यंभावी बन्धः, तत् ध्रुवबन्धिपापम्। तद्भिन्नं तु अध्रुवबन्धि।

यथा मिथ्यात्वस्य स्वहेतोः मिथ्यात्वोदयस्य सत्त्वे अवश्यंभावी बन्धः, अथवा मिथ्यात्वबन्धविच्छेदसम्बन्धिनं प्रथमगुणस्थानं यावत् तत् अवश्यं बध्यत इति तद् ध्रुवबन्धि।

नरकायुषः स्वबन्धहेतुः मिथ्यात्वं, परन्तु मिथ्यात्वसत्त्वे तस्यावश्यंभावी बन्धो न, अथवा मिथ्यात्वगुणस्थाने नरकायुषो बन्धविच्छेदः, किन्तु तद्गुणस्थानं यावत्तस्यावश्यंभावी बन्धो नेति तद् अध्रुवबन्धि।

एतत्सर्वं पञ्चमकर्मग्रन्थे स्पष्टमेव।

ततश्च ज्ञानावरणादिप्रकृतिसमूहरूपस्य ध्रुवबन्धिपापस्य कारणता द्रव्यस्तवसम्बन्धिन्यां हिंसायां वर्तते, इति वक्तुं न योग्यम्।

कस्मान्न योग्यमित्याह - **यद् = यस्माद् ध्रुवबन्धा असाध्याः** = अजन्याः। **ननु** कस्माद्वस्तुनः सकाशादजन्याः ? इत्यत आह - **प्रक्रमात्** = प्रस्तावात् **द्रव्यस्तवभाविहिंसायाः** हेतोः।

ध्रुवबन्धा हि मिथ्यात्वादिरूपं यत् स्वस्य स्वस्य सामान्यकारणं, तत्सत्त्वे अवश्यंभाविनः, न तु द्रव्यस्तवीयहिंसारूपविशेषकारणात् अवश्यंभाविनः, तेषां सत्त्वेऽसत्त्वेऽपि ध्रुवबन्धिपापस्यावश्यम्भावात्।

**यशो.: अत एव यत्र गुणस्थाने तासां व्यवच्छेदस्ततोऽर्वाक् सततबन्ध एवेति सादिसान्तादिभङ्गग्रन्थे व्यवस्थितम् ।**

**चन्द्र.: अत एव** = सामान्यहेतुसद्भावे ध्रुवबन्धानामवश्यंभावित्वादेव कारणात् **यत्र गुणस्थाने** = प्रथमादिरूपे **तासां** = मिथ्यात्वादिप्रकृतीनां **व्यवच्छेदः** = बन्धव्यवच्छेदः, **ततोऽर्वाक्** = तस्मात्पूर्वस्मिन्गुणस्थाने **सततबन्ध एव** = न तु कारणविशेषाभावात् बन्धोपरम इत्येवकारार्थः **सादिसान्तादिभङ्गग्रन्थे** = ध्रुवबन्धिनां अनाद्यनन्तबन्धोऽभव्यानां, अनादिसान्तबन्धो बन्धविच्छेदगुणस्थानमतिक्रान्तानां, सादिसान्तबन्धः पुनः अधस्तनगुणस्थानमागतानां, एवं सादिसान्तादिभङ्गप्ररूपके ग्रन्थे **व्यवस्थितम्।**

यदि हि द्रव्यस्तवीया हिंसा ध्रुवबन्धिप्रकृतिबन्धकारणं स्यात्, तर्हि साधुषु तादृशहिंसाऽभावात् ध्रुवबन्धिबन्धो न स्यादिति, किन्तु भवत्येव मन्तव्यं। तस्मात्स्पष्टमेव मन्तव्यं यदुत द्रव्यस्तवीया हिंसा न ध्रुवबन्धिबन्धकारणं, किन्तु मिथ्यात्वादिरूपाः सामान्यहेतव एवेति।

**यशो.: अथाऽसातप्रकृतित्वावच्छिन्न इव पापप्रकृतित्वावच्छिन्नेऽपि हिंसाया हेतुत्वस्य शास्त्रे व्यवस्थितत्वात् 'यत्सामान्ये यत्सामान्यं हेतुस्तद्विशेषे तद्विशेषः' इति न्यायात् द्रव्यस्तवस्थलीयहिंसाया ज्ञानावरणीयादिप्रकृतिविशेषे हेतुत्वम् ।**

**चन्द्र.:** पूर्वपक्षः पुनः शङ्कते – **अथासातेत्यादि। असातप्रकृतित्वावच्छिन्न इव** = सर्वानेव असातबन्धान् प्रतीत्यर्थः, **पापप्रकृतित्वावच्छिन्नेऽपि** = सर्वानेव पापप्रकृतिबन्धान् प्रतीत्यर्थः। **हिंसायाः हेतुत्वस्य** = 'हिंसा हेतुः' इत्यस्य शास्त्रे **व्यवस्थितत्वात्।**

सकलस्मिन्विश्वे यस्य कस्याऽपि जीवस्य यः कोऽपि असातबन्धो भवति, तं प्रति हिंसा कारणम्, एवमेव सकलस्मिन्विश्वे यस्य कस्यापि जीवस्य यः कोऽपि पापबन्धो भवति, तं प्रति हिंसा कारणम्। एवं तावच्छास्त्रे प्रतिपादितम्। अनेनैतत्सिद्धं यदुत 'हिंसा पापबन्धसामान्ये सामान्यं कारणम्' इति।

तथा अयं न्यायो यदुत 'यत्सामान्ये यत्सामान्यं हेतुः, तद्विशेषे तद्विशेषः' इति। ततश्च यदि पापबन्धसामान्ये हिंसासामान्यं हेतुः, तर्हि ज्ञानावरणादिरूपस्य पापस्य बन्धे विशेषरूपे द्रव्यस्तवीयहिंसारूपो विशेष एव कारणमिति सिध्यति।

एवं च द्रव्यस्तवीया हिंसा ज्ञानावरणादिपापं बन्धयतीति सिद्धम्।

**यशो.: भक्तिरागोपनीयमानप्रकृतिविशेषेषु बहुभागपाताच्च तत्राऽल्पतरभागोपनिपातेनाल्पत्वमिति चेत्?**

**चन्द्र.:** अधुना द्रव्यस्तवे अल्पपापं बहु च पुण्यं कथमित्येतत्साधयति – **भक्तिरागोपनीय** इत्यादि। द्रव्यस्तवे हिंसावद् भक्तिरागोऽप्यस्ति, ततश्च तद्वशात् तत्र उपनीयमाना ये सातादयः पुण्यप्रकृतिविशेषाः, तेषु **बहुभागपाताच्च** = बध्यमानकर्मदलिकानां मध्यात् बहोर्भागस्य पातात् **तत्र** = पापबन्धे **अल्पतरभागोपनिपातेन** = पुण्यबन्धभागापेक्षयाऽल्पतरभागस्य उपनिपातेन **अल्पत्वम्।**

अयं पूर्वपक्षाशयः – द्रव्यस्तवीया हिंसा ज्ञानावरणादि बन्धयति, द्रव्यस्तवीयो भक्तिभावश्च सातादि बन्धयति, तत्र ज्ञानावरणादौ बध्यमानकर्मदलिकानां मध्यादल्पो भागः, सातादौ तु अधिको भागः निपततीति कृत्वा अल्पपापबहुपुण्यात्मकं फलं द्रव्यस्तवे सिद्धमिति।

**यशो.: तत्राह - तत्त्वे = द्रव्य (स्तव) स्थलीयहिंसायाः ध्रुवबन्धिपापप्रकृतिविशेषहेतुत्वे, इतरेतराश्रयता = अन्योन्याश्रयदोषः, द्रव्यस्तवीयद्रव्यहिंसाया भावहिंसात्वसिद्धौ उक्तहेतुत्वसिद्धिः, तत्सिद्धौ च भावहिंसात्वमिति।**

**चन्द्र.:** महोपाध्यायाः समादधति **तत्त्वे** इत्यादि। यदि द्रव्यस्तवीया हिंसा ज्ञानावरणादिपापप्रकृतिविशेषहेतुर्मन्येत तर्हि **इतरेतराश्रयता** = अन्योन्याश्रयदोषः, एनमेवाह – **द्रव्यस्तवीयेत्यादि** । द्रव्यस्तवे या द्रव्यहिंसा भवति, सा यदि भावहिंसा सिध्येत्, तदैव सा ज्ञानावरणादिबन्धहेतुः सिध्येत्, यस्मात् केवला द्रव्यहिंसा तु तादृशबन्धहेतुर्नैव भवति। परन्तु सा द्रव्यहिंसा भावहिंसा तु तदैव सिध्येत्, यदा सा ज्ञानावरणादिबन्धहेतुः सिध्येदित्येवं स्पष्टैवान्योन्याश्रयता।

**यशो.: द्रव्यहिंसा त्वाऽऽसयोगिकेवलिनमवर्जनीया ।**

**चन्द्र.:** ननु द्रव्यहिंसा केवलाऽपि ज्ञानावरणादिबन्धहेतुः किं न मन्येत? इत्यतः प्राक् समाधानं यद्यपि प्रदत्तमेव बहुशः, तथाऽप्याह – **द्रव्यहिंसा तु** = केवला **आसयोगिकेवलिनं** = त्रयोदशगुणस्थानं यावत् **अवर्जनीया**। तथा च यदि सा केवला ज्ञानावरणादिकारणं स्यात्, तर्हि त्रयोदशगुणस्थानं यावत् ज्ञानावरणादिबन्धो मन्तव्यः स्यात्।

**यशो.: एवंविधे चार्थसमाजसिद्धे चार्थे नियतोक्तहेतुत्वाश्रयणे पौषधादावतिप्रसङ्गस्तदाप्यल्पज्ञानावरणीयादिबन्धानुपरमादिति दिक्।**

**चन्द्र.:** तथा केवलाया द्रव्यहिंसाया ज्ञानावरणादिबन्धहेतुत्वस्वीकारे अन्याऽप्यापत्तिर्भवतीत्येतद् आह – **एवंविधे चेत्यादि।**

अयं भावः, गुडनागरघृतमिश्रणात्मकमौषधं पित्तकफवातनाशकमनुभवसिद्धम्। अत्र च गुडः पित्तनाशकः, नागरं कफनाशकं, घृतं वायुनाशकमिति गुडादीनां तत्तत्कार्यं प्रति पृथगेव कारणत्वम्। परन्तु अत्र त्रयाणां कारणानां समूहः सञ्जातः, तेन च पित्तकफवातनाशनात्मकं कार्यं सञ्जातम्। ततश्च यदि कश्चिदेवं मन्येत यदुतात्र गुडः कफनाशकः, नागरं पित्तनाशकं इत्यादि, ततश्च तन्मिथ्यैवेति स्पष्टमेव।

प्रकृतेऽप्यवमेव। तथाहि–भक्तिभावः सातबन्धादिकारणं, केवला द्रव्यहिंसा तु न कस्यापि बन्धस्य कारणं, ध्रुवबन्धिप्रकृतिसामान्यहेतवस्तु कषायादयः अत्र ध्रुवबन्धिबन्धकारणम्। ततश्च भक्तिभावद्रव्यहिंसासामान्यहेतूनां समूहेनात्र सातबन्धज्ञानावरणादिबन्धात्मकं कार्यं सञ्जातम्। तत्र यदि कश्चिन्मन्येत यदुत अत्र द्रव्यहिंसाऽस्ति, तस्मादत्र ज्ञानावरणादि कर्मबन्धो भवति, तर्हि तन्मिथ्यैव, यस्मात् स तु सामान्यहेतुसद्भावादेव भवति, न तु द्रव्यहिंसायाः सकाशादिति।

यदि नैवं मन्येत, तर्हि पौषधादावपि कूपदृष्टान्तापत्तिः, यस्मात् तत्राऽपि ज्ञानावरणादिबन्धस्तु भवत्येव।

ततश्च तत्कारणीभूता द्रव्यहिंसाऽपि तत्र मन्तव्या,ततश्च तत्रापि अल्पपापबहुपुण्यात्मकफलसद्भावात् भवति कूपदृष्टान्तापत्तिरिति।

न चैतदिष्टम्, तस्मात् 'द्रव्यहिंसा ज्ञानावरणादिहेतुः' इति नैव मन्तव्यम्।

एष भावार्थः प्रतिपादितः।

अधुनाऽक्षरार्थः।

**एवंविधे च** = सातादिबन्धज्ञानावरणादिबन्धस्वरूपे **अर्थसमाजसिद्धे** = अर्थानां = भक्तिभावद्रव्यहिंसा ध्रुवबन्धिबन्धकारणीभूतसामान्यहेतूनां समाजेन = समूहेन सिद्धे = समुत्पन्ने **चार्थे** = कार्ये **नियतोक्तहेतुत्वाश्रयणे** = नियतं यत् उक्तं हेतुत्वं, यथा केवला द्रव्यहिंसाऽत्र ध्रुवबन्धिबन्धकारणमित्यादि, तत्स्वीकारे **पौषधादौ** = आदिपदात् सर्वविरत्यादौ **अतिप्रसङ्गः** = कूपदृष्टान्तापत्तिः भवेत्। तत्र कारणमाह - **तदाऽपि** = पौषधादिकालेऽपि, 'आस्तां द्रव्यस्तवकाले' इत्यपिशब्दार्थः, **अल्पज्ञानावरणादिबन्धानुपरमात्** = अल्पस्य ज्ञानावरणादिबन्धस्य सततं सद्भावात्।

**ननु** पौषधादौ ज्ञानावरणादिकं अत्यन्तमल्पं, तदपेक्षया द्रव्यस्तवेऽधिकमिति पौषधादौ अत्यल्पज्ञानावरणादिकारणं सामान्यहेतवो मिथ्यात्वादयः, द्रव्यस्तवे पौषधाद्यपेक्षया अधिकज्ञानावरणादिकं यद् बध्यते, तत्कारणं द्रव्यहिंसेति एवं द्रव्यहिंसा ज्ञानावरणादिपापकर्मबन्धकारणं स्यादेव इति पूर्वपक्षाशङ्कायां सम्भवन्त्यां सत्यामाह - **इति दिक्।** तथा च दिक्सूचनमेव कृतमस्माभिः, बहु च वक्तव्यमस्मिनविषये अस्ति तत्तु अधुना नोच्यते, केवलं भवता यत्कथितं यदुत अल्पज्ञानावरणादिबन्धे सामान्यहेतवः कारणं 'अधिकज्ञानावरणादिबन्धे तु द्रव्यहिंसा' इति... तत्तुच्छम्। यस्मात् लघुघटे मृत्कारणं, बृहद्घटेऽपि मृदेव कारणं, न तु तन्तवः। केवलं लघुघटे अल्पा मृद्, बृहद्घटे च बह्वी मृद् कारणम् इति। एवं यदि अल्पज्ञानावरणादिबन्धे सामान्यहेतवः कारणम्, तर्हि बहुज्ञानावरणादिबन्धे विशिष्टाः सामान्यहेतव एव कारणं भवेत्, न तु द्रव्यहिंसादि इत्यादि सूक्ष्मप्रज्ञया निभालनीयं इति संक्षेपः।

**यशो. : अत्रेयं ध्रुवबन्धादिप्रक्रिया-निजहेतुसद्भावे यासामवश्यंभावी बन्धस्ता ध्रुवबन्धिन्यस्ताश्च वर्णचतुष्कं, तैजसं, कार्मणमगुरुलघु, निर्माणोपघातभयकुत्सामिथ्यात्वं, कषायाः, ज्ञानावरणपञ्चकं, दर्शनावरणनवकं, विघ्नपञ्चकमिति सप्तचत्वारिंशत्।**

**यासां च निजहेतुसद्भावेऽपि नावश्यंभावी बन्धस्ता अध्रुवबन्धिन्यस्ताश्चौदारिकवैक्रियाहारकशरीराणि, तदुपाङ्गानि त्रीणि, संहननषट्कं, संस्थानषट्कं, गतिचतुष्कं, खगतिद्विकमानुपूर्वीचतुष्टयं, जिननामोच्छ्वासनामोद्योतनामाऽऽतपनाम, पराघातनाम, त्रसदशकं, स्थावरदशकं, गोत्रद्विकं, वेदनीयद्विकं, हास्यादियुगलद्वयं, जातिपञ्चकं, वेदत्रयमायुश्चतुष्टयमिति त्रिसप्ततिः, एतासां निजहेतुसद्भावेऽप्यवश्यंबन्धाऽभावात् ।**

**चन्द्र.:** अत्रेयं ध्रुवबन्धादिप्रक्रियेत्यादि अवश्यंबन्धाभावात् इति यावत् सर्वं स्पष्टम्।

**यशो.: तथाहि-पराघातोच्छ्वासनाम्नोः पर्याप्तनाम्नैव सह बन्धः, नाऽपर्याप्त नाम्नाऽतोऽध्रुवबन्धित्वम्।**

ननु कथं एतासां निजहेतुसद्भावेऽपि अवश्यंबन्धस्याभावः ? इति चेत् **तथाहि - पराघातोच्छ्वास** इत्यादि। अष्टमगुणस्थाने तयोः बन्धविच्छेदोऽस्ति, तत्पूर्वं तु तयोः सामान्यबन्धहेतुः अस्ति, किन्तु पर्याप्तनामकर्मणैव सह तयोर्बन्धो भवतीति पर्याप्तबन्धाभावे तयोर्बन्धो नास्तीति अध्रुवबन्धित्वमिति।

**यशो.: आतपं पुनरेकेन्द्रियप्रायोग्यप्रकृतिसहचरितमेव बध्यते, नान्यदा। उद्योतं तु तिर्यग्गतिप्रायोग्यबन्धिनैव सह।**

**चन्द्र.:** एवं आतपमपि बन्धविच्छेदात्पूर्वमपि **एकेन्द्रियप्रायोग्यप्रकृतिसहचरितमेव** बध्यते, **नान्यदा** = एकेन्द्रियप्रकृतिबन्धाऽभावकाले, ततश्च तदपि अध्रुवबन्धि।

**यशो.: आहारकद्विक-जिननाम्नी अपि यथाक्रमं संयमसम्यक्त्वप्रत्ययेनैव बध्येते, नान्यदेत्यध्रुवबन्धित्वम्। शेषशरीरादिषट्षष्टिप्रकृतीनां सविपक्षत्वान्निजहेतुसद्भावेऽपि नाऽवश्यं बन्ध इति तथात्वं सुप्रतीतम् ।**

**चन्द्र.: यथाक्रमं** = आहारकद्विकं संयमरूपेण **प्रत्ययेण** = कारणेन, जिननाम च सम्यक्त्वरूपेण प्रत्ययेण = कारणेन **एव** बध्यते, **नान्यदा इति अध्रुवबन्धित्वम् । शेषशरीरादि** इत्यादि। **सविपक्षत्वात्** = परस्परमेव विरोधित्वात्। तथाहि - संहननषट्कमध्ये एकबन्धेऽपरपञ्चकबन्धाभाव एव, एवं संस्थानषट्कमध्येऽपि किञ्चिदेकमेव बध्यते। एवं त्रसदशकस्य स्थावरदशकस्य परस्परं विरोधित्वम्, एवं सातासातयोः, हास्यरतियुगलशोकारतियुगलयोः परस्परं विरोधः। एवं जातिपञ्चकमध्ये किञ्चिदेकमेव बध्यते, वेदत्रयमध्ये कश्चिदेक एव, आयुश्चतुष्टयमध्ये किञ्चिदेकमेवेत्यादि स्पष्टमेव।

एतदेवाह - **तथात्वं** = अध्रुवबन्धित्वं **सुप्रतीतम्** पञ्चमकर्मग्रन्थाध्येतॄणां इति शेषः।

**यशो.: तत्र ध्रुवबन्धिनीषु भङ्गत्रयम्, अनाद्यनन्तो बन्धः, अनादिसान्तः, सादिसान्तश्च। तत्र प्रथमभङ्गकः सर्वासामपि तासामभव्याश्रितः, तद्बन्धस्यानाद्यनन्तत्वादिति। द्वितीयभङ्गकस्तु ज्ञानावरणपञ्चकदर्शनावरणचतुष्कान्तरायपञ्चकलक्षणानां चतुर्दशप्रकृतीनाम् अनादिकालात् संतानभावे प्रवृत्तस्य बन्धस्य सूक्ष्मसम्परायचरमसमये यदा व्यवच्छेदः, तदा । आसामेव चतुर्दशप्रकृतीनामुपशान्तमोहे यदाऽबन्धकत्वमासाद्याऽऽयुःक्षयेणाद्धाक्षयेण वा प्रतिपतितः सन् पुनर्बन्धेन सादिबन्धं विधाय भूयोऽपि सूक्ष्मसम्परायचरमसमये यदा बन्धविच्छेदं विधत्ते, तदा तृतीयः। संज्वलनकषायचतुष्कस्य तु सदैव**

**प्रवृत्तबन्धभावस्य यदाऽनिवृत्तिबादरादिर्बन्धविच्छेदं विधत्ते, तदा द्वितीयः। ततः प्रतिपतितस्य पुनर्बन्धेन संज्वलनबन्धं सादि कृत्वा कालान्तरेऽनिवृत्तिबादरादिभावप्राप्तौ तद्बन्धविच्छेदसमये तृतीयः। निद्राप्रचलातैजस-कार्मणवर्णचतुष्काऽगुरुलघूपघातनिर्माणभयजुगुप्सास्वरूपाणां त्रयोदशप्रकृतीनामनादिकालादनादिबन्धं विधाय यदाऽपूर्वकरणाद्धायां यथास्थानं बन्धोपरमं करोति, तदा द्वितीयो भङ्गः। यदा तु ततः प्रतिपतितस्य पुनर्बन्धेन सादित्वमासादयन् बन्धः कालान्तरेऽपूर्वकरणमारूढस्य निवर्त्तते, तदा तृतीयः। चतुर्णां प्रत्याख्यानावरणानां बन्धो देशविरतगुणस्थानकं यावदनादिस्ततः प्रमत्तादौ बन्धोपरमात् सान्त इति द्वितीयः। प्रतिपतितबन्धापेक्षया तृतीयः। अप्रत्याख्यानावरणानां त्वविरतसम्यग्दृष्टिं यावदनादिबन्धं कृत्वा देशविरतादावबन्धकत्वसमये द्वितीयः। प्रतिपातापेक्षया तृतीयः। मिथ्यात्वस्त्यानर्द्धित्रिकानन्तानुबन्धिनां तु मिथ्यादृष्टिरनादिबन्धको यदा सम्यक्त्वाऽवाप्तौ बन्धोपरमं करोति तदा द्वितीयो भङ्गः। पुनर्मिथ्यात्वे गत्वा तान् बद्ध्वा यदा भूयोऽपि सम्यक्त्वलाभे न बध्नाति तदा तृतीयः। इत्येवं ध्रुवबन्धिनीनां भङ्गत्रयम्।**

**चन्द्र.:** अधुना तेषु अनाद्यनन्तादिभङ्गकान् प्रदर्शयति – **तत्र** = १२० प्रकृतिषु मध्ये **ध्रुवबन्धिनीषु** = ज्ञानावरणादिप्रभृतिषु **भङ्गत्रयम्।**

**तद्बन्धस्य** = अभव्याश्रितस्य ध्रुवबन्धिप्रकृतिबन्धस्य।

**संतानभावे** = अनवरतं, सततं इति यावत्।

**अद्धाक्षयेण वा** = एकादशगुणस्थानस्य यः कालः, तत्परिसमाप्त्या।

**अनिवृत्तिबादरादिः** = आदिपदात् सूक्ष्मसम्परायः, यस्मात् संज्वलनलोभस्य बन्धविच्छेदं स करोति इति ।

**अपूर्वकरणाद्धायां** = अष्टमगुणस्थानसमये **यथास्थानं** = यासां प्रकृतीनां अष्टमगुणस्थानसमये एव यस्मिन्कालविभागे बन्धविच्छेदस्थानं, तासां तस्मिन्स्थाने।

**इत्येवं ध्रुवबन्धिनीनां भङ्गत्रयम्।** एतदन्तं यावत् प्रायः सर्वं सुगममिति न विवृतम्। द्वितीयपञ्चमकर्मग्रन्थाभ्यासः प्रस्तुतपदार्थस्पष्टीकरणायावश्यक इति।

**यशो.: साद्यनन्तभङ्गकस्तु विरोधादेवानुद्भाव्यः। अध्रुवबन्धिनीनां त्वध्रुवबन्धित्वादेव सादिसान्तलक्षण एक एव भङ्गो लभ्यते। अधिकमस्मत्कृतकर्मप्रकृतिवृत्त्यादेरवसेयम् ॥१२॥**

**चन्द्र.: ननु** एतासां प्रकृतीनां बन्धस्य साद्यनन्तभङ्गकः कथं न प्रतिपादितः ? इति चेत्, **साद्यनन्तभङ्गकस्तु विरोधादेव** = यदि कस्यचित्कर्मणो बन्धः सादिः, तर्हि स अनन्तो नैव भवेत्, यदि चानन्तः, तर्हि सादिर्नैव भवेदित्येवं विरोधादेव **अनुद्भाव्यः** = अविचारणीयः।

**ननु** अध्रुवबन्धिनीनां को भङ्गो भवेदित्यत आह – **अध्रुवबन्धिनीनां तु अध्रुवबन्धित्वादेव** = कदाचिद् बन्धः कदाचिच्च नेत्येवंस्वरूपत्वादेव **सादिसान्तलक्षण एक एव** = न तु अनाद्यनन्तादिरूपा अन्ये

इत्येवकारार्थो **भङ्गो लभ्यते**। तासां हि बन्धः सततं न भवति, ततश्च यदा भवति, तदा सादिः, यदा पुनर्न भवति, तदा सान्त इति।

**अधिकं** = १२० कर्मप्रकृतीनां विशेषतः अनाद्यनन्तभङ्गकादिस्वरूपं **अस्मत्कृतकर्मप्रकृतिवृत्त्यादेः** = महोपाध्यायैः कृता या कर्मप्रकृतिवृत्तिः, तदादेः सकाशात्, आदिपदात् तथाविधं वृत्त्यन्तरं ग्राह्यम् **अवसेयम्**।

❁ ❁ ❁

**यशो.: (ननु पूजापञ्चाशके 'एयस्स समत्तीए' इत्यनेन प्रणिधानं चैत्यवन्दनान्ते कर्त्तव्यतया प्रोक्तमिति पूजादिकाले प्रणिधानाभावेन हिंसादोषत्वं पूजायामक्षतमेव) प्रणिधानप्रधानेन तु चैत्यवन्दनेन तदपनीयते। अत एव प्रणिधानाद्याशयराहित्यात्, द्रव्यक्रियारूपत्वेन पूजाया द्रव्यस्तवत्वम् ।**

**चन्द्र.:** जिनपूजायां विधिशुद्धायामपि केनाऽपि प्रकारेण हिंसादोषं साधयितुं पूर्वपक्षो युक्त्यन्तरमाह– **ननु पूजापञ्चाशके** इत्यादि।

अयं भावार्थः – 'एयस्स समत्तीए' इत्यादिगाथायां 'द्रव्यस्तवस्य समाप्तौ प्रणिधानं कार्यं' इति पूजापञ्चाशके प्रतिपादितम्। अत्र च 'द्रव्यस्तवस्यान्ते प्रणिधानं कर्त्तव्यतया उपदिष्टं' इति ज्ञायते यदुत 'द्रव्यस्तवकाले तु प्रणिधानं नास्ति' इति।

प्रणिधानं च शुभभावः, ततश्च तदभावेन जिनपूजायां पुष्पाद्युपमर्दनं भावहिंसैव, यदा तु पूजान्ते प्रणिधानप्रधानं चैत्यवन्दनं क्रियते, तदा हिंसादोषो दूरीक्रियत इति कूपदृष्टान्तोऽत्र घटते।

अधुनाऽक्षरार्थः। स च स्पष्ट एव।

**अत एव** = पूजाकाले प्रणिधानाभावेन भावहिंसात्वं इति यत् प्रसाधितम्, तस्मादेव **प्रणिधानाद्याशयराहित्यात्** = प्रणिधानप्रवृत्तिविघ्नजयसिद्धिविनियोगरूपैः भावस्तवकारणीभूतैः आशयैः यत् रहितत्वं जिनपूजायामस्ति, तस्मात् **द्रव्यक्रियारूपत्वेन** = जिनपूजाया द्रव्यक्रियास्वरूपत्वात् **पूजाया द्रव्यस्तवत्वम्।**

अयमाशयः –

आशयभेदा एते सर्वेऽपि, हि तत्त्वतोऽवगन्तव्याः।
भावोऽयमनेन विना, चेष्टा द्रव्यक्रिया तुच्छा।। (षो. ३/१२)

इति षोडशकवचनम्। अत्र प्रणिधानादय आशया 'भावः' इति निगदितम्, तेन विना चेष्टा द्रव्यक्रिया तुच्छा च प्रतिपादिता।

पूजापञ्चाशकानुसारेण तु ज्ञायते यदुत 'जिनपूजान्ते प्रणिधानं कार्यं' इति ततश्च अर्थापत्त्या 'जिनपूजाकाले प्रणिधानादिरूपो भावो नास्ति' इति निश्चीयते। ततश्च प्रणिधानादिरहिता जिनपूजाक्रिया न भावक्रिया,

किन्तु द्रव्यक्रिया, द्रव्यक्रियारूपत्वेन सा द्रव्यस्तवः, न तु भावस्तवः। ततश्च यत् पूजाया द्रव्यस्तवत्वं प्रतिपादितं, तेनाऽपि निश्चीयते, यदुत सा क्रिया प्रणिधानादिरहितैव, अन्यथा द्रव्यस्तवत्वासम्भवादिति।

**यशो.:** इत्यत्राह -

**दव्वथओ पुप्फाई, ण उ पणिहाणाइविरहओ चेव ।**
**पणिहाणाई अन्ते, भिण्णं पूव्विं तु सामण्णं ॥१३॥**

**चन्द्र.: अत्र** = एतस्मिन्पूर्वपक्षे सति **आह** -

त्रयोदश्या गाथायाः संस्कृतछाया अन्वयश्चैवम्।

**पुष्पादिः प्रणिधानादिविरहत एव द्रव्यस्तवो न तु ।**
**अन्ते प्रणिधानादि भिन्नं, पूर्वं तु सामान्यम् ॥१३॥**

द्रव्यस्तवो द्वाभ्यां प्रकाराभ्यां भवति। तत्र प्रणिधानाद्यभावैः यो द्रव्यस्तवः, स तुच्छक्रियारूप एको द्रव्यस्तवः, यस्तु पुष्पादिना द्रव्येण स्तवः, स प्रणिधानादिसद्भावेऽपि पुष्पादिद्रव्यप्राधान्याद् द्रव्यस्तवः, स च द्वितीयः।

पूजापञ्चाशके द्रव्यस्तवान्ते यत्प्रणिधानं उक्तं, तत्तु त्रयोदशप्रार्थनास्वरूपं 'जय वीयराय' इत्यादिसूत्रात्मकमुक्तम्। द्रव्यस्तवकाले एकाग्रतादिरूपं तु प्रणिधानमस्त्येवेति द्रव्यस्तवो न तुच्छक्रियारूपो द्रव्यस्तवः, किन्तु द्रव्येण प्रधानो द्रव्यस्तवः अभिप्रेत इति।

तथा भावस्तवकारणत्वात् स द्रव्यस्तव इति।

एतत्सर्वं स्पष्टीकर्त्तव्यम्।

अधुना त्रयोदश्या गाथाया वृत्तिः विव्रीयते।

**यशो.:** 'दव्वथउ पुप्फाई, सन्तगुणकित्तणा भावे' **इति निर्युक्तिवचनाद् द्रव्येण पुष्पादिना स्तवो द्रव्यस्तव इति व्युत्पत्तेर्जिनपूजाया द्रव्यस्तवत्वमुच्यते ।**

**चन्द्र.: दव्वथउ पुप्फाई** इत्यादि। 'पुष्पादिः द्रव्यस्तवः, विद्यमानगुणोत्कीर्तनं च भावस्तवः' इति **निर्युक्तिवचनात्** न तु 'दव्वथउ पणिहणाइभावविरहो' इत्यादि निगदितं इति ध्येयम्। **द्रव्येण पुष्पादिना स्तवो द्रव्यस्तव इति व्युत्पत्तेः** = एतादृशसमासानुसारेण जिनपूजाया द्रव्यस्तवत्वं उच्यते। न तु प्रणिधानादिविरहेण द्रव्यस्तवत्वमिति।

**यशो.: गुणवत्तया ज्ञानजनकः शब्दः (स्तवः) इत्यत्र वर्णध्वनिसाधारणं ताल्वोष्ठपुटादिजन्यव्यापारत्वं शब्दत्वमिति जन्यान्तपरिहारेण व्यापारमात्रस्यैव ग्रहणौचित्यात् ।**

**चन्द्र.: ननु** 'पुष्पादिः द्रव्यस्तवः' इति यदुक्तं, तन्न संगतमाभाति। तथाहि – 'गुणवत्तया ज्ञानजनकः शब्दः स्तवः' इति स्तवस्य व्याख्या। अत्र दृष्टान्त इत्थम्। 'भगवान् सर्वज्ञो वीतरागो देशनया जीवोपकारी' इत्यादि यः शब्द उच्चार्यते, तं श्रुत्वा श्रोतॄणां ज्ञानं भवति यथा 'भगवान् महावीरो गुणवान्' इति।

इत्थं च 'भगवान् गुणवान्' इत्येवंरूपं गुणवत्तया यज्ज्ञानं, तस्य जनको 'भगवान् सर्वज्ञः' इत्यादिरूपो यः शब्दः, स एव स्तव उच्यते।

ततश्च पुष्पादिभिः या पूजा क्रियते, सा कथं स्तवः ? तस्याः शब्दत्वाभावात्। शब्द एव स्तव इति चोक्तमेवानन्तरमिति चेत् श्रुणु ।

**गुणवत्तया ज्ञानजनकः शब्दः स्तवः इत्यत्र** = स्तवव्याख्यायां 'शब्द' इति यत् पदं वर्तते, तस्मिन् यत् शब्दत्वं वर्तते, तत् 'ताल्वोष्ठपुटादिजन्यव्यापारत्वं शब्दत्वं' इतिस्वरूपं यद्यपि अस्ति, तच्च 'क – ख – ग' इत्यादिरूपेषु वर्णेषु तु विद्यते एव, किन्तु 'क-ख-ग' इत्यादिरूपवर्णेभ्यो भिन्नेषु संगीतादिसम्बन्धिषु ध्वनिष्वपि विद्यत एव। इत्थं च ताल्वोष्ठपुटादिजन्यव्यापारत्वरूपं शब्दत्वं वर्णध्वनिसाधारणं अस्ति।

युक्तञ्चैतत् यस्मात् यथा गुणवत्तया ज्ञानं वर्णात्मको व्यापारो जनयति, तथैव 'अयं भगवान् गुणवान्' इति गुणवत्तया ज्ञानं दुन्दुभिप्रभृतिसम्बन्धी व्यापारोऽपि जनयत्येव। ततश्च यथा वर्णात्मकः शब्दः स्तवः, तथैव दुन्दुभिप्रभृतिशब्दोऽपि ध्वनिरूपोऽपि सन् स्तव एवेति।

परन्तु यदि वर्णात्मको व्यापारो गुणवत्तया ज्ञानजनको व्यापार इति कृत्वा स्तवः, ध्वन्यात्मको व्यापारश्च गुणवत्तया ज्ञानजनको व्यापार इति कृत्वा स्तवः, तर्हि देवमनुष्यादीनां करयोजनपुष्पोपनयनादिरूपो व्यापारोऽपि 'भगवान् गुणवान्' इति ज्ञानजनको व्यापार इति कृत्वा सोऽपि स्तव एवेति करयोजनपुष्पोपनयनादिरूपे व्यापारेऽपि स्तवलक्षणं सम्बन्धनीयमेव। परन्तु प्रस्तुतो व्यापारस्ताल्वोष्ठपुटादिजन्यो व्यापारो न, ततश्च "गुणवत्तया ज्ञानजनकः ताल्वोष्ठादिजन्यव्यापारः शब्दः (स्तवः)" इति स्तवलक्षणं तत्र न घटेत। तस्मात् या 'शब्द' पदस्य व्याख्या कृता, तस्याः सकाशात् 'ताल्वोष्ठपुटादिजन्य' इति भागो दूरीकर्त्तव्यः। केवलं 'व्यापारः शब्दः' इत्येवमेव 'शब्द' पदस्य व्याख्या करणीया।

ततश्च 'गुणवत्तया ज्ञानजनकः शब्दः स्तवः' इति स्तवव्याख्यानं तु सत्यं, किन्तु शब्दो नाम व्यापार एव, न तु ताल्वोष्ठपुटादिजन्यो व्यापार इति। इत्थं च यथा वर्णा गुणवत्तया ज्ञानजनकव्यापाररूपाः स्तवः, यथा च ध्वनयो गुणवत्तया ज्ञानजनकव्यापाररूपाः स्तवः, तथैव पुष्पाद्युपनयनादिरूपा क्रियाऽपि गुणवत्तया ज्ञानजनकव्यापाररूपाः स्तव एवेति जिनपूजायाः स्तवत्वं सिद्धम्।

अधुनाऽक्षरार्थः पुन उच्यते।

द्रव्येण स्तव द्रव्यस्तव इति व्युत्पत्तिबलात् जिनपूजा द्रव्यस्तव इति। **ननु** जिनपूजा द्रव्येण भवति इति सत्यम्, किन्तु सा स्तव इति कथं निर्णीतम्। यस्मात् स्तवो गुणवत्तया ज्ञानजनकशब्दस्वरूपः, जिनपूजा

तु न शब्दरूपेति तस्याः स्तवत्वमेव नास्तीत्यत आह – **गुणवत्तया ज्ञानजनकः शब्दः (स्तवः) इत्यत्र** = स्तवव्याख्यायां **वर्णध्वनिसाधारणं** = क-ख-ग इत्यादिवर्णेषु दुन्दुभिप्रभृतिध्वनिषु च विद्यमानं **ताल्वोष्ठपुष्टादिजन्यव्यापारत्वं शब्दत्वं** इति **जन्यान्तपरिहारेण** = 'ताल्वोष्ठपुटादिजन्य' इति शब्दानां त्यागेन **व्यापारमात्रस्यैव ग्रहणौचित्यात् ।** व्यापारमात्रग्रहणाऽभावे तु गुणवत्तया ज्ञानजनकस्यापि पुष्पोपनयनादेः स्तवत्वं न स्यात्, इष्यते च तत्, गुणवत्तया ज्ञानजनकस्य सर्वस्याऽपि स्तवत्वेनेष्टत्वादिति।

**यशो.: आलङ्कारिकमते चेष्टादिव्यापारस्य व्यञ्जकस्य ग्रहणावश्यकत्वेनोक्तपरिहारस्यावश्यकत्वाच्च ।**

**चन्द्र.: ननु** योगाद् रूढेर्बलीयस्त्वमिति न्यायात् यद्यपि भवतु नाम पुष्पोपनयनादिव्यापारो गुणवत्तया ज्ञानजनकः, तथाऽपि रूढ्या तु शब्दस्यैव ताल्वोष्ठपुटादिजन्यव्यापाररूपस्यैव स्तवत्वमिष्यते, न तु पुष्पोपनयनादिव्यापारस्येत्यतो जिनपूजायाः स्तवत्वसाधनाय युक्त्यन्तरमाह – **आलङ्कारिकमते च चेष्टादिव्यापारस्य** = कायिकक्रियारूपस्य **व्यञ्जकस्य** = स्वस्मिन् यत् तीर्थंकरादिगतस्य गुणवत्त्वस्य ज्ञानं, तत्प्रदर्शकस्य **ग्रहणावश्यकत्वेन** = ग्रहणस्यानिवार्यत्वेन **उक्तपरिहारस्य** = जन्यान्तत्यागस्य **आवश्यकत्वाच्च ।**

अयं भावः – यदि 'गुणवत्तया ज्ञानजनकः शब्दः स्तवः' इति व्याख्या क्रियेत, तत्राऽपि ताल्वोष्ठपुटादिजन्यो व्यापार शब्द इत्येव यदि 'शब्द' पदस्य व्याख्या क्रियेत। तर्हि आलङ्कारिकमते आपत्तिः स्यात्। यस्मात् आलङ्कारिकमते 'गुणवत्ताया व्यञ्जकश्चेष्टादिव्यापारोऽपि स्तवः' इत्येव स्वीकृतम्। ततश्च तेषां मते स्तवव्याख्यामध्ये गुणवत्ता व्यञ्जकस्य चेष्टादिव्यापारस्य ग्रहणमावश्यकम्। ततश्च यदि शब्दव्याख्यामध्ये ताल्वोष्ठपुटादिजन्यव्यापारत्वं भवेत्, तर्हि व्यञ्जकस्य चेष्टादिव्यापारस्य ग्रहणं न स्यात्, तस्य ताल्वोष्ठपुटादिजन्यव्यापारत्वाभावात्। तस्मात् अवश्यं जन्यान्तस्य परिहारः कार्यः, येन गुणवत्तया ज्ञानजनको व्यापाररूप एव स्तवः स्यात्। स च व्यापारो वर्णरूपो ध्वनिरूपो व्यञ्जकचेष्टारूपो वा भवेत्, सर्वोऽपि स्तव एव।

एवं च सति जिनपूजाया अपि गुणवत्तया ज्ञानजनकव्यापाररूपत्वात् स्तवत्वं सिद्धम्, पुष्पादिद्रव्येण क्रियमाणत्वाच्च द्रव्यस्तवत्वमिति।

**यशो.: न तु प्रणिधानादिविरहादेव द्रव्यस्तवत्वं, तथा सति तुच्छत्वेनाऽप्राधान्यरूपद्रव्यपदार्थत्वप्रसङ्गात्।**

**चन्द्र.:** एवं तावत् पुष्पादिना द्रव्येण स्तवत्वं प्रसाध्याधुना पूर्वपक्षेण यत् 'प्रणिधानादिविरहादेव द्रव्यस्तवत्वं' इत्येकान्ततः प्रतिपादितं, तन्निषेधायाह –

**न तु प्रणिधानादिविरहादेव** 'किन्तु द्रव्यस्य पुष्पादेः प्राधान्यादपि' इत्येवकारार्थः। तथा प्रणिधानादिविरहादपि भवति द्रव्यस्तवत्वं, परन्तु तस्मादेव भवतीत्येवमेकान्तो न मनोरम इति एवकारात्सूचितम्।

**ननु** प्रणिधानविरहादेव द्रव्यस्तवत्वमिति स्वीकारे को दोषः? इत्यत आह – **तथा सति** = एवं स्वीकारे सति **तुच्छत्वेन अप्राधान्यरूपद्रव्यपदार्थत्वप्रसङ्गात्।**

अयं भावः –

षोडशके प्रोक्तं यदुत 'अनेन विना चेष्टा द्रव्यक्रिया तुच्छा' इति। ततश्च यदि द्रव्यस्तवे प्रणिधानादिरूपभावस्य विरह एव स्वीक्रियेत, तर्हि तेन विना द्रव्यस्तवस्तुच्छ एव स्यात्। यश्च तुच्छः, स भावक्रिया तु तावद् दूरे, किन्तु भावक्रियायाः कारणरूपा प्रधानद्रव्यक्रियाऽपि न स्यात्, किन्तु भावक्रियाया अकारणीभूता अप्रधानद्रव्यक्रियैव स्यात्। न चैतदिष्टं, तस्मात् प्रणिधानादिविरहादेव द्रव्यस्तवत्वमिति न युक्तमिति भावः।

**यशो.: तदुक्तं षोडशके -**
'प्रणिधि-प्रवृत्ति-विघ्नजय-सिद्धि-विनियोग-भेदतः प्रायः।
धर्मज्ञैराख्यातः, शुभाशयः पञ्चधाऽत्र विधौ ॥१॥

**चन्द्र.: तद्** = अनन्तरं एव प्रतिपादितं **उक्तं षोडशके।**

षोडशकगाथानां सङ्क्षेपार्थस्त्वयम् –

(१) **अत्र विधौ** = अस्मिन् धर्मानुष्ठाने धर्मज्ञैः प्रायः प्रणिधिप्रवृत्तिविघ्नजयसिद्धिविनियोगभेदतः पञ्चधा शुभाशय आख्यातः।

तत्र प्रणिधानं किं? इत्याह –

**यशो.:** प्रणिधानं तत् समये, स्थितमत्तदधःकृपानुगं चैव ।
निरवद्य वस्तुविषयं, परार्थनिष्पत्तिसारं च ॥२॥

**चन्द्र.:** (२) **तत्समये** = धर्मस्थानस्य मर्यादायां **स्थितिमत्** = दृढतावत्, **तदधःकृपानुगं चैव** = अधिकृतधर्मस्थानापेक्षया हीनधर्मस्थानवर्तिषु कृपान्वितं **निरवद्यवस्तुविषयं** = अहिंसाप्रमुखनिरवद्यवस्तुसम्बन्धि **परार्थनिष्पत्तिसारं च** = परोपकारकरणप्रधानं च **प्रणिधानं।**

**यशो.:** तत्रैव तु प्रवृत्तिः शुभसारोपायसङ्गतात्यन्तम्।
अधिकृतयत्नातिशयादौत्सुक्यविवर्जिता चैव ॥३॥

**चन्द्र.:** तदनन्तरं प्रवृत्तिरूप आशयो भवति, स च कीदृशः? इत्याह –

(३) **तत्रैव** = प्रणिधानसम्बन्धिन्येव धर्मानुष्ठाने **अत्यन्तं शुभसारोपायसङ्गता** = शोभनेन निपुणेन

चोपायेन समन्विता **अधिकृतयत्नातिशयात्** = अधिकृते = धर्मानुष्ठाने यत्नातिशयात् = अत्यन्तमादरात् **औत्सुक्यविवर्जिता चैव** = 'कदा धर्मानुष्ठानं समाप्तं भविष्यति' इत्येवं रूप-उत्सुकताविरहिता **प्रवृत्तिः** भवति।

**यशो.:** विघ्नजयस्त्रिविधः खलु, विज्ञेयो हीनमध्यमोत्कृष्टः।
मार्ग इह कण्टक-ज्वर-मोहजयसमः प्रवृत्तिफलः ।।४।।

**चन्द्र.:** अधुना प्रवृत्त्यनन्तरभाविनं विघ्नजयरूपमाशयं दर्शयति ।

(४) **विघ्नजयः खलु हीनमध्यमोत्कृष्ट इह मार्गे कण्टकज्वरमोहजयसमः प्रवृत्तिफलः** = विशिष्टप्रवृत्तिसम्पादको **विज्ञेयः**। कण्टकतुल्यं जघन्यं विघ्नं, ज्वरतुल्यं मध्यमं, मार्गस्मृतिभ्रंशतुल्यं तृतीयमिति। धर्मानुष्ठाने तु शीतोष्णादिपरिषहा जघन्यं विघ्नं,शरीरान्तःसमुद्भवा रोगा मध्यमं विघ्नं, मोहनीयादि कर्मोदयश्चोत्कृष्टं विघ्नम्। एतत्त्रितयविजयेन विशिष्टा प्रवृत्तिर्भवति।

**यशो.:** सिद्धिस्तत्तद्धर्मस्थानावाप्तिरिह तात्त्विकी ज्ञेया।
अधिके विनयादियुता, हीने च दयादिगुणसारा ।।५।।

**चन्द्र.:** अधुना विघ्नजयानन्तरभाविनीं सिद्धिमाह -

(५) **इह अधिके** = गुर्वादिषु **विनयादियुता, हीने च** = स्वापेक्षयाऽल्पगुणवति **दयादिगुणसारा तत्तद्धर्मस्थानावाप्तिस्तात्त्विकी सिद्धिः** ज्ञेया।

**यशो.:** सिद्धेश्चोत्तरकार्यं विनियोगोऽवन्ध्यमेतदेतस्मिन्।
सत्यन्वयसम्पत्त्या, सुन्दरमिति तत्परं यावत् ।।६।।

**चन्द्र.:** अधुना विनियोगं सिद्धेरुत्तरकार्यभूतमाह -

(६) **विनियोगः सिद्धेः उत्तरकार्यं** = उत्तरकालीनं कार्यं, **एतस्मिन्** विनियोगे **सति एतद्** = प्रकृतं धर्मानुष्ठानं **अवन्ध्यम्** = सफलम्। कथं अवन्ध्यमित्याह - **अन्वयसम्पत्त्या परं यावत् तत्** = धर्मानुष्ठानं **सुन्दरमिति।** उत्तरोत्तरं विशिष्टं धर्मानुष्ठानं विनियोगप्रभावात्प्राप्यते, तच्च धर्मानुष्ठानं अन्ते उत्कृष्टं प्राप्यते, यावच्च तन्न भवति, तावत्सुन्दरमेव तद्धर्मानुष्ठानं प्राप्यत इति।

विनियोगो नाम परजीवं प्रत्यपि धर्मानुष्ठानस्य सम्पादनमिति।

**यशो.:** आशयभेदा एते, सर्वेऽपि हि तत्त्वतोऽनुगन्तव्याः ।
भावोऽयमनेन विना, चेष्टा द्रव्यक्रिया तुच्छा' ।।७।। इति ।

**चन्द्र.:** एवमाशयपञ्चकमभिधायाऽधुनैतन्माहात्म्यमाह –

(७) **सर्वेऽपि एते** = प्रणिधानादयः क्रियारूपतया दृश्यमाना अपि **तत्त्वतो** = परमार्थत **आशयभेदाः** = अध्यवसायप्रकारा अवगन्तव्याः।

**अयं** = पञ्चप्रकारोऽप्याशयो **भावः**, **अनेन** = भावेन **विना चेष्टा** = धर्मानुष्ठानरूपा **तुच्छा** = सर्वथा फलरहिता, अत एव **द्रव्यक्रिया** = अप्रधानद्रव्यक्रियारूपा।

एतत्तावत्सङ्क्षेपतोऽभिहितम्। विस्तरार्थिना तु षोडशकवृत्तिः योगविंशिकावृत्तिः, योगविंशिकावृत्त्युपरिकृता चन्द्रशेखरीयावृत्तिश्चावलोकनीयेति।

**यशो.: न च सर्वापि जिनपूजाऽप्राधान्येनैव द्रव्यरूपा, अपूर्वत्वप्रतिसन्धानविस्मयभवभ - यादिवृद्धिभावाऽभावाभ्यां द्रव्यभावेतरविशेषस्य तत्र तत्र प्रतिपादनात् ।**

**चन्द्र.:** हे पूर्वपक्ष! भवता तु सर्वाऽपि जिनपूजा तुच्छा, अत एवाप्राधान्येन द्रव्यरूपा स्वीक्रियते। **न च सर्वाऽपि** = किन्तु 'प्रणिधानादिभावविरहितैव' इति अपिशब्दार्थः। **अप्राधान्येनैव** = भावस्तवाकारणत्वेनैव, तुच्छत्वेनैवेति यावत् **द्रव्यरुपा ।**

ननु किमर्थं सर्वाऽपि तादृशी न स्वीक्रियते? इति शङ्कायामाह–**अपूर्वत्वप्रतिसन्धानेत्यादि।** 'अहो! अनादिसंसारे पूर्वं कदाऽपि कुत्रापि नैव प्राप्तो मया एतादृशो द्रव्यस्तवः' इति अपूर्वत्वप्रतिसन्धानम्, तथा जिनगुणान् दृष्ट्वा विस्मयः, तथा 'भयावहात्संसारात् मम संरक्षकोऽयं भगवान्, अयं तस्य स्तवः' इत्यादिस्वरूपं भवभयम्। तथाऽऽदिपदात् मोक्षाभिलाषादयो भावाः, ततश्च तेषां वृद्धिभावो यस्मिन्द्रव्यस्तवेऽस्ति, तस्मिन् द्रव्यस्तवे भावक्रियात्वमेव, स एव च द्रव्येण क्रियमाणः स्तव इति कृत्वा द्रव्यस्तव उच्यते, परन्तु स चारित्ररूपस्य भावस्तवस्य कारणत्वात् प्रधानो द्रव्यस्तवः। यस्मिंस्तु द्रव्यस्तवे अपूर्वत्वप्रतिसन्धानादिवृद्धिर्नास्ति, तस्मिन् द्रव्यक्रियात्वमेव, स च चारित्ररूपस्य भावस्तवस्याकारणत्वात् अप्रधानो द्रव्यस्तवः।

एतदेवाह–**द्रव्यभावेतरविशेषस्य** = **द्रव्यक्रियाभावक्रिययोः** महद्भेदस्य **तत्र तत्र** = तेषु तेषु योगादि – ग्रन्थेषु **प्रतिपादनात्**। तथा च शास्त्रेषु जिनपूजा प्रोक्तनीत्या भावक्रियास्वरूपा, प्रधानद्रव्यस्तवस्वरूपा च प्रतिपादितैवेति सर्वाऽपि जिनपूजा अप्राधान्येनैव द्रव्यक्रियास्वरूपा नैव स्वीकर्तुं शक्येति भावः।

**यशो.: यत्तु प्रणिधानादि अन्ते = चैत्यवन्दनान्ते प्रोक्तं, तद्भिन्नं = विशिष्टतरं, पूर्वं तु सामान्यं, सर्वक्रियासामान्ये (सामान्येन) भावत्वाऽऽपादकमिति भावः ।**

**चन्द्र.: ननु** तर्हि पूजापञ्चाशके अन्ते प्रणिधानं प्रोक्तं, तत्किमर्थम्? तेन तु एतदेव ज्ञायते यदुत पूजाकाले प्रणिधानं नास्त्येवेत्यत आह–**यत्तु प्रणिधानादि अन्ते = चैत्यवन्दनान्ते प्रोक्तं** कर्त्तव्यतया, **तद् - भिन्नं** = विशिष्टतरं 'जय वीयराय' इत्यादिसूत्रेण त्रयोदशप्रार्थनास्वरूपमेव **पूर्वं तु** = पूजाकाले तु

**सामान्यं** = षोडशकग्रन्थप्रतिपादितस्वरूपं **सर्वक्रियासामान्ये** = जिनपूजासम्बन्धिनीषु सर्वासु क्रियासु यदि वा कुत्रापि धर्मानुष्ठाने **भावत्वापादकम्** = 'सा क्रिया भावरूपा' इति साधकम्। एतच्च षोडशकगाथया ज्ञायत एव यदुत 'यत्र प्रणिधानादिरूपो भावो विद्यते, तद् धर्मानुष्ठानं भावक्रिया' इति।

**यशो.: कथमन्ते प्रणिधानादि भिन्नमिति चेदत्राहुः -**

'एयस्स समत्तीए कुसलं पणिहाणमो उ कायव्वं ।
एत्तो पवित्तिविग्घजयसिद्धि तह य थिरीकरणं ।।' (पू. पञ्चा. २९)

**एतस्य = चैत्यवन्दनस्य समाप्तौ कुशलं = शुभं, प्रणिधानं = प्रार्थनागतमेकाग्र्यम्, 'उ' इति निपातः पादपूरणे, कर्त्तव्यं = विधेयं, यस्मादितः प्रवृत्तिः = सद्धर्मव्यापारेषु प्रवर्तनं, जातमनोरथानां यथाशक्ति तदुपाये प्रवृत्तेः। विघ्नजयो मोक्षपथप्रवृत्तिप्रत्यूहस्य जघन्यमध्यमोत्कृष्टस्याऽशुभभावरूपस्य प्रणिधानजनितशुभभावान्तरेणाभिभवात्। तथा सिद्धिर्विघ्नजयात्प्रस्तुतधर्मव्यापाराणां निष्पत्तिः। तथैव च स्थिरीकरणं = स्वगतपरम (परगत) धर्मव्यापाराणां स्थिरत्वाधानं, परयोजनाध्यवसायेनाऽनुबन्धाऽविच्छेद इति यावत् ।**

**चन्द्र.:** शङ्कते - **कथमन्ते प्रणिधानादि भिन्नं** इति निर्णीतम्?!

समादधति - **अत्राहुः** इत्यादि।

**ननु** प्रणिधानात्कथं सद्धर्मव्यापारेषु प्रवर्तनम्? इति प्रश्ने सत्याह- **जातमनोरथानां** = प्रार्थनासूत्रेण याचितेषु पदार्थेषु भवनिर्वेदादिषु सम्प्राप्तमनोरथानां **यथाशक्ति** = स्वशक्त्यनुसारेण **तदुपाये** = सद्धर्मोपाये **प्रवृत्तेः**।

**स्वगतपरगतधर्मव्यापाराणां स्थिरत्वाधानं** इति। ननु सिद्धेः पश्चाद् विनियोगो निगदितः, विनियोगे तु परस्मिन् धर्मानुष्ठानं स्थिरं भवति, न तु स्वस्मिन्। ततश्चात्र स्वगतानामपि धर्मव्यापारानां यत् स्थिरत्वाधानमुक्तं, तन्न घटेत? इति शङ्कायां स्पष्टयन्नाह - **परयोजनाध्यवसायेन** 'इमे जीवा धर्मानुष्ठाने उद्युक्ता भवन्तु' इति पवित्राध्यवसायेन **अनुबन्धाविच्छेदः** = स्वस्मिन्नपि तद्धर्मानुष्ठानपरम्पराऽविनाशः। परोपकारपवित्रभावनायाः स्वोपकारकरणैकशीलत्वादिति।

**यशो.:** 'एत्तो च्चिय ण णियाणं, पणिहाणं बोहिपत्थणासरिसं ।
सुहभावहेउभावा णेयं इहराऽपवित्ती य ।।' **(पू. पञ्चा. ३०)**

**इत एव** = कुशलप्रवृत्त्यादिहेतुत्वादेव, **बोधिप्रार्थना(सदृशं)** = आरोग्य-बोधिलाभसमाधिवरप्रार्थना(सदृशं), **इतरथा** = निदानत्वेऽ**प्रवृत्तिर**न्त्यप्रणिधाने स्यात्, सा चाऽनिष्टा।

**चन्द्र.:** पूजापञ्चाशकगाथाया अन्वयस्त्वेवम् → इत एव बोधिप्रार्थनासदृशं प्रणिधानं शुभभावहेतुत्वात् न निदानं ज्ञेयम्। इतरथाऽप्रवृत्तिश्च ← इति।

अधुना प्रस्तुतगाथाया महोपाध्यायप्रदर्शिता वृत्तिः – **इत एव** = **कुशलप्रवृत्त्यादिहेतुत्वादेव** = पूर्वगाथायां यत्प्रतिपादित्तं यदुत प्रणिधानं कुशलप्रवृत्त्यादिहेतुर्भवति,तस्मादेव हेतुत्वाद् **बोधिप्रार्थनासदृशं** = 'आरुग्गबोहिलाभं समाहिवरमुत्तमं दिंतु' इति यत् 'लोगस्स' अपरनामके 'नामस्तवे' सूत्रम्, तस्मिन् या आरोग्यबोधिलाभसमाधिवरप्रार्थना क्रियते, तस्याः सदृशं इदं जयवीयरायसम्बन्धि प्रणिधानमिति।

**इतरथा** = **निदानत्वे** यदि हि 'जय वीयराय' सूत्रगता प्रार्थना निदानं स्यात्, तर्हि **अप्रवृत्तिः** = अकर्त्तव्यत्वमेव **अन्त्यप्रणिधाने** = चैत्यवन्दनान्ते क्रियमाणे प्रणिधाने **स्यात् ।** ननु न कर्त्तव्यैवान्त्यप्रणिधाने प्रवृत्तिरित्यत आह – **सा च** = अप्रवृत्तिश्च **अनिष्टा।**

अयं भावः – यथा नामस्तवगता प्रार्थना शुभभावेन कुशलप्रवृत्त्यादिहेतुत्वादेव न निदानं, तथैव चैत्यवन्दनान्ते क्रियमाणं 'जयवीयराय' प्रणिधानं शुभभावेन कुशलप्रवृत्त्यादिहेतुत्वादेव न निदानम्। यदि हि तन्निदानं स्यात्, तर्हि तस्मिन्प्रवृत्तिरकर्त्तव्या स्यात्। न च एतदिष्टम् ।

**यशो.:** 'एवं तु इट्ठसिद्धि, दव्वपवित्ती उ अण्णहा णियमा ।
तम्हा अविरुद्धमिणं, णेयमवत्थंतरे उचिए ।।' **(पू. पञ्चा. ३१)**

**एवं** पुनः प्रणिधानप्रवृत्ता**विष्टसिद्धिः**, प्रणिधानयुक्तचैत्यवन्दनस्य भावानुष्ठानत्वेन सकलकल्याणकारित्वात्। **द्रव्यप्रवृत्तिस्त्वन्यथा** = प्रणिधानं विना, **नियमात्, तस्माद्धेतोरेतत्प्रणिधानमविरुद्धम् अवस्थान्तर (रे ?)** = अप्राप्तप्रार्थनीयगुणावस्थायां, तच्च 'जय वीअराए' त्यादि।

**चन्द्र.:** **ननु** प्रणिधानेऽप्रवृत्तिः किमर्थ नेष्टा ? इति चेत्, श्रुणु **एवं तु** इत्यादि।

पञ्चाशकगाथाऽन्वयस्त्वेवम् –

एवं तु इष्टसिद्धिः, अन्यथा नियमाद् द्रव्यप्रवृत्तिः।
तस्मात् उचिते अवस्थान्तरे, इदं अविरुद्धं ज्ञेयम् ।।३१।।

अधुना महोपाध्यायप्रदर्शिता तद्वृत्तिः – **एवं पुनः** = प्रणिधानप्रवृत्तौ **इष्टसिद्धिः** = मोक्षप्राप्तिः । कथमिष्टसिद्धिरित्याह – **प्रणिधानयुक्तचैत्यवन्दनस्य** = 'जय वीयराय' सम्बन्धिना प्रणिधानेन युक्तस्य चैत्यवन्दनस्य **भावानुष्ठानत्वेन सकलकल्याणकारित्वात्** = मोक्षसम्पादकत्वात्।

**अप्राप्तप्रार्थनीयगुणावस्थायां** = अप्राप्ता ये प्रार्थनीया भवनिर्वेदादिरूपा गुणाः, तदवस्थायां। **तच्च** = प्रणिधानं। तीर्थकरादीनां तु तादृशावस्थाऽभावात् तत्प्रणिधानं नोचितमिति भावः।

**यशो.: न चेदं निदानं मोक्षाङ्गप्रार्थनात्वाद् बोधिप्रार्थनावत्। तीर्थकरत्वप्रार्थनावत्।**

**चन्द्र.:** प्रकृतप्रणिधानस्यानिदानत्वमेव पुनः अनुमानस्वरूपेन स्पष्टयति **न चेदं** = 'जयवीयराय' प्रणिधानं **निदानं** = इहपरलोकसुखापेक्षा निदानमिति सामान्यतो निदानव्याख्यानम्। 'जयवीयराय' सूत्रे

या भवनिर्वेदादिरूपा त्रयोदशपदार्थप्रार्थना क्रियते, सा निदानं न। तत्र कारणमाह – **मोक्षाङ्गप्रार्थनात्वात्** = मोक्षकारणीभूतानां भवनिर्वेदादिपदार्थानां प्रार्थनास्वरूपत्वात्।

तत्र दृष्टान्तमाह – **बोधिप्रार्थनावत्** । यथा नामस्तवान्तर्गता बोधिलाभप्रार्थना मोक्षाङ्गप्रार्थनारूपत्वात् न निदानं, तथैव 'जयवीयराय' सूत्रान्तर्गता प्रार्थनाऽपि बोध्येति। दृष्टान्तान्तरं प्रतिपादयति – **तीर्थकरत्वप्रार्थनावत्।**

> **यशो.: तीर्थकरत्वप्रार्थना चौदयिकभावांशे निदानं, छत्रचामरादिविभूतिप्रार्थनाया भवप्रार्थनारूपत्वात् ।**

**चन्द्र.: ननु** दशाश्रुतस्कन्धादौ 'तीर्थकरत्वं. मे भूयात्' इत्यादिरूपा प्रार्थना निदानरूपत्वादेव प्रतिषिद्धा। भवदुक्तरीत्या च तीर्थकरत्वं मोक्षाङ्गम्, ततश्च तस्य प्रार्थना मोक्षाङ्गप्रार्थनारूपत्वान्न निदानं, ततश्च तीर्थकरत्वप्रार्थनायाः प्रतिषेधो न युक्त इति चेत्, न,

तीर्थकरे छत्रचामरादिविभूतिस्वरूपं तीर्थकरत्वं तीर्थकरनामकर्मोदयजन्यत्वादौदयिकभावः, परन्तु तीर्थंकरे केवलज्ञानादिविभूतिस्वरूपं तीर्थकरत्वं तत्तत्कर्मक्षयजन्यत्वात् क्षायिकभावः। एवं च तीर्थकरे द्वौ अंशौ – औदयिकभावांशः क्षायिकभावांशः। तत्र औदयिकभावांशस्य प्रार्थना तु निदानमेव, यस्मात् छत्रचामरादिविभूतिः न मोक्षाङ्गा, किन्तु संसार एव स। तथा च दशाश्रुतस्कन्धादौ तीर्थकरत्वप्रार्थनानिषेध औदयिकभावांशमपेक्ष्यैव कृतः। या तु केवलज्ञानादिरूपक्षायिकभावांशस्य प्रार्थना क्रियते, सा तु क्षायिकभावांशमपेक्ष्य भवन्तीति नैव प्रतिषिद्धेति।

एतदेव आह – **तीर्थकरत्वप्रार्थना च औदयिकभावांशे** = यो मुग्धश्छत्रचामरादिविभूतिरूपं औदयिकभावांशमेव तीर्थंकरत्वं मन्यते, स तदेव तीर्थकरत्वं मनसिकृत्य 'मम तीर्थकरत्वप्राप्तिः स्यात्' इति प्रार्थयति, सा च प्रार्थना औदयिकभावांशे सती **निदानं**। कस्मान्निदानमित्यत्र कारणमाह - **छत्रचामरादिविभूतिप्रार्थनायाः** = औदयिकभावांशरुपस्य तीर्थकरत्वस्य प्रार्थनाया **भवप्रार्थनारूपत्वात्।**

> **यशो.: न तु क्षायिकभावांशे, तत्र तीर्थकरत्वोपलक्षितकेवलज्ञानादेरेव काम्यत्वात्, तस्य च साक्षान्मोक्षाङ्गत्वात्।**

**चन्द्र.: न तु क्षायिकभावांशे** = केवलज्ञानादिस्वरूपे।

यः परिणतो घातिकर्मक्षयसमुद्भूतान् गुणानेव तीर्थकरत्वं मन्यते, स तदेव तीर्थकरत्वं मनसिकृत्य 'मम तीर्थकरत्वप्राप्तिः स्यात्' इति प्रार्थयति, सा च प्रार्थना क्षायिकभावांशे सती न निदानम्। कस्मान्न निदानं ? इत्यत्र कारणमाह – **तत्र** = प्रस्तुतप्रार्थनायां **तीर्थकरत्वोपलक्षित केवलज्ञानादेरेव** = स हि प्राज्ञः तीर्थकरत्वं केवलज्ञानादिरूपमेव मन्यते, ततश्च तीर्थकरत्वेन केवलज्ञानादि एव उपलक्षितं भवति। ततश्च तादृशकेवलज्ञानादेरेव **काम्यत्वात्** = इच्छाविषयीभूतत्वात्। **ननु** भवतु नाम तत्प्रार्थनायां केवलज्ञानादेः काम्यत्वं, परन्तु तेन किं सिद्धमिति आह– **तस्य च** = केवलज्ञानादेश्च **साक्षात् मोक्षाङ्गत्वात्** = साक्षात्

मोक्षप्रापकत्वात् । तथा च केवलज्ञानादि साक्षान्मोक्षाङ्गं, ततश्च तस्य प्रार्थना साक्षान्मोक्षाङ्गत्वात् न निदानं इति अत्र सिद्धम्।

अत्र दृष्टान्तः।

केचित् जैनेतरा देवीप्रभृतिसुखसमन्वितं स्वर्गमेव मोक्षं मन्यन्ते, तात्त्विकजैनास्तु सर्वथा पौद्गलिकसुखरहितं आत्मिकसुखसमन्वितमेव च मोक्षं मन्यन्ते। ततश्च द्वयेऽपि यदा 'मम मोक्षः स्यात्' इति प्रार्थनां कुर्वन्ति,तदा जैनेतराणां सा प्रार्थना शब्दतो मोक्षप्रार्थनारूपाऽपि सती तद्भावापेक्षया तु देवीप्रभृतिसुखप्रार्थनारूपैव। तात्त्विकजैनानां तु सा प्रार्थना शब्दतो भावतश्चापि तात्त्विकमोक्षप्रार्थनारूपैवेति। अत एव 'मम देवीप्रभृतिकं भवतु' इति प्रार्थनावत् प्रतिपादितानां जैनेतराणां 'मम मोक्षः स्यात्' इति प्रार्थनाऽपि भवरागसमन्विता सती मलिनैवेति।

एतत्सर्वं तीर्थकरत्वप्रार्थनायामपि उपयुज्य वाच्यम्।

**यशो.: आह च -**

**'मोक्खंगपत्थणा इय, न नियाण तदुचियस्स विण्णेयं ।**

**सुत्ताणुमईओ जह, बोहीए पत्थणा माणं।' (पू. प. ३६)**

**इय = एषा 'जयवीयराए' त्यादिका, तदुचितस्य = प्रणिधानोचितस्य, प्रमत्तसंयतान्तस्य गुणस्थानिन इत्यर्थः। सूत्रानुमतेः, साभिष्वङ्गस्य तस्य निरभिष्वङ्गताहेतुत्वेन सूत्रे प्रणिधानाऽभिधानात्, यथा बोधेः प्रार्थना मानं = निदानत्वाऽभावसाधकमनुमानम्।**

**आह च** = प्रतिपादितमेवाह -

पञ्चाशकगाथान्वयस्त्वेवम् -

एषा मोक्षाङ्गप्रार्थना तदुचितस्य सूत्रानुमतितो न निदानं, यथा बोधेः प्रार्थना **मानं** = प्रमाणम्।

**प्रमत्तसंयतान्तस्य गुणस्थानिन इत्यर्थः** = तदुपरि अप्रमत्तप्रभृतिकाः प्रणिधानोचिता न सन्ति ।

**ननु** एतेषां कथं एषा प्रार्थना न निदानं? इति चेत्, **सूत्रानुमतेः** = शास्त्रस्य याऽनुज्ञा, तत्सद्भावात्। तथा च यत्र शास्त्रानुमतिः, सा प्रार्थना न निदानं, न हि शास्त्रं निदानेऽनुमतिं ददाति।

**ननु** सूत्रे अनुमतिरस्ति इति कथं सिद्धमित्यत आह - **साभिष्वङ्गस्य** = भवनिर्वेदादिसम्बन्धिना प्रशस्तरागेण सहितस्य **तस्य** = प्रणिधानस्य **निरभिष्वङ्गताहेतुत्वेन** = यत्र प्रशस्तोऽपि रागो नास्ति, तादृशावस्थाया निरभिष्वङ्गतारूपायाः कारणत्वेन **सूत्रे** जय वीयरायसूत्रे एव **प्रणिधानाऽभिधानात्** 'होऊ ममं तुह पभावओ भयवं' इत्यादिना प्रणिधानस्य निरूपणात्। **यथा बोधेः प्रार्थना** = नामस्तवान्तर्गता प्रतिपादिता **मानं** = **निदानत्वाभावसाधकमनुमानम्।**

**यशो.: दृष्टान्तावयवेऽनुमानत्वोक्तिरूपत्वात्।**

**चन्द्र.:** ननु → 'जय वीयराय' इत्याद्यन्तर्गता प्रार्थना न निदानं (निदानत्वाभाववती) सूत्रानुमतितः

बोधिप्रार्थनावत् ← इत्येवंरूपेऽनुमाने बोधिप्रार्थना तु दृष्टान्तरूप एक एव अवयवः। अनुमानं तु पञ्चावयवरूपम्, ततश्च बोधिप्रार्थना कथमनुमानमुक्तम्? तस्य अनुमानैकावयवभूतत्वादित्यत आह – **दृष्टान्तावयवे** = दृष्टान्तरूपेऽवयवे **अनुमानत्वोक्तिरूपत्वात्** यथा शरीरावयवे हस्ते शरीरत्वव्यवहारो भवति, तथैवानुमानावयवे दृष्टान्तेऽनुमानत्वव्यवहारः कृत इति।

**यशो.: 'एवं च दसाईसुं, तित्थयरंमि वि णियाणपडिसेहो।**
**जुत्तो भवपडिबद्धं, साभिस्संगं तयं जेणं ॥' (पू. पञ्चा. ३७)**
**भवप्रतिबद्धं 'भवभ्रमणलेशतोऽप्यहं तीर्थकरो भूयासमि'ति विकल्पेन संसारप्रार्थनानुप्रविष्टं साभिष्वंगं = रागोपेतं, 'तयं' ति तकत्तीर्थकरत्वम्।**

**चन्द्र.:** तीर्थकरे निदानप्रतिषेधस्य दशाश्रुतस्कन्धोक्तस्य समाधानमाह – **एवं च** इत्यादि।

पञ्चाशकगाथान्वयस्त्वेवम् –

**एवं च दशादिषु, तीर्थकरेऽपि निदानप्रतिषेधः।**
**युक्तः, येन साभिष्वंगं भवप्रतिबद्धं तत् ॥**

अधुना महोपाध्यायप्रदर्शितस्तद्वृतिलेशः।

**'भवप्रतिबद्धं'** इत्यस्यार्थमाह – **भवभ्रमणतोऽप्यहं तीर्थकरो भूयासम्** = "भवतु नाम मम अधिकं भवभ्रमणं, तथाऽपि तीर्थकरत्वं अनुभूयैव मया मोक्षे गन्तव्यं, न तु अन्यथा। मोक्षात्पश्चात्कदाऽपि तीर्थकरत्वानुभवस्यासम्भवात्" **इति विकल्पेन संसारप्रार्थनाऽनुप्रविष्टं** = भवभ्रमणस्यापि उपादेयतास्वीकारेण संसारप्रार्थनायां एव अनुप्रविष्टं।

**'साभिष्वङ्गं'** इत्यस्यार्थमाह – **'रागोपेतं'** इति। अप्रशस्तरागयुक्तम्।

**यशो.: वस्तुतः औदयिकभावप्रकारत्वाऽवच्छिन्नतीर्थकरभवनेच्छाया एव निदानत्वम्।,"**

**चन्द्र.: ननु** 'भवभ्रमणतोऽप्यहं तीर्थंकरो भूयासम्' इति तस्य या प्रार्थना, सा न संसारप्रार्थना, न हि स भवभ्रमणमिच्छति, किन्तु केनापि प्रकारेण तीर्थकरत्वमेव इच्छति। एतच्च **'अपि'** शब्देन स्पष्टमेव ज्ञायते। यदि हि स एवं प्रार्थयेत् यदुत 'प्रथमं तावच्चक्रवर्तिप्रभृतिपदप्राप्तिर्मम भवतु, येन सकलसंसारसुखानुभूतिर्मम स्यात्, तदनन्तरं मम तीर्थकरत्वसिद्धत्वादिकं स्यात्' तर्हि तस्य प्रार्थना संसारसुखरागमलिनीभूता भवेत्। परन्तु "तीर्थकरो भूत्वा प्रभूतान् जीवान् तारयित्वा मोक्षं प्राप्स्यामीति भवतु नाम मम भवभ्रमणमधिकं, तथाऽपि तीर्थकरत्वं प्राप्यैव मोक्षे गन्तव्यम्। न तु तदप्राप्याल्पेनाऽपि कालेन" इति भावनायान्तु तस्य न संसारसुखरागोऽस्ति, परन्तु मोक्षराग एवोत्कटोऽस्तीति भवभ्रमणप्रार्थनावत्यपि सा तीर्थकरत्वप्रार्थना नाप्रशस्तरागवतीत्याशङ्कायां आह –

**वस्तुत:** = परमार्थत **औदयिकभावप्रकारत्वावच्छिन्नतीर्थंकरभवनेच्छाया** = 'छत्रचामरादिविभूतिमान् तीर्थंकरोऽहं भूयासम्' इति या तीर्थंकरभवनेच्छा, तस्यां छत्रचामरादिविभूतिरूप औदयिकभाव: प्रकार:, तस्मिन्प्रकारता। ततश्चेयं तीर्थंकरत्वभवनेच्छा औदयिकभावप्रकारत्वावच्छिन्नाऽस्ति। **तादृशेच्छाया** एव, न तु इच्छामात्रस्येति एवकारार्थ:, **निदानत्वं।**

**यशो. : तेन तीव्रसंवेगवत: 'कतिपयभवभ्रमणतोऽप्यहं सिद्धो भूयासम्' इत्यस्येवोक्तसङ्कल्पस्य न निदानत्वमित्युक्तावपि न क्षति: ।**

**चन्द्र. : तेन** = 'एतादृशेच्छाया एव निदानत्वमस्ति' इत्यनेन कारणेन **तीव्रसंवेगवत:** = तीव्रमोक्षाभिलाषवत: **'कतिपयभवभ्रमणतोऽप्यहं सिद्धो भूयासम्'** = यदि शीघ्रमेव मोक्षो भवेत्, तर्हि श्रेष्ठमेव। किन्तु यदि कतिपयभवान् भ्रान्त्वाऽपि यदि मम सिद्धिपदप्राप्ति: स्यात्, तर्हि सुन्दरतममेवेति **अस्येव** = प्रस्तुताध्यवसायस्य इव **उक्तसङ्कल्पस्य** = **'भवभ्रमणतोऽप्यहं तीर्थकरो भूयासम्'** इति प्रतिपादितस्य सङ्कल्पस्यापि **न निदानत्वम्।**

कतिपयभवभ्रमणतोऽपि सिद्धभवनेच्छायास्तीव्रसंवेगजन्याया औदयिकभावप्रकारत्वावच्छिन्नत्वाभावाद् यथा न निदानता, तथैव भवभ्रमणतोऽपि तीर्थकरभवनेच्छायास्तीव्रसंवेगेनैव जन्याया औदयिकभावप्रकारत्वावच्छिन्नत्वाभावादेव न निदानत्वं इति।

**इति उक्तावपि** = एवं प्रकृतसङ्कल्पस्य निदानत्वाभावकथनेऽपि **न क्षति:** = न दशाश्रुतस्कन्धोक्तवचनेन सह विरोधापत्ति:, यस्मात्तद्वचनं हि औदयिकभावप्रकारत्वावच्छिन्नाया एव तीर्थंकरभवनेच्छाया निदानत्वं प्रतिपादयति, न तु तदन्यायास्तीव्रसंवेगजन्याया इति।

**यशो. : तीर्थकरत्वविभूतेरप्यकाम्यत्वमधिकृत्योक्तमन्यैरपि -**

'देवागमनभोयानचामरादिविभूतय: ।
मायाविष्वपि दृश्यन्ते नातस्त्वमसि नो महान्' ॥ **इति ॥ (आप्त० मि. १)**

**चन्द्र. : नन्वेवं** अर्थादापन्नं तीर्थंकरविभूतिस्तु छत्रचामरादिरूपाऽनभिलषणीयैवेति चेत्, सत्यमेव। यस्मात् **तीर्थंकरत्वविभूतेरपि** = 'आस्तां तावच्चक्रवर्त्यादिरूपपापपदवीविभूते: अकाम्यत्वं' इत्यपिशब्दार्थ:, **अकाम्यत्वं** = अनभिलषणीयत्वं। **अधिकृत्य** = आश्रित्य उक्तं **अन्यैरपि** = दिगम्बरैरपि, न केवलं श्वेताम्बरमतानुसारिभि: पूज्यतमैरिति 'अपि' शब्दार्थ:।

आप्तमीमांसागाथाया: सङ्क्षेपार्थस्त्वयम् -

→ हे भगवन्! देवानां आगमनं, नभसि नवकमलेषु गमनं, चामरप्रभृतयश्च या भवतो विभूतय:, तास्तु **मायाविषु अपि** = इन्द्रजालिकादिष्वपि, 'न केवलं भगवत्येव' इति अपिशब्दार्थ:। **दृश्यन्ते** अम्बडपरिव्राजककृतास्तीर्थंकरत्वसमवसरणादिरचना अत्र दृष्टान्त:। **नात:** = न अस्या विभूते: सकाशात् **त्वं असि नो** = अस्माकं **महान्** ।

अस्यां गाथायां 'तीर्थकरविभूतिः तुच्छैव, तया च तीर्थकरस्य माहात्म्यं नैव' इत्येव प्रतिपादितम्। ततश्चानया गाथयाऽपि तीर्थकरत्वविभूतेः अकाम्यता एव प्रतीयते।

**યશો.:** जं पुण णिरभिस्संगं धम्मा, एसो अणेगसत्तहिओ ।
णिरूवम-सुहसंजणओ, अउव्वचिंतामणीकप्पो ।।१।।

तो (ता) एयाणुट्ठाणं, हियमणुवहयं पहाणभावस्स ।
तेसिं (तम्मि) पवित्तिसरूवं, अत्थावत्तीइ तमदुट्ठं ।।२।। **(पू. पञ्चा. ३८-३९)**

**ચન્દ્ર.:** एवं भवप्रतिबद्धं अप्रशस्तरागयुक्तं तीर्थकरत्वप्रार्थनं निषिध्याधुना प्रशस्तरागयुक्तं तदेव तीर्थंकरत्वप्रार्थनं अदुष्टं प्रतिपादयन्नाह – **जं पुण** इत्यादि।

पञ्चाशकगाथाद्वयस्यान्वयस्त्वेवम् ।

→ धर्मात् एष अनेकसत्त्वहितो निरूपमसुखसंजनकोऽपूर्वचिन्तामणीकल्पः (तीर्थंकरः) भवति। तस्मात् एतदनुष्ठानं (तीर्थकरस्य देशनादिरूपमनुष्ठानं) हितं अनुपहतं ← इति प्रधानभावस्य तस्मिन् प्रवर्तनस्वभावं यत् निरभिष्वङ्गं प्रार्थनं, तत् अर्थापत्त्याऽदुष्टम् ।

**યશો.: यत्पुनस्तीर्थकरत्वप्रार्थनं निरभिष्वंगं तददुष्टमिति सम्बन्धः । यथा धर्मात्कुशलानुष्ठानादेष तीर्थकरो भवतीति गम्यम्। किंभूतः? अनेकसत्त्वहितो निरुपमसुखसंजननः, अपूर्वचिन्तामणिकल्पः। तत्तस्मादेतत्तीर्थकरानुष्ठानं धर्मदेशनादि हितं = पथ्यम्, अनुपहतं = अप्रतिघातं, इतिर्गम्यः, इतिप्रधानभावस्य एवंभूतसुन्दराध्यवसायस्य, तस्मिन् धर्मदेशनादौ जिनानुष्ठाने प्रवृत्तिस्वरूपं = प्रवर्त्तनस्वभावं, अर्थाऽऽपत्त्या = न्यायतः, साभिष्वंगस्य तीर्थकरत्वप्रार्थनस्य दुष्टत्वान्यथानुपपत्त्या, निरभिष्वंगं तददुष्टमिति न्यायप्राप्तम्।**

**ચન્દ્ર.:** अधुना गाथाद्वयस्य महोपाध्यायप्रदर्शिता वृत्तिः –

**यत्पुनस्तीर्थकरत्वप्रार्थनमित्यादि । तददुष्टमिति सम्बन्धः।**

तच्च प्रार्थनं कीदृशस्य जीवस्य भवति, तस्य च भावः कीदृशः? इत्येतदाह– **यथा धर्मात्** इत्यादि। अयं भावः,

यो जीव एवं चिन्तयति यदुत → एष नयसारादिजीवः कुशलानुष्ठानात् अनेकजीवहितकारी स्वस्य परस्य च निरुपमसुखसंजनकः, अपूर्वचिन्तामणिरत्नसदृशस्तीर्थकरो भवति। यस्माच्च एष नयसारादिजीव एतादृशस्तीर्थकरो भवति, तस्मादेव करणात् तस्य धर्मदेशनादिकं अनुष्ठानं हितकारि भवति,प्रतिघातकारि च न भवति ← इति।

एवं चिन्तयन्जीवः प्रधानभाववान् गम्यते, स जीव एतादृशचिन्तनानन्तरं यद्येवं प्रार्थनं करोति यथा 'अहमपि तीर्थंकरो भूयासम्' इति। तदा एवंभूतजीवस्यैतादृशं तीर्थंकरत्वप्रार्थनं अप्रशस्तरागरहितमस्ति,

तथा एतत्प्रार्थनं तीर्थंकरनामकर्मबन्धं कारयित्वा यदि वा तदनुसारिगणधराचार्यादिनामकर्मबन्धं कारयित्वा तं जीवं तीर्थंकरेण क्रियमाणे धर्मदेशनादौ अनुष्ठाने प्रवर्तयति।

एतादृशं यत् निरभिष्वङ्गं तीर्थंकरत्वप्रार्थनं तत् अदुष्टम्। यस्मात् न केवलं तीर्थकरत्वप्रार्थनं दुष्टमभिहितं, परन्तु साभिष्वङ्गं तत् दुष्टं प्रतिपादितम्, ततश्च अर्थापत्त्यैतदेव सिध्यति यदुत निरभिष्वङ्गं तत् अदुष्टमिति।

अधुनाऽक्षरार्थः – **यथा** = 'निरभिष्वङ्गं प्रार्थनं अदुष्टम्' इति साधनाय प्रस्तावनाप्रतिपादनपरोऽयं 'यथा' शब्द इति। **धर्मात् कुशलानुष्ठानात्** इत्यादेरारभ्य **अप्रतिघातं** इत्यन्तं यावत् कस्यचिज्जीवविशेषस्याध्यवसायस्वरूपं प्रतिपादितम्। अत एव **इतिगम्यः** इत्युक्तम्। गाथायां 'इति' शब्दो नास्ति, परन्तु स ग्राह्यः, ततश्च **इतिप्रधानभावस्य = एवंभूतसुन्दराध्यवसायस्य** इतिशब्दार्थः 'एवंभूतः', प्रधानशब्दार्थः 'सुन्दरः', भावशब्दार्थश्च अध्यवसायः। बहुव्रीहिसमासश्चात्र ज्ञेयः।

तादृशाध्यवसायवतो जीवविशेषस्य तीर्थंकरत्वप्रार्थनं तस्यैव जीवस्य **धर्मदेशनादौ जिनानुष्ठाने प्रवृत्तिस्वभावं = प्रवर्तनस्वभावम्।** तं तादृशाध्यवसायवन्तं जीवं तत्प्रार्थनं धर्मानुष्ठाने विहारे अन्यस्मिंश्च परोपकारकार्ये प्रवर्तयति।

**अर्थापत्त्या = न्यायतः** = अनुमानतः ।

अनुमानस्य हेतुमाह – **साभिष्वङ्गस्य तीर्थकरत्वप्रार्थनस्य दुष्टत्वान्यथानुपपत्त्या** इति। **न्यायप्राप्तम्** = अनुमानेन सिद्धमिति।

*अनुमानाकारस्त्वेवम्* –

निरभिष्वङ्गं तीर्थकरत्वप्रार्थनं अदुष्टं साभिष्वङ्गस्य दुष्टत्वान्यथाऽनुपपत्तेः, यथा पीनो दिवाऽभोजी देवदत्तो रात्रिभोजी, दिवाऽभोजिनः पीनत्वस्य अन्यथाऽनुपपत्तेः इति।

**अन्यथा** = निरभिष्वङ्गस्यादुष्टत्वं यदि मन्येत तर्हि **अनुपपत्तेः** = साभिष्वङ्गस्य दुष्टत्वं न घटेतेति कृत्वा।

यदि हि निरभिष्वङ्गं प्रार्थनं अदुष्टं न स्यात्, किन्तु दुष्टं स्यात् तर्हि साभिष्वङ्गं निरभिष्वङ्गं च सर्वमपि प्रार्थनं दुष्टमेव स्यात्। ततश्च 'प्रार्थनं दुष्टं' इत्येव वक्तव्यं स्यात्, न तु 'साभिष्वङ्गं प्रार्थनं दुष्टं' इत्येवम्।

यथा दिवाऽभोजी देवदत्तो रात्रिभोजी न स्यात्, तर्हि स पीनो न स्यात्, यदि च स पीनः, तर्हि तस्य दिवाऽभोजित्वपीनत्वोपपत्त्यर्थं रात्रिभोजित्वं मन्तव्यमेवेति।

**यशो.: न च वैयधिकरण्यम्,**

**चन्द्र.:** पूर्वपक्षोऽनुमाने दोषमाशङ्कते – **न च वैयधिकरण्यम्** इति। हेतुसाध्ययोः सामानाधिकरण्यं साध्यसाधनार्थं आवश्यकम्। न हि अन्यत्र विद्यमानो हेतुरन्यत्र साध्यं साधयति। अन्यथा पर्वते विद्यमानो धूमो जलोदधौ वह्निं साधयेत्।

प्रकृते साभिष्वङ्गस्य तीर्थंकरत्वप्रार्थनस्य दुष्टत्वं एव हेतुः, तच्च दुष्टत्वं साभिष्वङ्गे प्रार्थने वर्तते, अदुष्टत्वं च साध्यं निरभिष्वङ्गे प्रार्थने वर्तते। ततश्च हेतुसाध्ययोः सामानाधिकरणत्वं नास्ति, किन्तु व्यधिकरणत्वं = भिन्नभिन्नाधिकरणवृत्तित्वमस्ति, ततश्च नात्र हेतुः साध्यं साधयितुं क्षम इति।

**ननु** प्रकृते हेतुस्तु 'साभिष्वङ्गप्रार्थनस्य दुष्टत्वान्यथानुपपत्तिः' इत्येवंप्रदर्शितः, न तु साभिष्वङ्गप्रार्थनस्य दुष्टत्वमिति चेत्, न,

'पर्वतो वह्निमान् धूमात्' इति उच्यताम् 'पर्वतो वह्निमान् धूमस्य अन्यथानुपपत्तेः (वह्निं विनाऽनुपपत्तेः)' इति वा उच्यताम्, न कोऽपि भेदः।

एवमेवात्र दुष्टत्वान्यथानुपपत्तिः दुष्टत्वं वा किमपि उच्यतां, न कोऽपि भेदः, ततश्च दुष्टत्वहेतुः व्यधिकरण इति पूर्वपक्षोक्तं युक्तमेवेति।

**यशो.: पुत्रस्य ब्राह्मणत्वाऽन्यथानुपपत्त्या पित्रोर्ब्राह्मणत्वं न्याय्यमितिवदुपपत्तिरिति भावः।**

**चन्द्र.:** वैयधिकरण्येऽपि हेतुः साध्यं साधयितुं समर्थः सम्भवतीति समाधानमाह - **पुत्रस्य ब्राह्मणत्वान्यथाऽनुपपत्त्या** = पुत्रगतब्राह्मणत्वस्य पित्रोर्बाह्मणत्वं विनाऽघटमानत्वेन **पित्रोर्ब्राह्मणत्वं न्याय्यं** = अनुमानेन सिद्धम् **इतिवत्** = एतद्दृष्टान्तबलेन **उपपत्तिः** = साभिष्वङ्गस्य दुष्टत्वात् निरभिष्वङ्गस्यादुष्टत्वस्योपपत्तिरिति।

अयं भावः -

'मातापितरौ ब्राह्मणौ, पुत्रस्य ब्राह्मणत्वात्' इत्यत्रानुमाने ब्राह्मणत्वहेतुः पुत्रे वर्तते, तेन मातापित्रोः ब्राह्मणत्वं साध्यते। ततश्च यथाऽत्र व्यधिकरणेनाऽपि हेतुना साध्यसिद्धिर्भवति, एवं 'निरभिष्वङ्गं प्रार्थनं अदुष्टं, साभिष्वङ्गस्य दुष्टत्वात्' इत्यत्रापि साभिष्वङ्गप्रार्थननिष्ठेन दुष्टत्वहेतुना निरभिष्वङ्गप्रार्थनेऽदुष्टत्वं सिध्यति इति। अत्रापि ब्राह्मणत्वान्यथानुपपत्तिः ब्राह्मणत्वं वा एक एव हेतुः, न तत्र कोऽपि भेद इति द्रष्टव्यम्।

**यशो.: उभयभावोपरागविनिर्मुक्ततीर्थंकरत्वप्रार्थना किंरूपेति चेत्?**

**चन्द्र.:** शङ्कते - **उभयभावोपरागविनिर्मुक्ततीर्थंकरत्वप्रार्थना किंरूपेति चेत्?**

अयमाशयः - मुग्धजीवश्छत्रचामरादिविभूतिं दृष्ट्वा तामेव च तीर्थंकरत्वं मत्त्वा तदभिलाषेनैव 'अहं तीर्थंकरत्वं प्राप्नुयाम्' इति प्रार्थयति। अत्र तस्य मनसि तीर्थंकरत्वस्य स्वरूपं बाह्यविभूतिरेव। ततश्च तस्य प्रार्थना बाह्यविभूतिरूपस्य भावस्य = पदार्थस्य उपरागेन = अभेदतयाऽनुभूयमानेन सम्बन्धेन युक्तं यत्तीर्थकरत्वं, तत्प्रार्थनास्वरूपा।

परिणतजीवः केवलज्ञानादिविभूतिं विज्ञाय तामेव तीर्थकरत्वं मत्वा तदभिलाषेणैव 'अहं तीर्थंकरत्वं प्राप्नुयाम्' इति प्रार्थयति। अत्र तस्य मनसि तीर्थकरत्वस्य स्वरूपं अभ्यन्तरविभूतिरेव। ततश्च तस्य

प्रार्थना अभ्यन्तरविभूतिरूपस्य भावस्य = पदार्थस्य उपरागेन = अभेदतयाऽनुभूयमानेन सम्बन्धेन युक्तं यत्तीर्थकरत्वं, तत्प्रार्थनास्वरूपा।

किञ्चित्कालानन्तरं द्वावपि जीवौ पुनस्तामेव प्रार्थनां कुरुतः, तदाऽपि सा प्रार्थना उभयोः स्वस्वरूपैव, एवं बहुशस्तां प्रार्थनां कृत्वा यदा तौ तया प्रार्थनयाऽपि भावितौ भवतः, तदा 'तीर्थकरत्वं किं?' इति उपयोगं विनैव प्रार्थनां कुरुतः, अर्थात् केवलं 'तीर्थकरत्वं' इति शब्दमेव उपयोगविषयीकुरूतः, तदर्थस्तु बाह्यविभूतिरूपः अभ्यन्तरविभूतिरूपो वा न तयोर्मनसि स्फुरति। एतत्तु स्पष्टं यदुत संस्काररूपेण तु स अर्थस्तयोर्मनसि विद्यत एव। अत एव कश्चिद् यदि तौ पृच्छति, तदा तौ स्वस्वसंस्कारानुसारेणैव प्रत्युत्तरं दास्यति यदुत 'तीर्थंकरत्वं नाम बाह्यविभूतिः' इति। यदि वा 'तीर्थंकरत्वं नामाभ्यन्तरविभूतिः' इति।

एतच्चानुभवसिद्धमपि, यथा 'णमो अरिहंताणं' इति वदतः कस्यचित् अष्टप्रातिहार्यादिमतोऽर्हत उपस्थितिर्मनसि भवति, कस्यचित्प्रतिमायाः, कस्यचिच्च शब्दमात्रस्य उपस्थितिर्भवतीति।

ततश्च तीर्थकरत्वशब्देन बाह्यविभूतिं उपस्थापयतः प्रार्थनं दुष्टं, तीर्थकरत्वपदेनाभ्यन्तरविभूतिं उपस्थापयतः प्रार्थनं अदुष्टम्। परन्तु तीर्थकरत्वपदेन बाह्यविभूतिं अभ्यन्तरविभूतिं वा कामपि अनुपस्थापयतः केवलं तीर्थंकरत्वमेवोपस्थापयतः प्रार्थनं किं दुष्टं अदुष्टं वेति प्रश्नकारस्याशयः।

अधुनाऽक्षरार्थः।

**उभयभावस्य** = छत्रचामरादिबाह्यविभूतिरूपभावस्य क्षायिकविभूतिरूपभावस्य च **उपरागेण** = सम्बन्धेन **विनिर्मुक्तं** = विरहितं यत् **तीर्थकरत्वस्य** = अर्थात् केवलं तीर्थकरशब्दरूपतया उपस्थितस्य **प्रार्थना किंरूपा** दुष्टाऽदुष्टा वेति प्रश्नकर्तुरभिप्रायः।

**यशो.: औदयिकभावप्रार्थनाविशिष्टा निदानं, क्षायिकभावप्रार्थनाविशिष्टा चाऽनिदानम् ।**

**चन्द्र.:** महोपाध्यायाः समादधति - **औदयिकभावेत्यादि**। तथा च यदि सा प्रार्थना औदयिकभावप्रार्थनाविशिष्टा, तर्हि निदानं, यदि च क्षायिकभावप्रार्थनाविशिष्टा, तर्हि अनिदानमिति।

**यशो.: वैशिष्ट्यं सामानाधिकरण्यतत्तद्व्यवधानाभावकूटसम्बन्धाभ्याम् ।**

**चन्द्र.: ननु** अधुना तु केवलं उभयभावसम्बन्धविनिर्मुक्ततीर्थकरत्वप्रार्थनैवास्ति, न तु तन्मनसि औदयिकभावस्य प्रार्थना, न वा क्षायिकभावस्य प्रार्थनाऽधुनोपस्थिताऽस्ति। ततश्च कथं एकयाऽप्यविशिष्ट तीर्थंकरत्वप्रार्थना निदानमनिदानं वा स्यादित्यत आह - **वैशिष्ट्यं च सामानाधिकरण्यतत्तद्व्यवधानाभावकूटसम्बन्धाभ्याम्** इति।

इदमत्र तात्पर्यम्।

चैत्राभिधानः पुरुषो दशमे पञ्चदशमे अष्टादशमे विंशतितमे च वर्षे औदयिकभावरूपं तीर्थकरत्वं

प्रार्थितवान्। तस्यैव च द्वादशमे वर्षे शाब्दिकतीर्थंकरत्वप्रार्थना अभवत् (उभयभावोपरागविनिर्मुक्ततीर्थकरत्वप्रार्थनेति यावत्)।

अत्र च चैत्ररूपे एकस्मिन्नेवाधिकरणे औदयिकभावप्रार्थना शाब्दिकतीर्थकरत्वप्रार्थना चास्ति, ततश्च द्वे अपि समानाधिकरणे इति कृत्वा अत्र शाब्दिकतीर्थकरत्वप्रार्थना सामानाधिकरण्यसम्बन्धे-नौदयिकभावप्रार्थनाविशिष्टा भवति।

तथा औदयिकभावप्रार्थनायाः शाब्दिकप्रार्थनायाश्च मध्ये न काऽपि क्षायिकभावप्रार्थना अस्ति। यदि च पञ्चविंशतितमे वर्षे क्षायिकप्रार्थना भवेत्, तदाऽपि सा दशमस्य द्वादशस्य वर्षस्य मध्ये तु सा नास्त्येव, ततश्च जगति यावन्त्यः क्षायिकभावप्रार्थनाः, ताः सर्वा व्यवधानं गण्यन्ते, परन्तु अत्र तु औदयिकभावप्रार्थनायाः शाब्दिकप्रार्थनायाश्च मध्ये एकमपि व्यवधानं क्षायिकभावप्रार्थनारूपं नास्तीति तत्तद्व्यवधानानां सर्वेषां सर्वेऽपि येऽभावः, तेषां कूटमत्रास्ति, ततश्च औदयिकभावप्रार्थना तत्तद्व्यवधानाभावकूटसम्बन्धेन च शाब्दिकप्रार्थनया सह सम्बन्धवती अस्ति।

इत्थं चात्र शाब्दिकप्रार्थना सामानाधिकरण्यसम्बन्धात् तत्तद्व्यवधान-अभावकूटसम्बन्धाच्च औदयिकभावप्रार्थनाविशिष्टाऽस्तीति कृत्वा सा शाब्दिकप्रार्थना अधुना उभयभावोपरागविनिर्मुक्ततीर्थकरत्वप्रार्थनारूपाऽपि सती निदानमेवेति।

यथा औदयिकभावप्रार्थनामधिकृत्य निदानस्य विचारणा कृता, तथैव क्षायिक-भावप्रार्थनामधिकृत्यानिदानस्यापि विचारणा कर्त्तव्या। केवलं तत्र तु तत्तद्व्यवधानतया औदयिकभावप्रार्थना ग्राह्या इति।

एतत्सर्वं न्यायशैलिमाश्रित्योक्तम्। भावार्थस्तु अयमेव यदुत

(१) प्रथमं औदयिकभावप्रार्थना, पश्चाच्च शाब्दिकतीर्थकरत्व प्रार्थना, मध्ये तु न क्षायिकभावप्रार्थना, तत्र औदयिकभावप्रार्थनाया एव संस्कारः शाब्दिकतीर्थकरत्वप्रार्थनायां गर्भित इति सा प्रार्थना निदानमेव।

(२) यदा तु प्रथमं क्षायिकभावप्रार्थना, पश्चाच्च शाब्दिकतीर्थकरत्वप्रार्थना, मध्ये तु न औदयिकभावप्रार्थना, तत्र क्षायिकभावप्रार्थनाया एव संस्कारः शाब्दिकतीर्थकरत्वप्रार्थनायां गर्भित इति सा प्रार्थनाऽनिदानमेव।

(३) यदा तु औदयिकभावप्रार्थनायाः शाब्दिकप्रार्थनायाश्च मध्ये क्षायिकभावप्रार्थना व्यवधानरूपतया प्रविष्टा, तदा शाब्दिकप्रार्थना न निदानं, अपि तु आसन्नभाविन्याः क्षायिकभावप्रार्थनायाः संस्कारवशात् अनिदानमेव।

(४) यदा तु क्षायिकभावप्रार्थनायाः शाब्दिकप्रार्थनायाश्च मध्ये औदयिकभावप्रार्थना व्यवधानरूपतया प्रविष्टा, तदा शाब्दिकप्रार्थनाऽनिदानं न, अपि तु आसन्नभाविन्या औदयिकभावप्रार्थनायाः संस्कारवशात् निदानमेव।

(५) यदि सामानाधिकरण्यसम्बन्धो न गृह्येत, केवलं तत्तद्व्यवधानाभावकूटसम्बन्ध एवोच्येत,

तर्हि यदा चैत्रस्य द्वादशे वर्षे क्षायिकभावप्रार्थना पञ्चदशे च वर्षे शाब्दिकतीर्थंकरत्वप्रार्थना भवेत्। मैत्रस्य च त्रयोदशे वर्षे औदयिकभावप्रार्थना भवेत्,तर्हि मैत्रस्य औदयिकभावप्रार्थनायाः चैत्रस्य च शाब्दिकप्रार्थनाया मध्ये न किमपि व्यवधानमस्तीति कृत्वा तत्तद्व्यवधानाभावकूटसम्बन्धात् चैत्रीया शाब्दिकतीर्थकरत्वप्रार्थना मैत्रीयौदयिकभावप्रार्थनाविशिष्टा भवेत्, ततश्च सा निदानं स्यात्, न चास्ति।

सामानाधिकरण्यसम्बन्धग्रहणे तु नायं दोषः, यस्मात् औदयिकभावप्रार्थना मैत्रे वर्तते, न तु चैत्रे। ततश्च चैत्रीया शाब्दिकतीर्थकरत्वभावना न सामानाधिकरण्यसम्बन्धेन औदयिकभावप्रार्थनाविशिष्टा, ततश्च सा न निदानम्।

एवमेव विपरीतमपि योज्यम्।

तथाहि - चैत्रस्य द्वादशे वर्षे औदयिकभावप्रार्थना, पञ्चदशे च वर्षे शाब्दिकतीर्थकरत्वप्रार्थना भवेत्। मैत्रस्य त्रयोदशे वर्षे क्षायिकभावप्रार्थना भवेत्, तर्हि मैत्रस्य क्षायिकभावप्रार्थनाया चैत्रस्य शाब्दिकप्रार्थनायाश्च मध्ये न किमपि व्यवधानमस्तीति कृत्वा तत्तद्व्यवधानाभावकूटसम्बन्धात् चैत्रीया शाब्दिकतीर्थकरत्वप्रार्थना मैत्रीयक्षायिकभावविशिष्टा भवेत्, ततश्च साऽनिदानं स्यात्, न चास्ति।

सामानाधिकरण्यसम्बन्धग्रहणे तु नायं दोषः, यस्मात् क्षायिकभावप्रार्थना मैत्रे वर्तते, न तु चैत्रे। ततश्च चैत्रीया शाब्दिकतीर्थंकरत्वप्रार्थना न सामानाधिकरण्येन क्षायिकभावप्रार्थनाविशिष्टा, किन्तु द्वाभ्यां सम्बन्धाभ्यामौदयिकभावविशिष्टैवेति सा निदानमेवेति।

यदि केवलं सामानाधिकरण्यसम्बन्ध एव गृह्येत, तर्हि यत्र चैत्रस्य प्रथमं औदयिकभावप्रार्थना, पश्चात् क्षायिकभावप्रार्थना, पश्चाच्च शाब्दिकतीर्थकरत्वभावना भवेत्, तत्र औदयिकभावप्रार्थना शाब्दिकप्रार्थना च परस्परं समानाधिकरणेति सामानाधिकरण्यसम्बन्धेन औदयिकभावविशिष्टा सा शाब्दिकतीर्थकरत्वप्रार्थना स्यात्, तथा च सा निदानं परिगणनीया स्यात्। वस्तुतस्तु सा मध्ये क्षायिकभावप्रार्थनाव्यवधानात् अनिदानमेव।

तत्तद्व्यवधानाभावकूटसम्बन्धग्रहणे तु नायं दोषः। यस्मादत्र औदयिकभावप्रार्थनायाः शाब्दिकतीर्थकरत्वप्रार्थनायाश्च मध्ये क्षायिकभावप्रार्थनारूपं व्यवधानमस्त्येवेति तत्तद्व्यवधानाभावकूटरूपः सम्बन्धोऽत्र नास्तीति अत्र शाब्दिकतीर्थकरत्वप्रार्थना न द्वाभ्यां सम्बन्धाभ्यां औदयिकभावप्रार्थनाविशिष्टेति सा न निदानमपि तु अनिदानमेवेति।

तथा कूटशब्दोऽप्यत्रात्यन्तमावश्यकः, तथाहि-अनन्तरप्रतिपादितस्थाने एव यद्यपि क्षायिकभावप्रार्थनारूपं व्यवधानमस्ति, परन्तु तदेकमेव, इतरेषां तु सर्वेषां व्यवधानानां अभावो विद्यत एव, ततश्च 'तत्तद्व्यवधानाभावसम्बन्धोऽप्यत्र घटत' इति कृत्वा सामानाधिकरण्यतत्तद्व्यवधानाभावाभ्यां औदयिकभावविशिष्टा शाब्दिकतीर्थंकरत्वप्रार्थनेति तस्या निदानत्वापत्तिः दुर्वारैव स्यात्।

तत्तद्व्यवधानाभावकूटग्रहणे तु नायं दोषः, यस्मात् अत्र सर्वेषां तत्तद्व्यवधानानां अभावसत्त्वेऽपि एकस्याः क्षायिकभावप्रार्थनाया व्यवधानरूपाया अभावो नास्तीति तत्तद्व्यवधानाभावकूटात्मकः सम्बन्धो नास्तीति कृत्वा न शाब्दिकतीर्थकरत्वप्रार्थनाया निदानत्वापत्तिरिति।

एवमेव शाब्दिकतीर्थकरत्वप्रार्थनायाः क्षायिकभावप्रार्थनामाश्रित्य अनिदानत्वापत्तिः औदयिकभावव्यवधानस्थानेऽवबोद्धव्या, तत्समाधानं चावबोद्धव्यम्।

अत्र सुखावबोधाय पुनः सङ्क्षेपतः किञ्चिदुच्यते।

(१) औदयिकभावोपरागयुक्ततीर्थकरत्वप्रार्थना निदानम्।

(२) क्षायिकभावोपरागयुक्ततीर्थकरत्वप्रार्थना न निदानम्।

(३) यत्र प्रथमं औदयिकभावप्रार्थना पश्चात् औदयिकक्षायिकोभयभावोपरागविनिर्मुक्ततीर्थकरत्व- प्रार्थना अर्थात् शाब्दिकतीर्थकरत्वप्रार्थना भवति, तत्र सा निदानम्।

(४) यत्र प्रथमं क्षायिकभावप्रार्थना, पश्चात् प्रतिपादिता शाब्दिकतीर्थकरत्वप्रार्थना भवति, तत्र सा न निदानम्।

(५) यत्र प्रथमं औदयिकभावप्रार्थना, पश्चात् क्षायिकभावप्रार्थनारूपं व्यवधानं,पश्चाच्च शाब्दिक-तीर्थकरत्वप्रार्थना भवति, तत्र सा न निदानम्।

(६) यत्र प्रथमं क्षायिकभावप्रार्थना, पश्चात् औदयिकभावप्रार्थनारूपं व्यवधानं, पश्चाच्च शाब्दिकतीर्थकरत्वप्रार्थना भवति, तत्र सा निदानम्।

(७) 'तीर्थकरत्वं किं?' इति प्रश्नस्य उतरे यदि जीवो बाह्यविभूतिं कथयति, तदा तस्य मनसि औदयिकभावप्रार्थना तत्संस्कारश्च वर्तत इति स्पष्टम्। केवलं तज्जीवस्य एतत्कथनं स्वाभाविकमवसेयम्, न तु कपटजन्यम्।

अतिगहनमिदं तत्त्वं पुनः पुनरुपयुज्य स्पष्टीकर्त्तव्यम्।

(८) 'तीर्थंकरत्वं किं?' इति प्रश्नस्य उत्तरे यदि जीवोऽभ्यन्तरविभूतिं कथयति, तदा तस्य मनसि क्षायिकभावप्रार्थना तत्संस्कारश्च वर्तत इति स्पष्टम्। केवलं तज्जीवस्यैतत्कथनं स्वाभाविकमवसेयम्, न तु कपटजन्यम्।

**यशो.: समूहालम्बनेच्छायां तु मानाभावः ।**

**चन्द्र.:** ननु यथा कश्चित्तीर्थकरत्वं बाह्यविभूतिरूपं मत्वा प्रार्थयति, यथा च कश्चित्तीर्थकरत्वमभ्यन्तर -विभूतिरूपं मत्वा प्रार्थयति, एवं कश्चित्तीर्थकरत्वं बाह्यविभूतिरूपमभ्यन्तरविभूतिरूपं चोभयरूपं मत्वा तीर्थकरत्वं प्रार्थयति, तदा तस्य प्रार्थना किंस्वरूपा? सा च प्रार्थना 'बाह्यविभूतिरूपं तीर्थकरत्वं अभ्यन्तरविभूतिरूपं तीर्थकरत्वं च मम भूयात्' इत्यादिरूपा समूहालम्बनेच्छात्मिका भवेत्। सा चैकस्मिन्नपि समये सम्भवेत् इति चेत् न, **समूहालम्बनेच्छायां** = हे पूर्वपक्ष! अनन्तरमेव भवत्प्रतिपादितायां **मानाभावः** = प्रमाणाभावः।

भवता एकस्मिन्नेव समये बाह्याभ्यन्तरविभूतिरूपस्य द्विविधस्य तीर्थकरत्वस्य ज्ञानमुच्यते,परन्तु समयोऽतिसूक्ष्मः काल इति एतादृशोऽनुभवो भवति यदुत 'एकस्मिन्नेव समये बाह्यविभूतेरभ्यन्तरविभूतेश्चेच्छा

सञ्जाता,' या समूहालम्बनेच्छोच्यते। परमार्थतस्तु स अनुभवो भ्रान्तः, किन्तु यथा व्यञ्जनावग्रहार्थावग्रहेहापायधारणादयः क्रमशो भवन्तोऽपि समकमेव भवन्तोऽनुभूयन्ते, तथैवात्र बाह्यविभूतेरभ्यन्तरविभूतेश्चेच्छाद्वयं क्रमशो भवदपि समकमेव भवदनुभूयते। ततश्च यस्मिन्समये बाह्यविभूतेरिच्छा, तस्मिन्समये सा प्रार्थना निदानम्, यस्मिंश्च समयेऽभ्यन्तरविभूतेरिच्छाः, तस्मिन्समये सा प्रार्थनाऽनिदानम् इति स्पष्टमेवेति।

| |
|---|
| **यशो.: भावे वाऽऽसातां निदानत्वाऽनिदानत्वे अव्याप्यवृत्तिजाती ।** |

**चन्द्र.: ननु** यथा पूर्वं समूहालम्बनं ज्ञानं स्वीकृतमेव, तथैव समूहालम्बनेच्छाऽपि स्वीकरणीयैवेति। किञ्च व्यञ्जनावग्रहादयः क्रमशो भवन्तीति सत्यम्, परन्तु तत्र एकस्मिन्नपि समये अवग्रहादौ 'कमल' इत्यादिरूपाणां बहूनामक्षराणां बोधस्तु स्वीकृत एव, एवमेवात्रापि एकस्मिन्नपि समये समूहालम्बनेच्छा किमर्थं न स्वीक्रियेतेत्यत आह –

**भावे वा** यदि हि तस्या भावः स्वीक्रियते, तर्हि स्वीक्रियतां नाम। **ननु** तर्हि तस्यामिच्छायां निदानत्वमनिदानत्वमुभयं स्यात्, औदयिकभावप्रार्थनात्वस्य क्षायिकभावप्रार्थनात्वस्य चोभयस्य सत्त्वादित्यत इष्टापत्तिं कुर्वन्नाह – **आसातां निदानत्वानिदानत्वे अव्याप्यवृत्तिजाती** इत्यादि।

एकस्यामेव इच्छायां इच्छात्वं तावद् वर्तत एव, परन्तु तत्र औदयिकभावप्रार्थनारूपो योंऽशः, तदवच्छेदेन तस्यां इच्छायां निदानत्वजातिरेव, न तु अनिदानत्वजातिः, क्षायिकभावप्रार्थनारूपो योंऽशः, तदवच्छेदेन तस्यामिच्छायां अनिदानत्वजातिरेव, न तु निदानत्वजातिः। एवं च यथा वृक्षे शाखावच्छेदेन कपिसंयोगोऽस्ति, मूलावच्छेदेन नास्तीत्येवंरीत्या स संयोगः अव्याप्यवृत्तिः, वृक्षे सर्वावच्छेदेन अविद्यमानत्वात्। एवमेवात्र निदानत्वानिदानत्वेऽव्याप्यवृत्तिजाती, एकस्यां इच्छायां सर्वावच्छेदेनाविद्यमानत्वात्।

| |
|---|
| **यशो.: इत्यादिः प्रमाणार्णवसंप्लवव्यसनिनां गोचरः पन्थाः ।** |

**चन्द्र.: ननु** न्यायमते संयोगोऽव्याप्यवृत्तिरभिप्रेतः, न तु जातिः, जातिस्तु स्वाधिकरणे व्याप्यैव वर्तते, न तु अव्याप्य, ततश्च जात्योरव्याप्यवृत्तित्वकथनं कथं घटते? इति अत आह – **इत्यादि** निदानत्वानिदानत्वे अव्याप्यवृती इत्यादिः **प्रमाणार्णवसंप्लवव्यसनिनां** = स्याद्वादरूपे समुद्रे संप्लवस्य व्यसनं येषां ते प्रमाणार्णवसंप्लवव्यसनिनः, तेषां **गोचरः** विषयभूतः **पन्थाः** = मार्गः।

अयमाशयः – एकान्तवादिनो हि नैयायिकादयो न जानन्त्येव स्याद्वादगम्यं पदार्थम्, ते तु 'जातिः व्याप्यवृत्तिरेव, संयोगोऽव्याप्यवृत्तिरेव' इत्यादीन् एकान्तान् गृह्णन्ति। परन्तु स्याद्वादरूपसमुद्रावगाहिनां तु स्याद्वादपरिकर्मितमतित्वात् 'जातिः अपेक्षया व्याप्यवृत्तिः, अपेक्षयाऽव्याप्यवृत्तिः' इत्यादिरूपः सम्यग्बोधो भवत्येव। तथा च सूक्ष्मोऽयं पदार्थ एकान्तवादिभिः न बुध्यतां नाम, स्याद्वादिभिस्तु स बुध्यत एवेति।

**यशो.: तदेवमन्ते स्तवफलप्रार्थनारूपं प्रणिधानं भिन्नम् ।**

**चन्द्र.:** उपसंहारमाह -

**तदेवं** = पञ्चाशकोक्तपाठदर्शनात् ज्ञायते यदुत **अन्ते** = चैत्यवन्दनान्ते **स्तवफलप्रार्थनारूपं** = द्रव्यस्तवफलरूपाणां त्रयोदशपदार्थानां प्रार्थनारूपं **प्रणिधानं भिन्नम्।**

**यशो.: पूर्वं तु क्रियमाणस्तवोपयोगरूपं भिन्नमित्यनुपयोगरूपत्वेन द्रव्यस्तवे नाऽवद्यशङ्का विधेयेति स्थितम् ।।१३।।**

**चन्द्र.: ननु** तर्हि द्रव्यस्तवकाले कीदृशं प्रणिधानं? इत्याह - **पूर्वं तु** द्रव्यस्तवकाले चैत्यवन्दनकाले च **क्रियमाणस्तवोपयोगरूपं** = क्रियमाणो यो द्रव्यस्तवश्चैत्यवन्दनरूपो वा भावस्तवः, तस्मिन्नुपयोगात्मकं प्रणिधानं **भिन्नं** प्रार्थनारूपात्प्रणिधानात् भिन्नम्। ततश्च द्रव्यस्तवे प्रणिधानं त्वस्त्येवेति।

**इति** = तस्मात् **अनुपयोगरूपत्वेन** = पञ्चाशके चैत्यवन्दनान्ते प्रणिधानस्य प्रतिपादनात् तत्पूर्वं तु द्रव्यस्तवे प्रणिधानं नास्तीति सिध्यति, ततश्च द्रव्यस्तवोऽनुपयोगरूपः, इति द्रव्यस्तवस्यानुपयोगरूपत्वं पूर्वपक्षेण यत्प्रतिपादितं आसीत्, तेनानुपयोगरूपत्वेन **द्रव्यस्तवे नावद्यशङ्का** = स अप्रधानद्रव्यरूपः, अत एव तत्र विद्यमाना द्रव्यहिंसा तात्त्विकी हिंसा, अत एव तस्मिन्नवद्यम् इति अवद्यशङ्का न **विधेया** इति **स्थितम् ।** 'हे पूर्वपक्ष! द्रव्यस्तवोऽनुपयोगरूपः, तस्मात् तत्रावद्यम्' इति शङ्का न कार्या इति निश्चितम्।

❁ ❁ ❁

दुःषमकालादिदोषवशात् ये मन्दमतिका जीवा भवन्ति, तेऽपि जिनशासनरहस्यं प्राप्नुयुरिति तीव्रभावना मम मनसि सञ्जाता, तच्च रहस्यं आगमादिग्रन्थेभ्य उद्धृत्य महोपाध्यायैः स्वग्रन्थेषु प्रतिपादितम्। परन्तु शैलिवशात्तद्रहस्यं मन्दमतिकानां दुर्बोधं सञ्जातम्, अतस्तदुपकाराय मया इयं सुबोधा वृत्तिः कृता।

यद्यपि जिनशासनरहस्यमतीवगहनमिति तज्ज्ञानं मादृशानामपि दुर्लभमेव, न चाहमेतद्वक्तुं क्षमः, यदुत 'अहं महोपाध्यायग्रन्थपदार्थान् स्पष्टं जानामि' इति। तथाऽपि मत्सकाशादपि येऽधिकमन्दमतिकाः, तदुपकारार्थं मया स्वल्पमपि मज्ज्ञानं सुबोधटीकया प्रकटीकृतम्।

सम्भवन्ति चात्र प्रभूताः क्षतयः, यस्मान्महोपाध्यायानां ग्रन्था अतिगम्भीराः, ततश्च ता दूरीकृत्य सज्जनविद्वांसो ममोपरि उपकारं कुर्युः इति प्रार्थनां कृत्वा विरमामीति।

**यदीयसम्यक्त्वबलात्प्रतीमो**
**भवादृशानां परमस्वभावम् ।**
**कुवासनापाशविनाशनाय**
**नमोऽस्तु तस्मै तव शासनाय ।।**

**इति कूपदृष्टांतविशदीकरणोपरिश्रीचन्द्रशेखरीयावृत्तिः समाप्ता ।**

# कूपदृष्टान्तविशदीकरणम्

પરમાત્માનો એવો પ્રભાવ છે કે
તેઓ કોઈ એકાદ જણના એકાદ પ્રશ્નનો જ જવાબ આપતા હોય, પણ સાંભળનારા કરોડો લોકોના કરોડો પ્રશ્નોનું સમાધાન એ એક જ જવાબ દ્વારા થઈ જાય.

મહોપાધ્યાય યશોવિજયજી મહારાજાના ગ્રંથોનો પણ આવો જ પ્રભાવ છે કે તેઓશ્રી કોઈ એકાદ પ્રશ્નનો જ જવાબ આપતા હોય, પણ એ જવાબ એવો હોય કે બીજા સેંકડો પ્રશ્નોનો જવાબ એ એક જ જવાબમાંથી મળી જાય.

શું તમે અનુભવ કર્યો છે આ વસ્તુનો ?
કરવો છે અનુભવ ?
તો વાંચો પ્રસ્તુત ગ્રન્થ.....
વિચારો,મનન કરો, પ્રસ્તુત ગ્રન્થ.....

## कूपदृष्टान्तविशदीकरणम्

જિનપૂજામાં જીવહિંસા છે, તો એ શી રીતે કરાય ? એનો જવાબ આપવા માટે શાસ્ત્રકાર મહર્ષિઓએ કૂવો ખોદવાનું દ્રષ્ટાંત આપેલુ છે, એ દ્રષ્ટાંત ઉપર અત્યંત ગહન વિચારણા આ ગ્રન્થમાં કરવામાં આવી છે.

Cover Design : NEM Graphic - 09428608279